समा देया शर्करा सुभिषग्वरैः ॥ ३ ॥ कर्षमात्रं ततः खादेन्मधुना प्लावितं सुधीः। अस्य प्रभावाद्ग्रहणीकासश्वासारुचिक्षयाः ॥ वातश्लेष्मप्रतिश्यायाः प्रशमं यान्ति सर्वथा ॥ ४ ॥ इति जातीफलाद्यं चूर्णम्।

॥ अथ बिल्वाद्यं घृतम् ॥

बिल्वाग्निचव्यार्द्रकशृङ्गबेरकाथेन कल्केन च सिद्धमाज्यम्। सच्छागदुग्धं ग्रहणीगदोत्थे शोफाग्निसादारुचिनुद्वरं स्यात् ॥ १ ॥ इति बिल्वाद्यं घृतम्। कृच्छ्रेण कठिनत्वेन यः पुरीषं विमुञ्चति। सघृतं लवणं तस्य पाययेत्क्लेशशान्तये ॥ बिडं यवानीं विष्टम्भे पिबेदुष्णेन वारिणा ॥ १ ॥

॥ अथ द्राक्षासवः ॥

मृद्वीकायाः पलशतं चतुर्द्रोणेऽम्भसः पचेत्। द्रोणशेषे तु शीते च पूते तस्मिन्प्रदापयेत् ॥ १ ॥ द्विशते क्षौद्रखण्डाभ्यां धातक्याः प्रस्थमेव च। कक्कोलकलवङ्गे च जातीसस्यं तथैव च ॥ २ ॥ पलांशकानि मरिचं त्वगेलापत्रकेसरैः। पिप्पली चित्रकं चव्यं पिप्पलीमूलरेणुकम् ॥ ३ ॥ घृतभाण्डस्थितमिदं चन्दनागुरुधूपितम्। कर्पूरवासितो ह्येष ग्रहणीदीपनः परम् ॥ ४ ॥ अर्शसां नाशनः श्रेष्ठ उदावर्तास्रगुल्मनुत्। जठरक्रिमिकुष्ठानि व्रणांश्च विविधांस्तथा ॥ ५ ॥ अक्षिरोगशिरोरोगगलरोगविनाशनः। ज्वरमामं महाव्याधिं पाण्डुरोगं सकामलम् ॥ नाम्ना द्राक्षासवो ह्येष बृंहणो बलवर्णकृत् ॥ ६ ॥ इति गदनिग्रहाद्द्राक्षासवः।

॥ अथ रसाः ॥

सूतकं गन्धकं लोहं विषं चित्रकपत्रकम्। वरारी रेणुका मुस्ता एला ग्रन्थिककेशरम् ॥ १ ॥ फलत्रयं त्रिकटुकं शुल्वभस्म तथैव च। एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥ २ ॥ ग्रहण्यां पाण्डुरोगे च दातव्यं मधुना सह। अतिसारे क्षये कासे प्रमेहे विषमज्वरे। नानानुपानैर्दातव्यश्चतुर्मूर्ती रसोत्तमः ॥ ३ ॥ अथ सुवर्णरसपर्पटी। शुद्धसूतं पलमितं तुर्यांशस्वर्णसंयुतम्। मर्दयेन्निम्बुनीरेण यावदेकत्वमाप्नुयात् ॥ १ ॥ प्रक्षाल्योष्णाम्बुना पश्चात्पलमात्रे सुगन्धके। द्रुते लोहमये पात्रे बादरानलयोगतः ॥ २ ॥ प्रक्षिप्य चालयेल्लोह्यां मन्दं लोहशलाकया। ततः पाकं विदित्वा तु रम्भापत्रे शनैः क्षिपेत् ॥ ३ ॥ गोमयस्थे तदुपरि रम्भापात्रेण यन्त्रयेत्। शीतं तच्चूर्णितं गुञ्जाक्रमवृद्धं निषेवयेत् ॥ ४ ॥ माषमात्रं भवेद्यावत्ततो मात्रां न वर्धयेत्। सक्षौद्रेणोषणेनैव लेहयेद्भिषगुत्तमः ॥ ५ ॥ ग्रहणीं हन्ति शोषं च सुवर्णरसपर्पटी। सद्योबलकरी शुक्रवर्धनी वह्निदीपनी ॥ क्षयकासश्वासमेहशूलातीसारपाण्डुनुत् ॥ ६ ॥ इति सुवर्णरसपर्पटी ॥ अथ ग्रहणीकपाटः ॥ तारमौक्तिकहेमानि सारश्चैकैकभागिकम्। द्विभागो गन्धकः सूतस्त्रिभागो मर्दये-

---

१ (च०) वरं तद्।

दिमान् ॥ १ ॥ कपित्थस्वरसैर्गाढं मृगशृङ्गे ततः क्षिपेत् । पुटेन्मध्ये पुटेनैव ततउद्धृत्य मर्दयेत् ॥ २ ॥ बलारसैः सप्तवेलमपामार्गरसैस्त्रिधा। लोध्रप्रतिविषामुस्तधातकीन्द्रयवामृता ॥ ३ ॥ प्रत्येकमेतत्स्वरसैर्भावना स्यात् त्रिधा त्रिधा । माषमात्रं रसो देयो मधुना मरिचैस्तथा ॥ ४ ॥ हन्यात्सर्वानतीसारान् ग्रहणीं सर्वजामपि । कपाटो ग्रहणीरोगे रसोऽयं वह्निदीपनः ॥५॥ अन्यश्च । रसेन्द्रगन्धातिविषाभयाभ्रं क्षारत्रयं मोचरसो वचा च । जया च जम्बीररसेन पिष्टं पिण्डीकृतं स्याद्ग्रहणीकपाटः ॥१॥ अन्यश्च रसराजलक्ष्म्याः । शुद्धैः कर्कवराटकैर्गणनया भल्लातकांस्तत्समान्क्षोतान्बब्बुलकण्टकैर्लघुपुटैस्तस्याङ्घ्रिभागं रसम् । लेलीतेन समं विचूर्ण्य जयया सप्तानुभाव्यं शिवः प्रोक्तोऽयं ग्रहणीकपाटकरसस्त्रैवल्लकस्त्वौषधैः ॥ १ ॥ इति ग्रहणीकपाटः ॥ अथ ग्रहणीगजकेसरी रसः ॥ गन्धं पारदमभ्रकं च दरदं लोहं च जातीफलं बिल्वं मोचरसं विषं प्रतिविषां व्योषं तथा धातकीम् । भृष्टामप्यभयां कपित्थजलदौ दीप्यानलौ दाडिमं टङ्काद्रस्मकलिङ्गकात्कनकजं बीजं च पक्षेक्षणम् ॥ १ ॥ एतसुर्यमफेनमेतदखिलं संमर्द्य संचूर्णयेद्धत्तूरच्छदजै रसैश्च मतिमान्कुर्यान्मरीचाकृतिम् । दत्ता सा ग्रहणीगदं सरुधिरं सामं सशूलं चिरातीसारं विनिहन्ति ज्वर्तिसहितां तीव्रां विषूचीमपि ॥ २ ॥ दुःसाध्यामपि बिम्बसीं परिहरेदुक्तानुपानैरयं नाम्ना तु ग्रहणीमतङ्गजमदध्वंसीभकण्ठीरवः ॥ ३ ॥ इति ग्रहणीगजकेसरी रसः ॥ अथ रसपर्पटी ॥ शुद्धपारदगन्धाभ्यां कृता पर्पटिका नृणाम् । निहन्ति ग्रहणीं क्षौद्रयुक्ता पथ्यभुजां भृशम् ॥ १ ॥ इति रसपर्पटी ॥ अथ पञ्चामृतपर्पटीरसः ॥ लोहाभ्रार्करसं समं द्विगुणितं गन्धं पचेत्कोलिकाकाष्ठाग्नौ मृदुले निधाय सकलं लोहस्य पात्रे भिषक् । सर्वं गोमयमण्डले विनिहिते रम्भादले विन्यसेत्तस्योर्ध्वं कदलीदलं द्रुततरं वैद्येश्वरो विन्यसेत् ॥१॥ स्यात्पञ्चामृतपर्पटी ग्रहणिकायक्ष्मातिसारज्वरस्त्रीरुक्पाण्डुगराम्लपित्तगुदजक्षुन्मान्द्यविध्वंसिनी ॥ २ ॥ ग्रहण्यामनुपानं हि हिङ्गु सैन्धवजीरकम् । जीरकम् पाण्डुगरयोरितरेषु स्वयुक्तितः ॥ ३ ॥ इति पञ्चामृतपर्पटीरसः ॥ अथ कनकसुन्दररसः ॥ मरीचबलिहिङ्गुलैर्गरलपिप्पलीटङ्कणैः सुवर्णभवबीजकैः समलवैर्दिनार्धावधि । जयारसविमर्दितैः कनकसुन्दरः सुन्दरि स्मृतो ग्रहणिकाज्वरातिसृतिवह्निमान्द्यापहः ॥१॥ इति कनकसुन्दररसः ॥ अथ शङ्खवटी । चिञ्चाक्षारपलं पटुव्रजपलं निम्बूरसे कल्कितं तस्मिन्शङ्खपलं प्रतप्तमसकृन्निर्वाप्य शीर्णावधि । हिङ्गुव्योषपलं रसामृतबलीन्निक्षिप्य निष्कांशकान् बद्ध्वा शङ्खवटी क्षयग्रहणिकारुक्पक्तिशूलादिषु ॥ १ ॥ इति शङ्खवटी ॥ अथाग्निसूनुरसः । भागो दग्धकपर्दकस्य च तथा शङ्खस्य भागद्वयम् भागो गन्धकसूतयोर्मिलितयोः पिष्टा मरीचादपि । भागस्य त्रितयं नियोज्य सकलं निम्बूरसे चूर्णितं नाम्ना वह्निसुतो रसोऽयमचिरान्मान्द्यं जयेद्दारुणम् ॥ १ ॥ घृतेन खण्डात्सह भक्षितेन क्षीणाक्षरान्ह-

---

१ (च०) स्मृतान् । २ (घ०) कमलजम् । ३ (ग० क०) विनिहितम् ।

स्तिसमान्करोति । समागधीचूर्णवृतेन लीढ्वा नरः प्रमुञ्चेद् ग्रहणीविकाराद् ॥ २ ॥ शोथज्वरारोचकशूलगुल्मान्पाण्डूदराशोंग्रहणीविकारान् । तक्रानुपानो जयति प्रमेहान्युक्त्या प्रयुक्तोऽग्निसुतो रसेन्द्रः ॥ ३ ॥ इत्यग्निसूनुरसः ॥ अथागस्तिसूतराजो रसः ॥ रसबलिसमभागं तुल्यहिङ्गुलयुक्तं द्विगुणकनकबीजं नागफेनेन तुल्यम् । सकलविहितचूर्णं भावयेद्भृङ्गनीरैर्ग्रहणिजलधिशोषे सूतराजो ह्यगस्तिः ॥ १ ॥ त्रिकटुकमधुयुक्तः सर्ववान्तिं च शूलं कफपवनविकारं वह्निमान्द्यं च निद्राम् । घृतमरिचयुतोऽयं गुञ्जमात्रः प्रवाहीं हरति षडतिसाराञ्जीरजातीफलेन ॥ २ ॥ इत्यगस्तिसूतराजो रसः ॥ अथ क्षारताम्ररसः ॥ शङ्खक्षारार्कभूतिं च वराटं लोहभस्मकम् । अयोमलं यवक्षारं टङ्कणक्षारमेव च ॥ १ ॥ त्रिकटुं सैन्धवं तुल्यं भृङ्गतोयेन मर्दयेत् । आटरूषरसैर्मर्द्यमार्द्रकस्वरसेन च ॥ २ ॥ चणमात्रां वटीं कृत्वा रसोऽयं क्षारताम्रकः । श्वासे कासे प्रतिश्याये पुराणज्वरपीडिते ॥ ३ ॥ मन्दाग्नौ ग्रहणीदोषे त्वनुपानं यथोचितम् । सेवयेत्सप्तरात्रेण नाशयेन्नात्र संशयः ॥ ४ ॥ चिरकालानुबन्धे च सेवयेन्मण्डलावधि । तत्तद्व्याधिहरं पथ्यं नियमेन समाचरेत् ॥ ५ ॥ इति क्षारताम्ररसः ॥ इति रसाः ॥

॥ अथ पथ्यम् ॥

मुद्गषष्टिकशाली च आढकी माक्षिकं तथा । छाग्याः पयो दधि घृतं नवनीतं कपित्थकम् ॥ १ ॥ निःसारं दधि गोर्बिल्वं रम्भायाः कुसुमं फलम् । दाडिमं लाजकून्मण्डः शृङ्गाटं क्षुद्रमत्स्यकः ॥ २ ॥ एणतित्तिरलावानां शशानां क्रव्यमेव च । ग्रहण्यामातुरे पथ्यं कथितं मुनिभिर्हितम् ॥ ३ ॥ पिच्छिलानि कठोराणि गुरूण्यम्लानि यानि च । आमकृन्ति न सेव्यानि ग्रहणीरोगिभिः क्वचित् ॥ ४ ॥ इति ग्रहणीचिकित्सा ॥

॥ अथार्शोरोगनिदानम् ॥

पृथग्दोषैः समस्तैश्च शोणितात्सहजानि च । अर्शांसि षट्प्रकाराणि विद्याद्गुदवलित्रये ॥ १ ॥

॥ अथार्शसां स्वरूपमाह ॥

दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः ॥ १ ॥

॥ अथार्शसां हेतुमाह ॥

कषायकटुतिक्तानि रूक्षशीतलघूनि च । प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसे-

---

१ (क० पु०) शृङ्ग भृङ्गी ।

वनम् ॥ १ ॥ लङ्घनं देशकालौ च शीतौ व्यायामकर्म च। शोको वातातपस्पर्शो हेतुर्वातार्शसां मतः ॥ २ ॥ कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः। देशकालावशिशिरौ क्रोधो मद्यमसूयनम् ॥ ३ ॥ विदाहि तीक्ष्णमुष्णं च सर्वं पानान्नभेषजम्। पित्तोल्बणानां विज्ञेयः प्रकोपे हेतुरर्शसाम् ॥ ४ ॥ मधुरस्निग्धशीतानि लवणाम्लगुरूणि च। अव्यायामदिवास्वप्नशय्यासनसुखे रतिः ॥ ५ ॥ प्राग्वातसेवा शीतौ च देशकालावचिन्तनम्। श्लैष्मिकाणां समुद्दिष्टमेतत्कारणमर्शसाम् ॥ ६ ॥ हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्बणानि च। सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणैः समम् ॥ ७ ॥

॥ अथार्शसां पूर्वरूपमाह ॥

विष्टम्भोऽन्नस्य दौर्बल्यं कुक्षेराटोप एव च। कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ॥ १ ॥ ग्रहणीरोगपाण्डुवर्तिराशङ्का चोदरस्य च। पूर्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये ॥ २ ॥

॥ अथ वातार्शसो लक्षणमाह ॥

गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमिचिमान्विताः। म्लानाः श्यावारुणाः स्तब्धा विशदाः परुषाः खराः ॥ १ ॥ मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटिताननाः। बिम्बीकर्कन्धुखर्जूरकार्पासीफलसन्निभाः ॥ २ ॥ केचित्कदम्बपुष्पाभाः केचित्सिद्धार्थकोपमाः। शिरःपार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः ॥ ३ ॥ क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः। कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥ ४ ॥ तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम्। रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ॥ ५ ॥ कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते। गुल्मप्लीहोदराष्ठीलासंभवस्तत एव च ॥ ६ ॥

॥ अथ पित्तार्शोलक्षणम् ॥

पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः। तन्वस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥ १ ॥ शुकजिह्वायकृत्खण्डजलौकावक्त्रसन्निभाः। दाहपाकज्वरस्वेदतृण्मूर्छारतिमोहदाः ॥ २ ॥ सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः। यवमध्या हरित्पीता हारिद्रत्वङ्नखादयः ॥ ३ ॥

॥ अथ कफोल्बणार्शोलक्षणम् ॥

श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः। उत्सन्नोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः ॥ १ ॥ पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः। करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ॥ २ ॥ वङ्क्षणानाहिनः पायुबस्तिनाभ्यवकर्षिणः। सकासश्वासहृल्लासप्रसेका रुचिपीनसाः ॥ ३ ॥ मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः। क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः ॥ ४ ॥

---

१ (घ) भ्रमाः।

वसाभाः सकफाज्यपुरीषाः समवाहिकाः । न स्रवन्ति न भिद्यन्ते पाण्डु स्निग्धत्वगादयः ॥ ५ ॥

॥ अथ त्रिदोषजसहजार्शसोर्लक्षणम् ॥

सर्वैः सर्वात्मकान्याहुर्लक्षणैः सहजानि च ॥ १ ॥

॥ अथ रक्तार्शोलक्षणम् ॥

रक्तोल्बणा गुदे कीलाः पित्ताकृतिसमन्विताः । वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥ १ ॥ तेऽत्यर्थं दुष्टमुष्णं च गाढविट्कप्रपीडिताः । स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥ २ ॥ भेकाभः पीड्यते दुःखैः शोणितक्षयसंभवैः । हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥ विट्श्यावं कठिनं रूक्षमधो वायुर्न गच्छति ॥ ३ ॥

॥ अथ रक्तार्शसि वातादीनामनुबन्धमाह ॥

तनु चारुणवर्णं च फेनिलं चासृगर्शसाम् । कट्यूरुगुदशूलं च दौर्बल्यं यदि वाधिकम् ॥ १ ॥ तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् । शिथिलं श्वेतपीतं च विट्स्निग्धं गुरु शीतलम् ॥ २ ॥ यद्यर्शसां घनं चासृक् तन्तुमत्पाण्डुपिच्छिलम् । गुदं सपिच्छं स्तिमितं गुरु स्निग्धं च कारणम् ॥ श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥ ३ ॥

॥ अथ सर्वशरीरव्यापित्वमाह ॥

पञ्चात्मा मारुतः पित्तं कफो गुदवलित्रये । सर्वे एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥ १ ॥ तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च । सर्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥ २ ॥ बाह्यायां तु वलौ जातान्येकदोषोल्बणानि च । अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥ ३ ॥

॥ अथ कृच्छ्रसाध्यान्याह ॥

द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च । कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ १ ॥

॥ अथासाध्यान्याह ॥

सहजानि त्रिदोषाणि यानि चाभ्यन्तरे[२] वलौ । जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् ॥ १ ॥ शेषत्वादायुषस्तानि चतुष्पादसमन्विते[१] । याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ॥ २ ॥

---

१ (च०) वर्तते । २ (च०) चाभ्यन्तरां वलिम् ।

॥ अथोपद्रवादसाध्यत्वमाह ॥

हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा । शोथो हृत्पार्श्वशूलं च यस्यासाध्यार्शसो हि सः ॥ १ ॥ हृत्पार्श्वशूलसंमोहो छर्दिरङ्गस्य रुग्ज्वरः । तृष्णा गुदस्य पाकश्च निहन्युर्गुदजातुरम् ॥ २ ॥ तृष्णारोचकशूलार्तमतिप्रस्रुतशोणितम् । शोथातीसारसंयुक्तमर्शांसि क्षपयन्ति च ॥ ३ ॥

॥ अथ स्थानान्तरेऽर्शांस्याह ॥

मेण्ढ्रादिष्वपि लक्ष्यन्ते यथास्वं नाभिजानि च । गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च ॥ १ ॥

॥ अथ चर्मकीलप्राप्तिपूर्वकमर्शोलक्षणमाह ॥

व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः । कीलोपमं स्थिरखरं चर्मकीलं तु तं विदुः ॥ १ ॥

॥ अथ तस्यैव वातादिभेदेन लक्षणमाह ॥

वातेन तोदरूक्षत्वं पित्तादसितरक्तता । श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥ १ ॥ अरिवत्प्राणिनो मांसकीलका विवसन्ति यत् । अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः ॥ २ ॥ इत्यर्शोनिदानम् ॥

॥ अथार्शश्चिकित्सां व्याख्यास्यामः ॥

स्नेहः स्वेदादयो वाते पित्ते स्यू रेचनादयः । कफे वान्त्यादयोऽर्शःसु मिश्रे मिश्रा प्रतिक्रिया ॥ पित्तवद्रक्तजे कार्यः प्रतीकारोऽर्शसि ध्रुवम् ॥ १ ॥ अर्शोऽतिसारग्रहणीविकाराः प्रायेण चान्योन्यनिदानभूताः । सन्नेऽनले सन्ति न सन्ति दीप्ते रक्षेदतस्तेषु विशेषतोऽग्निम् ॥ २ ॥ दुर्नाम्नां साधनोपायश्चतुर्धा परिकीर्तितः । भेषजक्षारशस्त्राग्निसाध्यत्वं याप्यमुच्यते ॥ ३ ॥

॥ अथ तिलादिमोदकः ॥

तिलभल्लातकं पथ्या गुडश्चेति समांशकम् । दुर्नामश्वासकासघ्नं प्लीहपाण्डुज्वरापहम् ॥ १ ॥ इति तिलादिमोदकः ॥

॥ अथ मरीच्यादिमोदकः ॥

मरिचमहौषधचित्रकसूरणभागा यथोत्तरं द्विगुणाः । सर्वसमो गुडभागः सेव्योऽयं मोदकः प्रसिद्धफलः ॥ १ ॥ इति मरिचादिमोदकः ॥

॥ अथ प्राणदो मोदकः ॥

[1]तालीसज्वलनोषणाः सचविकास्तुल्या द्विभागा भवेत् कृष्णामूलसमन्विता

१ (च०) गुदास्य ।

त्रिपलिका शुण्ठी चतुर्जातकम् । स्यान्मुष्टिप्रमितं गुडत्रिगुणितैरेभिः कृता मोदकाः कासश्वासमदाग्निमान्द्यगुदजप्लीहप्रमेहापहाः ॥ १ ॥ इति प्राणदो मोदकः ॥

॥ अथ काङ्कायनगुटिका ॥

पथ्यादलस्य पलपञ्चकमेकमेवमेकं पलं तु मरिचादपि जीरकस्य । कृष्णातदुद्भवजटाचविकाग्निशुण्ठ्यः कृष्णादिपञ्चकमिदं पलतः प्रवृद्धम् ॥ १ ॥ पलाष्टभल्लातकसंप्रयुक्तं कन्दस्त्वरुष्करफलाद् द्विगुणः प्रकल्प्यः । स्यैद्यावशूककुडवार्धमतः समस्तैर्योज्यो गुडो द्विगुणितो वटकीकृतश्च ॥ २ ॥ काङ्कायनेन मुनिना वटकः किलायमुक्तः प्रजाहिततमेन गुदामयघ्नः । क्षाराग्निशस्त्रपतनैरपि ये न सिद्धाः सिध्यन्त्यनेन वटकेन गुदामयास्ते ॥ ३ ॥ इति काङ्कायनगुटिका ॥

॥ अथ सूरणमोदकः ॥

चित्रकस्य पलं त्वेकं द्विपलं सूरणस्य च । पलार्धं नागरस्यापि मरिचं कोलमात्रकम् ॥ १ ॥ भल्लातकं कणामूलं विडङ्गं त्रिफला कणा । तालीससहितान्सर्वानक्षमात्रान्प्रयोजयेत् ॥ २ ॥ द्वे पले वृद्धदारस्य तालमूल्याः पलं भवेत् । त्वगेलामरिचांशं च सर्वानेकत्र चूर्णयेत् ॥ ३ ॥ गुडेन मर्दयित्वा तु द्विगुणेनेह बुद्धिमान् । मोदकः सूरणो नाम त्वक्षमात्रः प्रमाणतः ॥ ४ ॥ उपयुक्तो निहन्त्याशु गुदकीलान्न संशयः । अग्निवृद्धिकरः पुंसां सेव्यमानो महागुणः ॥ ५ ॥ अथ द्वितीयः ॥ शुष्कात्सूरणकन्दतोऽर्धमिलितं व्योषं तथा चित्रकं श्रेष्ठाजीरकरामठं समलवं दीप्याजमोदान्वितम् । सर्वस्वाङ्घ्रिकसिन्धुजं परिभवेत्रिम्लुद्रवैर्वासरं सिद्धः सूरणमोदको गदहरः श्रेष्ठो भवेत्प्राणिनाम् ॥ १ ॥ शूलं सङ्ग्रहणीगदं त्वतिसृतिं दुष्टां प्रवाहीं जयेद्दीप्ताग्निं कुरुते बलं वितनुते गुल्मप्रणाशं तथा । अर्शांस्युद्धतमारुतामयहरो बाले च वृद्धे हितो गर्भिण्यां च न शस्यते न निपुणैर्नो रक्तपित्तेऽपि च ॥ २ ॥ इति सूरणमोदकः ॥

॥ अथ सूरणपुटपाकः ॥

मृल्लिप्तं सौरणं कन्दं पक्त्वाऽग्नौ पुटपाकवत् । दद्यात्सतैललवणं दुर्नामविनिवृत्तये ॥ १ ॥ सौरणं कन्दमादाय पुटपाकेन पाचयेत् । सतैलगुडसंयुक्तो रसश्चार्शोविकारनुत् ॥ २ ॥ इति सूरणपुटपाकः ॥

॥ अथ बाहुशालगुडः ॥

इन्द्रवारुणिका मुस्ता शुण्ठी दन्ती हरीतकी । त्रिवृत्सटी विडङ्गानि गोक्षुरश्चित्रकस्तथा ॥ १॥ तेजोह्वा च द्विकर्षाणि पृथग् द्रव्याणि कारयेत् । सूरणस्य पलान्यष्टौ वृद्धदारश्चतुष्पलम् ॥ २ ॥ चतुष्पलं स्याद्भल्लातं क्वाथयेत्सर्वमेकतः । जलद्रोणे

---

१ (ग० ङ० छ०) पलाद् । २ (ग० च० छ०) सयाव । ३ (ग० ङ०) समस्तयोमो । (च०) समस्ताद्योज्यो । ४ (छ०) गुडाद्विगु० । ५ (ग० च०) मरीचांशे । छ० मरिचांशेन । ६ (ग० च०) फलम् ।

चतुर्थांशं गृह्णीयात्क्वाथमुत्तमम् ॥ ३ ॥ क्वाथ्यद्रव्यात्रिगुणितं गुडं क्षिप्त्वा पुनः पचेत् । सम्यक् पक्वं च तं ज्ञात्वा चूर्णान्येतानि दापयेत् ॥ ४॥ चित्रकस्त्रिवृता दन्ती तेजोह्वा पलिकाः पृथक् । पृथक् त्रिपलिकाः कार्या व्योषैलामरिचत्वचः ॥ ५ ॥ निक्षिपेन्मधु शीते च तस्मिन्प्रस्थप्रमाणकम् । एवं सिद्धो भवेच्छ्रीमान्बाहुशालो गुडः शुभः ॥ ६ ॥ जयेदर्शांसि सर्वाणि गुल्मान्वातोदरं तथा । आमवातं प्रतिश्यायं ग्रहणीक्षयपीनसान् । हलीमकं पाण्डुरोगं प्रमेहे च रसायनम् ॥ ७ ॥ इति बाहुशालगुडः ॥

॥ अथागस्तिमोदकः ॥

हरीतकीनां त्रिपलं त्रीण्याम्राणि कटुत्रिकम् । त्वक्पत्रकं चार्धपलं गुडस्याष्टपलं मतम् ॥ १ ॥ अगस्तिमोदकानेतान्कल्पितान्परिभक्षयेत् । शोफार्शोग्रहणीदोषकासोदावर्तनाशनान् ॥ २ ॥ इत्यगस्तिमोदकः ॥

॥ अथ लघुसूरणमोदकः ॥

कणामरीचविश्वाग्निसूरणैस्तु गुडैः क्रमात् । द्विगुणैर्मोदकोऽर्शोघ्नः परं पाचनदीपनः ॥ १ ॥ इति लघुसूरणमोदकः ॥

॥ अथ बृहद्भल्लातकलेहः ॥

सुपक्वभल्लातफलानि सम्यग् द्विधा विधायाढकसंमितानि । विपाच्य तोयेन चतुर्गुणेन चतुर्थशेषे व्यपनीय तानि ॥१॥ पुनः पचेत्क्षीरचतुर्गुणेन घृतांशयुक्तेन घनं यथा स्यात् । सितोपला षोडशभिः पलैश्च विमर्द्य संस्थाप्य दिनानि सप्त ॥ २ ॥ ततः प्रयोज्याग्निबलेन मात्रां जयेद्विकारानखिलान्गुदोत्थान् । कचान्सुनीलान्घनकुञ्चिताग्रान्सुपर्णदृष्टिं च शशाङ्ककान्तिम् ॥ ३ ॥ जवं हयानां बलमुत्तमं च स्वरं मयूरस्य हुताशदीप्तिम् । स्त्रीवल्लभत्वं विविधप्रभावं नीरोगतां द्वित्रिशतायुषं च ॥ ४ ॥ न चान्नपाने परिहार्यमस्ति न चातपे नाध्वनि मैथुने च । प्रयोगकाले सकलामयानां राजाधिराजा च रसायनानाम् ॥ ५ ॥ इति बृहद्भल्लातकलेहः ॥

॥ अथार्शसि शर्करासवः ॥

दुरालभायाः प्रस्थस्य चित्रकस्य वृषस्य च । पथ्यामलकयोश्चैव पाठाया नागरस्य च ॥ १ ॥ दद्याद्द्विपलिकान्भागाञ्जलद्रोणे विपाचयेत् । पादशेषे रसे पूते सुशीते शर्कराशतम् ॥ २ ॥ दत्त्वा कुम्भे दृढे स्थाप्यं मासार्धं घृतभाजने । प्रलिप्ते पिप्पलीचव्यप्रियङ्गुमधुसर्पिषा ॥ ३ ॥ तस्य मात्रां पिबेत्काले शार्करस्य यथाबलम् । अर्शांसि ग्रहणीरोगमुदावर्तमरोचकम् ॥ ४ ॥ शकृन्मूत्रानिलोद्गारविबन्धानग्निमार्दवम् । हृद्रोगं पाण्डुरोगं च सर्वरोगान्प्रणाशयेत् ॥ ५ ॥ इति शर्करासवः ॥

---

१ (ग० क च० छ०) क्वाथ ।

॥ अथ द्राक्षासवः ॥

द्राक्षापलशतं दत्वा चतुर्द्रोणेऽम्भसः पचेत् । द्रोणशेषे रसे तस्मिन्पूतशेषे प्रदापयेत् ॥ १ ॥ शर्करायास्तुलां दत्वा तत्तुल्यं मधुनस्तथा । पलानि सप्त धातक्याः स्थापयेदाज्यभाजने ॥ २ ॥ जातीलवङ्गकक्कोललवलीफलचन्दनैः । कृष्णा त्रिगन्धसंयुक्ता भागैरर्धपलांशकैः ॥ ३ ॥ त्रिःसप्ताहाद्भवेत्पेयं तत्र मात्रा यथाबलम् । नाम्ना द्राक्षासवो ह्येष नाशयेद्गुदकीलकान् ॥४॥ शोषारोचकहृत्पाण्डुरक्तपित्तभगन्दरान् । गुल्मोदरकृमिग्रन्थिक्षतशोषज्वरान्तकृत् ॥ वातपित्तप्रशमनः शस्तश्च बलवर्णकृत् ॥ ५ ॥ इति द्राक्षासवः

॥ अथ समशर्करचूर्णम् ॥

शुण्ठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात् । खादेदिदं समसितं गुदजाग्निमान्द्यगुल्मोदरश्वयथुपाण्डुगुदोद्भवेषु ॥ १ ॥ इति समशर्करचूर्णम् ॥

॥ अथ व्योषाद्यं चूर्णम् ॥

व्योषाग्न्यरुष्करविडङ्गतिलाभयानां चूर्णं गुडेन सहितं सततं प्रयोज्यम् । दुर्नामशोफगरकुष्ठशकृद्विबन्धमग्नेर्जयत्यबलतां कृमिपाण्डुतां च ॥ १ ॥ चूर्णे चूर्णसमो देयो मोदके द्विगुणो गुडः । गुडव्योषवरावेल्लतिलारुष्करचित्रकैः ॥ अर्शांसि हन्ति गुटिका त्वग्निकरी च शीलिता ॥ २ ॥ गुडेन शुण्ठीमथवोपकुल्यां पथ्यां तृतीयामथ दाडिमं च ॥ आमेष्वजीर्णेषु गुदामयेषु वर्चोविबन्धेषु च नित्यमद्यात् ॥ ३ ॥ शर्करया युतसूरणकन्दः कुञ्जरकेसरमेव तथान्यत् ॥ क्षौद्रयुतं नवनीतमथो वा सूदनकारणमर्शस एव ॥ ४ ॥ समूलपत्रकोकम्बं पलद्वयमितं शुभम् । भल्लातफलमज्जाया मरीचस्य पलं पलम् ॥५॥ एतच्चूर्णीकृतं सूक्ष्मं भक्षयेत्कर्षसंमितम् । अर्शोऽङ्कुरान्निहन्त्याशु सबाह्याभ्यन्तरानपि ॥ ६ ॥ दुःस्पर्शकेन बिल्वेन यवान्या नागरेण वा । एकैकेनापि संयुक्ता पाठा हन्त्यर्शसां रुजम् ॥ ७ ॥ अपामार्गस्य बीजानां कल्कं तण्डुलवारिणा । पीतं रक्तार्शसां नाशं कुरुते नात्र संशयः ॥ ८ ॥ चन्दनकिराततिक्तकधन्वयवासाः सनागराः क्वथिताः । रक्तार्शसां प्रशमना दार्वीत्वगुशीरनिम्बाश्च ॥ ९ ॥ विड्विबन्धे हितं तक्रं यवानीविश्वसंयुतम् । न प्ररोहन्ति गुदजाः प्रायस्तक्रसमन्विताः ॥ १० ॥ यो जातो गोरसः क्षीराद्वह्निमूलावचूर्णितात् । पिबंस्तमेव तेनैव भुञ्जानो गुदजाङ्कुरान् ॥ ११ ॥ पिबेदहरहस्तक्रं निरन्नो वा सकामतः । सप्ताहं वा दशाहं वा मासार्धं मासमेव च ॥ १२ ॥ बलकालविकारज्ञो भिषक् तं च प्रयोजयेत् । हरीतकीं तक्रयुतां त्रिफलां वा प्रयोजयेत् ॥ १३ ॥ चित्रकं हपुषां

१ (ग० घ० छ०) मात्राम् । २ (ग० ङ० च०) गदोद्भवेषु । ३ (ग० ङ० च० छ०) त्वग्निकारं च । ४ (ग० ङ० च० छ०) केसर ।

हिङ्गु दद्याद्वा तक्रसंयुतम्। पञ्चकोलकयुक्तं वा तक्रेणैव प्रदापयेत् ॥ १४ ॥ त्वचं चित्रकमूलस्य पिष्ट्वा कुम्भं प्रलेपयेत्। तक्रं वा दधि वा तत्र जातमर्शोहरं पिबेत्। तक्रेणार्शांसि हन्यन्ते मुसलीकटुकाग्निना ॥१५॥ अरलुत्वगग्निसमुरेन्द्रयवाग्निरिबिल्वससैन्धवशुण्ठियुतान्। मथितेन पिबेद्यदि सप्तदिनं गुदजानि पतन्ति समूलबलात् ॥१६॥

॥ अथ हपुषादितक्रारिष्टः ॥

हपुषा कुञ्चिका धान्यमजाजी कारवी सटी। पिप्पली पिप्पलीमूलं चित्रको गजपिप्पली ॥ १ ॥ यवानी चाजमोदा च तच्चूर्णं तक्रसंयुतम्। मन्दाम्लकटुकं विद्वांस्थापयेद्घृतभाजने ॥ २ ॥ व्यक्ताम्लं कटुकं जातं तक्रारिष्टं कटुप्रियम्। प्रपिबेन्मात्रया काले त्वन्नस्य तृषितस्तृषा ॥ ३ ॥ दीपनं रोचनं वर्ण्यं कफवातानुलोमनम्। गुदश्वयथुकण्ड्वार्तिनाशनं बलवर्धनम् ॥ ४ ॥ इति हपुषादितक्रारिष्टः ॥

॥ अथ घृतानि ॥

चव्यं त्रिकटुकं पाठा क्षारं कुस्तुम्बरूणि च। यवानी पिप्पलीमूलमुभे च बिडसैन्धवे ॥ १ ॥ चित्रकं बिल्वमभयां पिष्ट्वा सर्पिर्विपाचयेत्। सकृद्वातानुलोमार्थं जाते दधिचतुर्गुणे ॥ २ ॥ प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम्। गुदवङ्क्षणशूलं च घृतमेतद्व्यपोहति ॥ ३ ॥ इतिचव्यादिघृतम् ॥ अथ शुण्ठीघृतम् ॥ त्रिंशत्पलानि शुण्ठीनां जलद्रोणे विपाचयेत्। तेन पादावशेषेण कल्के तासां पचेद्घृतम् ॥ १ ॥ दुर्नामश्वासकासघ्नं प्लीहपाण्ड्वामयापहम्। विषमज्वरशान्त्यर्थं तृष्णारोचकनाशनम् ॥ २ ॥ शुण्ठीघृतमिदं ख्यातं कृष्णात्रेयेण पूजितम्। नागरेण जले पक्वं वस्तिकुक्षिगदापहम् ॥ ३ ॥ इत्यर्शसि शुण्ठीघृतम् ॥ अथ लघुचव्यादिघृतम् ॥ चव्यतिक्ताकलिङ्गानि शताह्वा लवणानि च। सर्पिरर्शोविकारघ्नं ग्रहणीदीपनं परम् ॥ १ ॥ इति लघुचव्यादिघृतम् ॥ अथ ह्रीबेरादिघृतम् ॥ ह्रीबेरमुत्पलं लोध्रं समङ्गाचव्यचन्दनम्। पाठा सातिविषा बिल्वं धातकी देवदारु च ॥ १ ॥ दार्वीत्वङ्नागरं मांसी मुस्तं क्षारो यवाग्रजः। चित्रकश्चेति पेष्याणि चाङ्गेरीस्वरसे घृतम् ॥ २ ॥ एकत्र साधयेत्सर्वं तत् सर्पिः परमौषधम्। अर्शोतिसारग्रहणीपाण्डुरोगे ज्वरेऽरुचौ ॥३॥ मूत्रकृच्छ्रे गुदभ्रंशे वस्त्यानाहप्रवाहिके। पिच्छास्रावेऽर्शसां शूले योज्यमेतत्त्रिदोषहृत् ॥ ४ ॥ इति ह्रीबेरघृतम् ॥ इति घृतानि ॥

॥ अथ लेपः ॥

आर्कं पयः सुधाकाण्डं कटुकालाबुपल्लवाः। करञ्जो बस्तमूत्रेण लेपनं श्रेष्ठमर्शसाम् ॥ १ ॥ सिन्धूत्थं देवदाल्याश्च बीजं काञ्जिकपेषितम् ॥ गुदाङ्कुरान्प्रलेपेन पातयत्यचलानपि ॥ २ ॥ कृष्णाशिरीषबीजार्कक्षीरैः सामरसैन्धवैः। हरिद्रा भक्षविट् गुञ्जा गोमूत्रे पिप्पलीयुतैः ॥ ३ ॥ एतल्लेपत्रयं योज्यं शीघ्रमर्शोविनाशनम्। ज्योति-

१ (क० ख० ग०) निघ्नन्ति। २ (च० छ०) शकृत्। ३ (च०) जले।

ष्कावीजकल्केन लेपो रक्तार्शसां हितः ॥ ४ ॥ कोशातकीरजोघर्षान्निपतन्ति गुदोद्भवाः। निशाकोशातकीचूर्णं स्नुकूपयःसैन्धवान्वितम् । गोमूत्रेण समायुक्तं लेपो दुर्नामनाशनः ॥ ५ ॥ इति लेपः ॥

॥ अथ धूपः ॥

नृकेशाः सर्पनिर्मोको वृषदंशस्य चर्म च । अर्कमूलं शमीपत्रमर्शोभ्यो धूपनं हितम् ॥ १ ॥ रालचूर्णस्य तैलेन सार्षपेण युतस्य च । धूमदानेन युक्त्यार्शोरक्तस्रावो निवर्तते ॥ २ ॥ गोधूमपिष्टं पलमेव हिङ्गु शाणार्धमारुष्करमब्धिसङ्ख्यम् ॥ स्याद्धूपदानाद्गुदशूलनाशः स्यात्सन्निपातो* गुदसंभवानाम् ॥ ३ ॥ इति धूपः ॥

॥ अथ रसाः ॥

विषरविगगनायःसूतगन्धं समांशं समहुतभुगथार्द्रं कन्दकैः सप्तवारम् । प्रबलगुदजकीलं हन्ति नित्योदितोऽसौ नलहतिमलबन्धे मुद्गमात्रः ससर्पिः ॥१॥ इति नित्योदितो रसः ॥ अथार्शःकुठारो रसः ॥ भागः शुद्धरसस्य भागयुगुलं गन्धस्य लोहाभ्रयोः षड्बिल्वाग्निहलोषणाभयरजोदन्ती च भागैः पृथक् । पञ्च स्युः स्फुटटङ्कणस्य च यवक्षारस्य सिन्धूद्भवाद्भागाः पञ्च गवां जलं सुविमलं द्वात्रिंशदेतत्पचेत् ॥ स्नुग्दुग्धं च गवां जलावधि शनैः पिण्डीकृतं तद्भवेद्द्वौ माषौ गुदकीलकानतुजटाच्छेदे कुठारो रसः ॥ १ ॥ इत्यर्शःकुठारो रसः ॥ इति रसाः ॥

॥ अथ पथ्यापथ्यम् ॥

कुलित्था यवगोधुमाः शालयो रक्तभा हिताः । पुनर्नवा सूरणं च तक्रं धात्री कपित्थकम् ॥१॥ नवनीतं तु वास्तूकं पटोलं मरिचं तथा । मृगमांसमजादुग्धं वृन्ताकं काञ्जिकं तथा ॥ २ ॥ अर्शोरोगे तु पथ्यानि मुनिभिः कथितानि तु । वेगावरोधः स्त्रीपृष्ठयानमुत्कटकासनम् । यथास्वं दोषलं चान्नमर्शसः परिवर्जयेत् ॥ ३ ॥ इत्यर्शश्चिकित्सा समाप्ता ॥

॥ अथाग्निमान्द्यम् ॥

तत्र सन्निकृष्टनिदानपूर्वकोदराग्निविकारानाह ।

मन्दस्तीक्ष्णोऽथविषमः समश्चेति चतुर्विधः । कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥ १ ॥

॥ अथ समविषमाद्यग्निलक्षणान्याह ॥

समा समाग्नेरशिता मात्रा सम्यग्विपच्यते । स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु दे-

---

* सन्निपातः = पतनम् ।

१ (ग० छ०) भल्लातकवेदयुक्तः । २ (ख०) नित्यादित्यो रसः । ३ (च०) कीलकद्रुमजटा । ४ (घ०) यथादोषं चान्नपानम् ।

भिन्नः ॥ कदाचित्पच्यते सम्यक्कदाचिन्नैव पच्यते ॥ १ ॥ मात्रातिमात्राप्यशिता सुखं यस्य विपच्यते । तीक्ष्णाग्निरिति तं विद्यात्समाग्निः श्रेष्ठ उच्यते ॥ २ ॥ विषमो वातजान्रोगांस्तीक्ष्णः पित्तनिमित्तजान् ॥ करोत्यग्निस्तथा मन्दो विकारान्कफसंभवान् ॥ ३ ॥

॥ अथैषां चिकित्सामाह ॥

समस्य रक्षणं कार्यं विषमे वातनिग्रहः । तीक्ष्णे पित्तप्रतीकारो मन्दे श्लेष्मविशोधनम् ॥ १ ॥ सममग्निं भिषग् रक्षेदन्नपानैर्नृणां हितैः । मन्दं संवर्धयेदग्निं कटुतिक्तकषायकैः ॥२॥ तीक्ष्णमग्निं दधिक्षीरपायसैः समतां नयेत् । स्नेहाम्ललवणाद्यैश्च विषमाग्निमुपाचरेत् ॥ ३ ॥ जरणरुचकशुण्ठीपिप्पलीतीक्ष्णवेल्लं सुलवणमजमोदाहिङ्गुपथ्येतिकर्षम् । पृथगथ पलमात्रं स्यात्त्रिवृच्चूर्णमेषां जननमुदरवह्नेः पाचनं रेचनं च ॥ ४ ॥ इत्यग्निमान्द्यम् ॥

॥ अथ भस्मकलक्षणमाह ॥

कफे क्षीणे यदा पित्तं स्वस्थाने मारुतानुगम् । तीव्रं प्रवर्तयत्यग्निं तदा तं भस्मकं वदेत् ॥ १ ॥ कट्वादिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ । अतिप्रवृद्धः पवनान्वितोऽग्निः क्षणाद्रसं शोषयति प्रसह्य ॥ २ ॥ भुक्तं क्षणाद्भस्म करोति यस्मात्तस्मादयं भस्मकसंज्ञकोऽभूत् । तृड्दाहमूर्छाभ्रमकासशोफविट्शोषमोहश्रमकर्मकारी ॥ ३ ॥ तृड्दाहश्वासकासादीन्कृत्वान्यानग्निसम्भवान् । पक्त्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेद्ध्रुवम् ॥ ४ ॥

॥ अथ चरकपाठे भस्मकः ॥

नरे क्षीणकफे पित्तं कुपितं मारुतानुगम् । सोष्मणः पाचकस्थाने बलमग्नेः प्रयच्छति ॥१॥ तदा लब्धबलो देहं रूक्षयेत् सोऽनिलोऽनलम् । अभिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः ॥२॥ पक्त्वान्नं स ततो धातूञ्छोणितादीन्पचत्यपि । ततो दौर्बल्यमातङ्कं मृत्युं चोपनयेत्परम् ॥३॥ भुक्ते न लभते शान्तिं जीर्णमात्रे प्रशाम्यति । तृड्दाहकासमोहाः स्युर्व्याधयोऽत्यग्निसम्भवाः ॥ ४ ॥

॥ अथाजीर्णनिदानम् ॥

अविपक्वोऽग्निमान्द्येन यो रसः स निगद्यते । रोगाणां प्रथमो हेतुः सर्वेषामामसंज्ञया ॥ १ ॥ आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ २ ॥ अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च । वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥ ३ ॥

॥ अथ तेषां कारणमाह ॥

ग्लानिगौरवविष्टम्भभ्रममारुतमूढताः । विबन्धोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्ष-

णम् ॥ अजीर्णाज्जायते रोगस्तस्माद्रक्षेदजीर्णकात् ॥ १ ॥ अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात्स्वप्नविपर्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥ २ ॥ ईर्ष्याभयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन। प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् पचते नरस्य ॥ ३ ॥ मात्रया चाप्यवहृतं पथ्यं चान्नं न जीर्यते। चिन्ताशोकभयक्रोधदुःखशय्याप्रजागरैः ॥ ४ ॥ तत्रामे गुरुतोत्क्लेदः शोफो गण्डाक्षिकूटयोः। उद्गारश्च यथाभुक्तमविदग्धः प्रवर्तते ॥ ५ ॥ विदग्धे भ्रमतृण्मूर्छाः पित्ताच्च विविधा रुजः। उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते ॥६॥ विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः। मलवाताप्रवृत्तिश्च मोहः स्तम्भोऽङ्गपीडनम् ॥ ७ ॥

॥ अथ रसशेषलक्षणमाह ॥

उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य। रसावशेषेण चतुर्थमेतत्कचित्त्वजीर्णं प्रवदन्ति तज्ज्ञाः ॥ १ ॥ रसशेषेऽन्नविद्वेषो हृदयाशुद्ध्यरोचकौ। मूर्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ॥ २ ॥ उपद्रवा भवन्त्येते मरणं चात्यजीर्णतः। यावत्सन्तिष्ठते तस्य दुष्टोऽप्यन्नरसो हृदि ॥ तावन्मर्माणि भिद्यन्ते विषं पीतवतो यथा ॥ ३ ॥ अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः। रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ ४ ॥ स्वल्पं यदा दोषविबद्धमामलीनं न तेजःपथमावृणोति। भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति ॥ ५॥ प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम्। तन्मूलो रोगसङ्घातस्तद्विनाशाद्विनश्यति ॥ ६ ॥

॥ अथाजीर्णोपद्रवानाह ॥

अजीर्णमामं विष्टब्धं विदग्धं यदुदीरितम्। विषूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥ १ ॥ अथ विषूचीमाह ॥ सूचिभिरिव गात्राणि तुदन्सन्तिष्ठतेऽनिलः। यस्यामजीर्णात्सा वैद्यैर्विषूचीति निगद्यते ॥ १ ॥ न तां परिमिताहारा लभन्ते विदितागमाः। मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥ २ ॥ मूर्छातिसारो वमथुः पिपासा शूलभ्रमोद्वेष्टनजृम्भदाहाः। वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥ ३ ॥ अथालसकमाह ॥ कुक्षिरानह्यतेऽत्यर्थं मुह्यते परिकूजति। निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥ १ ॥ वातवर्चोनिरोधस्तु तस्यात्यर्थं भवेदपि। तस्यालसकमाचष्टे तृष्णोद्गारौ तु यस्य हि ॥२॥ अथ विलम्बिकामाह ॥ दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्ध्वमधश्च यस्य। विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः ॥ १ ॥ अथाजीर्णजन्यामस्य कार्यान्तरमाह ॥ यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः। दोषेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च ॥१॥ विषूच्यलसयोरसाध्यत्वमाह ॥ यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितो-

---

१ (ख०) रुग्दैन्य।

ऽभ्यन्तरयातनेत्रः। क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरोऽसौ पुनरागमाय ॥ १ ॥ निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञिता । अमी ह्युपद्रवा घोरा विषूच्याः पञ्च दारुणाः ॥ २ ॥ अथ जीर्णाहारलक्षणमाह ॥ उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः। लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ ३ ॥ इत्यजीर्णनिदानम्॥

॥ अथाजीर्णचिकित्सितं व्याख्यास्यामः ॥

प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम् । तन्मूलो रोगसङ्घातस्तद्विनाशाद्विनश्यति ॥ १ ॥ तत्रामे वमनं कार्यं विदग्धे लङ्घनं हितम् । विष्टब्धे स्वेदनं शस्तं रसे शेषे शयीत च ॥ २ ॥ वचालवणतोयेन वान्तिरामे प्रशस्यते । धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः । आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनम् ॥ ३ ॥ अन्नं विदग्धं[1] तु नरस्य शीघ्रं शीताम्बुना वै परिपाकमेति । तदास्य शैत्येन निहन्ति पित्तमाक्लेदिभावाच्च नयत्यधस्तात् ॥ ४ ॥ विष्टब्धे स्वेदनं कार्यं पेयं च लवणोदकम् । रसशेषे दिवा स्वापं लङ्घनं वातवर्जनम् ॥ ५ ॥ एरण्डतैले प्रविपाच्य पथ्यां खादेत्तदेवानु पिबेच्च तैलम् । स शूलविष्टम्भकृतान्विकारान् सर्वाञ्जयेत्पित्तकफानिलोत्थान् ॥६॥ आलिप्य जठरं प्राज्ञो हिङ्गुत्र्युषणसैन्धवैः । दिवा स्वापं प्रकुर्वीत सर्वाजीर्णप्रणाशनम् ॥ ७ ॥ व्यायामप्रमदाध्ववाहनरतान् क्लान्तानतीसारिणः शूलश्वासवतस्तृषापरिगतान्हिक्कामरुत्पीडितान् । क्षीणान् क्षीणकफाञ्शिशून्मदहतान्वृद्धांस्तथाजीर्णिनो रात्रौ जागरितान्नरान्निरशनान्कामं दिवा स्वापयेत् ॥ ८ ॥

॥ अथ चूर्णानि ॥

पथ्यापिप्पलिसंयुक्तं चूर्णं सौवर्चलं पिबेत् । मस्तुनोष्णोदकेनाथ मत्वा दोषगतिं भिषक् ॥ १ ॥ चतुर्विधमजीर्णं च मन्दानलमथारुचिम् । आध्मानं वातगुल्मं च शूलं चाशु विनाशयेत् ॥ २ ॥ इति पथ्यादिचूर्णम् ॥ सिन्धूत्थपथ्यमगधोद्भववह्निचूर्णमुष्णाम्बुना पिबति यः खलु नष्टवह्निः । तस्यामिषेण सघृतेन सहान्नपानं भस्मीभवत्यशितमात्रमपि क्षणेन ॥ १ ॥ इति लघुवैश्वानरचूर्णम् ॥ अथ हिङ्ग्वादिचूर्णम् ॥ त्रिकटुकमजमोदासैन्धवं जीरके द्वे समचरणकृतानामष्टमो हिङ्गुभागः । प्रथमकवलभोजी सर्पिषा चूर्णमेतज्जनयति जठराग्निं वातगुल्मं निहन्ति ॥ १ ॥ अन्यच्च । कर्षं हिङ्गु द्विकर्षं विडमथ मरिचं सैन्धवं विश्वकृष्णादीप्याजीराजमोदासितजरणबिभीताभया वेदकर्षाः । अष्टौ मार्कण्डिधात्र्योरथ बदरकपित्थोद्भवाः षोडश स्युः सर्वं लुङ्गोदकार्द्रं हरति रुचिवधाध्माविबन्धाग्निसादान् ॥१॥ इति हिङ्ग्वादिचूर्णम् ॥ अथ लवणभास्करचूर्णम् ॥ पिप्पली पिप्पलीमूलं धान्यकं कृष्णजीरकम् । सैन्धवं च बिडं चैव पत्रतालीसकेसरान् ॥ १ ॥ एषां द्विपलकान् भागान् पञ्च सौवर्चलस्य च ।

---

1 (ख० ग० घ०) विदग्धस्य ।

मरीचाजाजिशुण्ठीनामेकैकस्य पलं पलम् ॥ २ ॥ त्वगेला चार्धभागा स्यात्सामुद्रं कुडवद्वयम् । दाडिमं कुडवं चैव द्विपलं चाम्लवेतसम् ॥ ३ ॥ एतच्चूर्णीकृतं श्लक्ष्णं गन्धाढ्यममृतोपमम् । लवणं भास्करं नाम भास्करेण विनिर्मितम् ॥ ४ ॥ श्लेष्मवातं वातगुल्मं शूलं मन्दाग्न्यरोचकम् । अन्यानपि निहन्त्याशु रोगांल्लवणभास्करः ॥५॥

॥ अथाग्निमुखचूर्णम् ॥

हिङ्गुभागो भवेदेको वचा च द्विगुणा भवेत् । पिप्पली त्रिगुणा ज्ञेया शृङ्गबेरं चतुर्गुणम्॥१॥यवानिका पञ्चगुणा षड्गुणा च हरीतकी । चित्रकः सप्तगुणितः कुष्ठं चाष्टगुणं भवेत् ॥२॥ एतद्वातहरं चूर्णं पीतमात्रं प्रसन्नया । पिबेद्दध्ना मस्तुना वा सुरया कोष्णवारिणा ॥ ३ ॥ सोदावर्तमजीर्णं च प्लीहानमुदरं तथा । अङ्गानि यस्य शीर्यन्ते विषं वा येन भक्षितम् ॥ ४ ॥ अर्शोहरो दीपनश्च शूलघ्नो गुल्मनाशनः । कासं श्वासं निहन्त्याशु तथैव क्षयनाशनः॥ ५ ॥ चूर्णो ह्यग्निमुखो नाम्ना न कश्चित्प्रतिहन्यते ॥ ६ ॥ अथ सामुद्राद्यं चूर्णम् ॥ सामुद्रसौवर्चलसैन्धवानां क्षारो यवानामजमोदकं च । हरीतकीपिप्पलिशृङ्गबेरं हिङ्गु विडङ्गं च समानि दद्यात् ॥ १ ॥ संचूर्ण्य चैतानि घृतप्लुतानि भुञ्जीत चादौ कवलानि पञ्च । अजीर्णवातं गुदगुल्मवातं वातप्रमेहं विषमं च वातम् ॥ विषूचिकाकामलपाण्डुरोगान् श्वासं च कासं च जयेदवश्यम् ॥ २ ॥ अथ व्योषाद्यं चूर्णम् ॥ व्योषैलाहिङ्गुभार्गीबिडलवणयवक्षारपाठायवानीचिञ्चात्वग्भस्मचव्यं दहनकरिकणात्वक्पटुग्रन्थ्यजाजी । एतच्चूर्णं घृताढ्यं त्रिदिवसमशनाद्धन्यते रोगजातं विश्वं वैश्वानरोऽसौ दहति सरभसं किं पुनर्भुक्तमन्नम् ॥ १ ॥ इति चूर्णानि ॥

॥ अथ गुटिकाः ॥

विडङ्गं नागरं कृष्णा पथ्या वह्निर्विभीतकः । वचा गुडूची भल्लातं विषं चात्र प्रयोजयेत् ॥ १ ॥ एतानि समभागानि गोमूत्रेणैव पेषयेत् । गुञ्जाभा गुटिकाः कार्या दद्यादार्द्रकजै रसैः ॥ २ ॥ एकामजीर्णयुक्तस्य द्वे विषूच्यां प्रदापयेत् । तिस्रो भुजङ्गदष्टस्य चतस्रः सन्निपातिनः ॥ गुटिका जीवनी नाम्ना संजीवयति मानवम्॥३॥ इति संजीवनीगुटिका ॥ अथ धनञ्जयवटी ॥ जीरकं चित्रकं चव्यं सप्तगन्धं वचात्वचौ । एलाकर्चूरहपुषा कारवी नागकेसरम् ॥ १ ॥ पृथक् कर्षमिता ह्येते मिश्रीकर्षार्धसंमिता । यवानी पिप्पलीमूलं स्वर्जिका च हरीतकी ॥ २ ॥ जातीफलं लवङ्गं च पृथक्कर्षयुगं मतम् । धान्यकं चित्रकं चापि कर्षत्रयमितं पृथक् ॥ ३ ॥ कृष्णा पलप्रमाणा स्यात्पलमानं तु रौमकम् । मरीचात्पिचवः सप्त त्रिवृन्मूलात्पलद्वयम् ॥ ४ ॥ पृथग्दशाक्षं सामुद्रं सैन्धवं नागरं तथा । शरावसंमितं चुक्रं तदर्धं तिन्तिणीफलम् ॥ ५ ॥ धनञ्जयवटी ह्येषा धनञ्जयविवर्धनी ।

---

१ (च०) कुर्यात् । २ (च०) विभीतकाः । ३ (च०) मिशो । ४ (ख०) पत्रकम् । ५ (च० ख०) रामठम् ।

अजीर्णं जरयत्याशु शूलमुन्मूलयेद्द्रुतम् ॥ ६ ॥ हरेद्विबन्धसंबन्धमाध्मानं कर्षयत्यपि । ग्रहण्या निग्रहं कुर्याद्रचयेद्रुचिमुत्तमाम् ॥ ७ ॥ इति धनञ्जयवटी ॥ अथ शङ्खवटी रसार्णवतः ॥ चिञ्चाश्वत्थस्नुहीक्षारादपामार्गार्कतस्तथा । लवणं पञ्च संग्राह्य ततो लवणपञ्चकम् ॥ १ ॥ सैन्धवाद्यं समादाय सर्वमेतत्पलद्वयम् । द्वौ द्वौ कर्षौ पृथक्कार्यौ तथा द्वौ शङ्खचूर्णतः ॥२॥ कर्षं कर्षं विषं गन्धं रसं टङ्कणमेव च । हिङ्गुपिप्पलिशुण्ठीनां तथा मरिचजीरयोः॥३॥ फलत्रयाच्च कर्षैकं द्विकर्षं तु लवङ्गतः । एतत्सर्वं समासाद्य श्लक्ष्णचूर्णीकृतं शुभम् ॥ ४ ॥ भावयेदम्लयोगेन सप्तधा च प्रयत्नतः । रसः शङ्खवटी नाम्ना सेवितः सर्वरोगजित् ॥ ५ ॥ गुञ्जामात्रमिदं खादेद्वह्निदीपनपाचनम् । अजीर्णं वातसम्भूतं पित्तश्लेष्मभवं तथा । विषूचीं शूलमानाहं हन्यादत्र न संशयः ॥ ६ ॥ इति शङ्खवटी ॥ अथ द्वितीया शङ्खवटी ॥ चिञ्चाक्षारपलं पटुव्रजपलं निम्बुद्रवे कल्कितं तस्मिन्शङ्खपलं प्रतप्तमसकृन्निर्वाप्य शीर्णावधि । हिङ्गुव्योषपलं रसामृतबलीन्निक्षिप्य निष्कांशकान्बद्ध्वा शङ्खवटी ज्वरग्रहणिकारुक्पक्तिशूलादिषु॥१॥ इति गुटिकाः ॥

॥ अथामृतहरीतकी ॥

तक्रे समुत्स्वेद्य शिवाशतानि तद्बीजमुद्धृत्य च कौशलेन । षडूषणं पञ्च पटूनि हिङ्गुक्षारावजाजीमजमोदकं च ॥ १ ॥ षडूषणादेस्त्रिवृदर्धभागा गणस्य देयाम्बरगालितस्य । विभाव्य चुक्रेण रजांस्यमीषां क्षिपेच्छिवाबीजनिवासगर्भे ॥ २ ॥ समूह्य घर्मे च विशोष्य तासां हरीतकीमन्यतमां निषेवेत् । अजीर्णमन्दानलजाठरामयान्सगुल्मशूलग्रहणीगुदाङ्कुरान् ॥ विबन्धमानाहरुजो जयत्यसौ तथामवातांस्त्वमृताहरीतकी ॥ ३ ॥ इत्यमृतहरीतकी ॥

॥ अथावलेहः ॥

विडङ्गभल्लातकचित्रकाभयाः सनागरास्तुल्यगुडेन सर्पिषा । अश्नन्ति ये मन्दहुताशना नरा भवन्ति ते वाडवतुल्यवह्नयः ॥ १ ॥ इति विडङ्गाद्यवलेहः । विदह्यते यस्य तु भुक्तमात्रं दह्यन्ति हृत्कोष्ठगतामलाश्च । द्राक्षां सितामाक्षिकसंप्रयुक्तां लीढ्वाभयां वा स सुखं लभेत ॥ १ ॥

॥ अथ यवागूः ॥

चित्रकचविकानागरमागधिकाग्र्यैर्यवागूः स्यात् । गुल्मानिलशूलहरी चित्राद्या वह्निजननी च ॥ १ ॥ इति चित्रकादिः ॥

॥ अथ क्वाथः ॥

रुदङ्गपथ्ययोः क्वाथः सैन्धवेनावधूलितः । पीतः प्रशमयत्याशु त्वजीर्णं रेचय-

१ (ग० छ०) सचित्रदा । च० सुखप्रदा । ३ (ग० घ० छ०) त्युग्रमजीर्णम् ।

त्यपि ॥ १ ॥ धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः । आमाजीर्णप्रशमनं शूलघ्नं वह्निदीपनम् ॥ २ ॥

॥ अथ घृतानि ॥

अथाग्निकरं घृतम् । पञ्चमूल्यभयाव्योषपिप्पलीमूलसैन्धवैः । रास्नाक्षारद्वयाजाजीविडङ्गसटिभिर्घृतम् ॥ १ ॥ युक्तेन मातुलिङ्गस्य स्वरसेनार्द्रकस्य च । तक्रमस्तुसुरामण्डसौवीरकतुषोदकैः ॥ २ ॥ काञ्जिकेन च यत्पक्वं पीतमग्निकरं स्मृतम् । शूलगुल्मोदरश्वासकासानिलकफापहम् ॥ ३ ॥ इत्यग्निकरं घृतम् ॥ अथ मूलघृतम् ॥ मरीचं पिप्पलीमूलं नागरं पिप्पली तथा । भल्लातकं यवानी च विडङ्गं गजपिप्पली ॥ १ ॥ हिङ्गु सौवर्चलं चैव त्वजाजी विडधान्यकम् । सामुद्रं सैन्धवं क्षारं चित्रकं वचया सह ॥ २ ॥ एभिरर्धपलैर्भागैर्घृतं प्रस्थं विपाचयेत् । दशमूलरसे सिद्धं पयसाष्टगुणेन वा ॥ ३ ॥ मन्दाग्नेश्च हितं सिद्धं ग्रहणीदोषनाशनम् । विष्टम्भमामं दौर्बल्यं प्लीहानमपकर्षयेत् ॥ ४ ॥ कासं श्वासं क्षयं वापि दुर्नामसभगन्दरम् । कफजान्हन्ति रोगांश्च वायुजान्क्रिमिसम्भवान् । तान्सर्वान्नाशयत्याशु शुष्कं दार्वनलो यथा ॥ ५ ॥ इति दशमूलघृतम् ॥ इति घृतानि ॥

॥ अथाजीर्णकुलकण्डनगणः ॥

नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं जम्बीरोत्थरसो घृते समुचितः सर्पिस्तु मोचाफले । गोधूमेषु च कर्कटी हिततमा मांसाशिने काञ्जिकं नारङ्गे गुडभक्षणं प्रकथितं पिण्डालुकं कोद्रवे ॥ १ ॥ पनसे कदलं कदले च घृतं घृतपाकविधावपि जम्भरसः । तदुपद्रवशान्तिकरं लवणं लवणेषु च तण्डुलवारि परम् ॥ २ ॥ गोधूमे कर्कटिका माषे तक्रं च मूलकं चणके । आमलकं किल मुद्गे दीप्यः पक्वा तु यावनाले स्यात् ॥ ३ ॥ खण्डं च खण्डयति माषभवं ह्यजीर्णं तैलं कुलत्थजमिति प्रवदन्ति केचित् । द्राक्षामुकूलकनिकोचकसेवितं वा वाताम्रवृन्तफलपाककरं लवङ्गम् ॥ ४ ॥ कङ्गुश्यामाकनीवारकोरदूषमकुष्ठकाः । दध्ना जलेन जीर्यन्ति काञ्जिकं त्वाढकीं पचेत् ॥ ५ ॥ पिष्टान्ने शीतलं वारि कृशरान्ने तु सैन्धवम् । माषेण्डर्यां निम्बमूलं मुद्गयूषस्तु पायसे ॥ ६ ॥ मत्स्य आम्रफलात्कूर्मो यवक्षाराद्विपच्यते । कोसमूलान्नीलकण्ठपारावतकपिञ्जलाः ॥ ७ ॥ पटोलवंशाङ्कुरकारवल्लीफलाम्बुनिम्बुकक्थितानि जग्ध्वा । क्षारोदकं ब्रह्मतरोर्निपीय भोक्तुं पुनर्वाञ्छति तावदेव ॥ ८ ॥ विपच्यते सूरणको गुडेन तथालुकं तण्डुलकोदकेन । पिण्डालुकं जीर्यति कोरदूषाख्कसेरुपाकः खलु नागरेण ॥ ९ ॥ क्षीरं जीर्यति तक्रेण तद्द्रव्यं कोष्णमण्डतः । माहिषं माणिमन्थेन शङ्खचूर्णेन तद्दधि ॥ १० ॥ रसाला जीर्यति व्योषात्खण्डं

---

१ (क० ग० ङ०) क्षीर । २ (च०) रसैः । ३ (च०) मांसाशने । ४ (ग० च० छ०) काञ्जिकेन । ५ (च०) काश । ६ (च०) फलानि निम्ब । ७ (च०) पिण्डालुकाज्जीर्यतिकोरदूषः ।

नागरभक्षणात् । शुद्धो नागरमुस्ताभ्यां तथेक्षुश्चार्द्रकाशनात् ॥ ११ ॥ इत्यजीर्णकुलकण्ठनगणः ॥

॥ अथ रसाः ॥

दन्तीबीजमकल्मषं सदहनं शुण्ठीलवङ्गं समं गन्धं पारदटङ्कणं च मरिचं श्रीवृद्धदारो विषम् । खल्वे यामयुगं विमर्द्य विधिना दन्तीद्रवैर्भावना देयाः पञ्चदशानु निम्बुकजलैस्त्रेधा त्रिधा चित्रकैः ॥ १ ॥ त्रेधा चार्द्रकजै रसैः शुभधिया सप्तैव चौवेदिना पश्चाच्छुष्ककलायसंमितवटी कार्या भिषक्संमता । क्षुद्बोधप्रकरी त्रिशूलशमनी जीर्णज्वरध्वंसिनी कासारोचकपाण्डुतोदरगदान्पामामरुन्नाशिनी ॥ २ ॥ वस्त्याटोपहलीमकामयहरी मन्दाग्निसंदीपनी सिद्धेयं तु महोदधिप्रकटिता सर्वामयघ्नी सदा ॥ ३ ॥ इति बृहन्महोदधौ अजीर्णहरी वटी । रसेन्द्रचिन्तामणेः अग्निकुमारः । पारदं च विषं गन्धं टङ्कणं समभागतः। मरीचादष्टभागाः स्युर्द्वौ द्वौ शङ्खवराटयोः ॥ १ ॥ पक्वजम्बीरजैर्गाढं रसैः सप्त विभावयेत् । गुञ्जाद्वयमितो देयो रसो ह्यग्निकुमारकः ॥ २ ॥ समीरणसमुद्भूतमजीर्णं च विषूचिकाम् । क्षणेन क्षपयत्येष कफरोगनिकृन्तनः ॥ ३ ॥ इत्यग्निकुमारः ॥ अथ द्वितीयाग्निकुमारः । रसेन गन्धं सह टङ्कणेन समं विषं योज्यमतस्त्रिभागम् । कपर्दशङ्खावपि नेत्रभागौ मरीचकं चाष्टगुणं विमर्द्य ॥ १ ॥ सुपक्वजम्बीररसेन खल्वे शुद्धो भवत्यग्निकुमारकोऽयम् । अजीर्णवातं गुदगुल्मवातं विषूचिकाद्यं विनिहन्ति सद्यः ॥ २ ॥ इति द्वितीयोऽग्निकुमारः ॥ अथ लघुक्रव्यादः । पारदाद्द्विगुणं गन्धं गन्धांशं मृतलोहकम् । पिप्पली पिप्पलीमूलमग्निशुण्ठीलवङ्गकम् ॥ १ ॥ लोहसाम्यं पृथक्कुर्याद्रससाम्यं सुवर्चलम् । टङ्कणं मरिचं चापि गन्धतुल्यं प्रदापयेत् ॥ २ ॥ एतद्विचूर्ण्य यत्नेन भावयेत्सप्तधाम्लकैः । एतद्रसायनं श्रेष्ठं माषमात्रं प्रदापयेत् ॥ ३ ॥ तक्रेण केवलं वापि दद्याद्भोजनपाचने । क्षिप्रं तज्जीर्यते भुक्तं दीपनं भवति ध्रुवम् ॥ सर्वाजीर्णप्रशमनं लघुक्रव्यादसंज्ञितम् ॥४॥ इति लघुक्रव्यादः ॥ अथ बृहत्क्रव्यादः मन्थानभैरवात् । द्विपलं गन्धकं शुद्धं द्रावयित्वा विनिक्षिपेत् । पारदं पलमानं तु मृतशुल्बायसं पुनः ॥ १ ॥ पलमानेन संमिश्र्य पश्चात्कुलदले क्षिपेत् । ततो विचूर्ण्य यत्नेन लोहपात्रे विचक्षणः ॥ २ ॥ स्थापयेच्च रसं तत्र पात्रं चोपरि निक्षिपेत् । वस्त्रशुद्धं ततः कृत्वा लोहपात्रे विनिक्षिपेत् ॥ ३ ॥ मृद्वग्निना पचेत्तत्तु दर्व्या संचालयेन्मुहुः । पात्रमात्रं रसं सम्यग् दद्याज्जम्बीरकस्य तु ॥ ४ ॥ संचूर्ण्य पञ्चकोलोत्थैः कषायैः साम्लवेतसैः । भावनाः किल दातव्याः पञ्चाशत्प्रमिताः पृथक् ॥ ५ ॥ भृष्टटङ्कणचूर्णं च तुल्येन सह मेलयेत् । तदर्धं कृष्णलवणं मरीचं सर्वतुल्यकम् ॥ ६ ॥ सप्तधा भावयेत्पश्चाच्चणकक्षारवारिणा । ततः संशोष्य संपिष्य कूप्याश्च जठरे क्षिपेत् ॥ ७ ॥ अत्यर्थं गुरुमांसानि गुरुभोज्यान्य-

---

१ (ग० ङ० च० छ०) दारुं । २ (च०) चावेगिना । ३ (क० ग० ङ०छ०) साम्ना । ४ (च० सिद्धो । ५ (ख०) गन्धमर्धांशम् ।

नेकशः । भुक्त्वा चाकण्ठपर्यन्तं चतुर्वल्लमितो रसः ॥ ८ ॥ कट्वम्लतक्रसादैस्तं या-
ममात्रो हि पाचयेत् । पुनर्भोजयति क्षिप्रं का पुनर्मन्दवह्निता ॥ ९ ॥ रसः क्रव्या-
दनामायं प्रोक्तो मन्थानभैरवैः । सिंहलक्षोणिपालस्य भूरिमांसप्रियस्य च ॥ पुनर्भो-
जनकामस्य भैरवानन्दयोगिनः ॥ १० ॥ कुर्याद्दीपनमूर्ध्वजत्रुगदहृत् कुष्ठामसंशोध-
मस्तुन्दस्थौल्यनिबर्हणो मदहरः शूलार्तिमूलापहः । गुल्मप्लीहविनाशको बहुरुजां
विध्वंसनो वातहा वातग्रन्थिमहोदरापहरणः क्रव्यादनामा रसः ॥ ११ ॥ इति
बृहत्क्रव्यादः ॥ अथाजीर्णे योगाः ॥ द्वौ क्षारौ टङ्कणं सूतं लवङ्गं लवणत्रयम् ।
पिप्पली गन्धकं शुण्ठी मरीचं पलसंमितम् ॥ १ ॥ कर्षमेकं विषं दत्वा सूक्ष्मचू-
र्णानि कारयेत् । अर्कदुग्धस्य दातव्या भावना सप्तवासरम् ॥ २ ॥ अन्तर्धूमं गजपुटे
स्वाङ्गशीतं समुद्धरेत् । ततो लवङ्गमरिचस्फटिकीनां पलं पलम् ॥ ३ ॥ सर्वं संमर्द्य
दृढवद्दृढभाण्डे निधापयेत् । सायं गुञ्जाद्वयं खादेद्भुक्तं द्रावयति क्षणात् ॥ ४ ॥ पुन-
र्भोजनवाञ्छां च जनयेत्प्रहरोपरि । आममांसं द्रावयति श्लेष्मरोगनिकृन्तनम् ॥ ५ ॥
॥ अथाग्निमुखो रसः ॥ सूतं गन्धं विषं तुल्यं मर्दयेदार्द्रकद्रवैः । अश्वत्थचिञ्चापामार्ग-
क्षारः क्षारौ च टङ्कणम् ॥ १ ॥ जातीफलं लवङ्गं च त्रिकटु त्रिफलासमम् । शङ्खक्षारं
पञ्चपलं हिङ्गुजीरं द्विभागिकम् ॥ २ ॥ मर्दयेदम्लयोगेन गुञ्जामात्रा वटी शुभा ।
पाचनी दीपनी सद्योऽजीर्णशूलविषूचिकाः ॥ ३ ॥ हिक्कां गुल्मं चोदरं च नाशये-
न्नात्र संशयः । रसेन्द्रसंहितायां च नाम्ना वह्निमुखो रसः ॥ ४ ॥ इत्यग्निमुखो रसः ।
॥ अथाजीर्णारिरसः ॥ शुद्धं सूतं गन्धकं च पलमानं पृथक् पृथक् । हरीतकी च
द्विपला नागरं त्रिपलं स्मृतम् ॥१॥ कृष्णा च मरिचं तद्वत्सैन्धवोत्थं त्रिपलं पृथक् ।
चतुष्पला च विजया मर्दयेन्निम्बुकद्रवैः ॥ २ ॥ पुटानि सप्त देयानि घर्ममध्ये पुनः
पुनः । अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः ॥ भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्रेचये-
दपि ॥ ३ ॥ इत्यजीर्णारिः ॥ अथ पाशुपतो रसः । धन्वन्तरीयमतात् । कर्षं सूतं
द्विधा गन्धं त्रिभागं भस्मतीक्ष्णकम् । त्रिभिः समं विषं योज्यं चित्रकद्रवभावितम्
॥ १ ॥ द्विधा त्रिकटुकं योज्यं लवङ्गैले तु तत्समे । जातीफलं जातिपत्रं चार्धभाग-
मितं मतम् ॥ २ ॥ तथार्धं पञ्चलवणं स्नुह्यर्कौ वापि तिन्तिणी । अपामार्गोऽश्वत्थ
एषां लवणं च पलार्धकम् ॥ ३॥ टङ्कणं यावकक्षारं स्वर्जिकाहिङ्गुजीरकम् । हरीतकी
सूततुल्या मर्दयेदम्लयोगतः ॥ ४ ॥ धूर्तबीजस्य वै भस्म सर्वैः सप्तमभागतः । रसः
पाशुपतो नाम प्रोक्तः प्रत्ययकारकः ॥ ५ ॥ गुञ्जा मात्रा वटी कार्या सर्वाजीर्ण-
विनाशिनी । तालमूली तक्रयोगादुदरामयनाशिनी ॥ ६ ॥ मोचरसेनातिसारं ग्रह-
णीतक्रसैन्धवैः । शूले नागरकं शस्तं हिङ्गुसौवर्चलान्वितम् ॥ ७ ॥ अर्शःसु तक्रेण
हिता पिप्पली राजयक्ष्मणि । वातरोगं निहन्त्याशु शुण्ठीसौवर्चलान्विता ॥ ८ ॥
गुडूचीशर्करायोगात्पित्तरोगविनाशिनी । पिप्पलीक्षौद्रयोगेन श्लेष्मरोगान्निकृन्तति ॥

---

१ (घ०) मूर्ध्वे । २ (ग० घ० छ०) दृढाम ।

अतः परतरा नास्ति धन्वन्तरमते वटी ॥ ९ ॥ इति पाशुपतो रसः ॥ अथ रससिन्धोरादित्यरसः ॥ दरदं च विषं गन्धं त्रिकटु त्रिफलासमम् । जातीफलं लवङ्गं च लवणानि च पञ्च वै ॥ १ ॥ सर्वमेतत् कृतं चूर्णमम्लयोगेन सप्तधा । भावयित्वा वटी कार्या गुञ्जार्धप्रमिता बुधैः ॥ २ ॥ रसो ह्यादित्यसंज्ञोऽयमजीर्णक्षयकारकः । भुक्तमात्रं पाचयति जठरानलदीपनः ॥ ३ ॥ इत्यादित्यरसः ॥ अथ हुताशनः ॥ एकं च दिग्द्वादशभागमानं योज्यं विषं टङ्कणमूषणं च । हुताशनो नाम हुताशनस्य करोति वृद्धिं कफवातहन्ता ॥१॥ अन्यच्च । एकांशकाः पारदगन्धटङ्काः कपर्दशङ्खामृतगेहधूमाः । त्र्यंशा इमेऽथो मरिचं त्विभांशं संमर्दितं जम्भरसेन गाढम् ॥ १ ॥ गुल्मारोचकशूलवह्निसदनाजीर्णं विषूचीकफं जाड्यं शीर्षसमुद्भवं च कसनं मुद्गप्रमाणा वटी ॥ लीढार्द्रस्य रसेन हन्ति कथितानेतान् गदान् ब्रह्मणा पूर्वं निर्मित एप यत्नशतकैर्नाम्ना हुताशो रसः ॥ २ ॥ इतिहुताशनरसः ॥ अथाजीर्णकण्टको रसः ॥ शुद्धसूतं विषं गन्धं प्रत्येकं च समं समम् । मरीचं सर्वतुल्यांशं कण्टकारिफलद्रवैः ॥ १ ॥ मर्दयेद्भावयेद्यत्नादेकविंशतिवारकम् । गुञ्जात्रयमिदं खादेत्सर्वाजीर्णप्रशान्तये ॥ सर्वोपद्रवसंयुक्तां विषूचीमपि नाशयेत् ॥ २ ॥ इति रसाः ॥

॥ अथ विषूच्यादिचिकित्सा ॥

सूचीभिरिव गात्राणि तुदन्संतिष्ठतेऽनिलः । यस्याजीर्णेन सा वैद्यैर्विषूचीति निगद्यते ॥ १ ॥ विषूच्यामतिवृद्धायां पार्ष्ण्योर्दाहः प्रशस्यते । गन्धकं कुङ्कुमं वापि दद्यान्निम्बुजलेन वा ॥ २ ॥ व्योषं करञ्जस्य फलं हरिद्रानिम्बुकद्रवैः । नस्याञ्जने प्रयोक्तव्ये कुर्याच्च जलसेवनम् ॥ ३ ॥ व्योषं करञ्जस्य फलं हरिद्रामूलं समावाप्य च मातुलुङ्ग्याः । छायाविशुष्का गुटिकाः कृतास्ता हन्युर्विषूचीं नयनाञ्जनेन ॥४॥ करञ्जनिम्बशिखरीगुडूच्यर्जुनवत्सकैः । पीतः कषायो वमनाद्घोरां हन्याद्विषूचिकाम्॥ ॥ ५ ॥ निम्बूरसं चिञ्चिणिकासमेतं विषूचिकाशोपहरं कफं च । दुग्धेन पीतो यदि टङ्कणोऽसौ प्रशाम्यतेऽयं वमनं विरोधः ॥ ६ ॥ पिपासायामनुत्क्लेशे लवङ्गस्याम्बु शस्यते । जातीफलस्य वा शीतं शृतं भद्रघनस्य वा ॥ ७ ॥ त्वक्पत्ररास्नागुरुशिग्रुकुष्ठैरम्लप्रपिष्टैः सवचाशताह्वैः । उद्वर्तनं खल्लिविषूचिकाघ्नं तैलं विपक्वं च तदर्थकारि ॥ ८ ॥

॥ अथ चुक्राद्यं तैलम् ॥

पलं चुक्रं कुष्ठं पिचुयुगमितं सैन्धवकणे तदर्धं प्रत्येकं करतलमितं जातिफलकम् । कटोस्तैलं किञ्चित्कुडवमितमत्रावधिशृतं तदेतच्चुक्राद्यं शमयति विषूचीं च सगदाम् ॥ १ ॥ इति चुक्राद्यं तैलम् । कुष्ठसैन्धवयोः कल्कं चुक्रतैलसमन्वितम् । विषूच्यां मर्दनं कोष्णं खल्लीशूलनिवारणम् ॥१॥ विलम्बिकालसकयोरूर्ध्वाधः शोधनं हितम् ।

---

१ (च०) प्रशाम्यते । २ पिपासायां तथोत्क्लेशे इति भावप्रकाशस्थः पाठः । ३ (ग० ङ० च०) सूक्तम् ।

नालेन फलवर्त्या च तथा शोधनभेषजैः । दण्डाचेऽलसकेऽप्युच्चैरयमेव क्रियाक्रमः॥२॥ उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः । लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥ ३ ॥ विरुद्धासात्म्यपानान्नं विष्टम्भीनि गुरूणि च । अग्निमान्द्येऽप्यजीर्णे च सर्वाणि परिवर्जयेत् ॥ ४ ॥ फलवर्ति वमिं स्वेदं लङ्घनं चापतर्पणम् । विशेषादलसे कुर्याद्विषूच्यामतिसारवत् ॥ ५ ॥ इत्यजीर्णचिकित्सा ॥

॥ अथ भस्मकरोगनिदानचिकित्से ॥

कफे क्षीणे यदा पित्तं स्वस्थाने मारुतानुगम् । तीव्रं प्रवर्तयेद्वह्निं तदा तं भस्मकं वदेत् ॥१॥ तृड्दाहश्वासमूर्छादीन् कृत्वैवात्यग्निसंभवात् । पक्त्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेत्तनुम् ॥ २ ॥ तं भस्मकं गुरुस्निग्धसान्द्रमण्डहिमादिभिः । अन्नपानैर्नयेच्छान्तिं पित्तघ्नैश्च विरेचनैः ॥ ३ ॥ अत्युद्धताग्निशान्त्यै माहिषदधिदुग्धसर्पींषि । सेवेत वा यवागूं समधूच्छिष्टां ससर्पिष्कम्॥४॥असकृत् पित्तहरणं पायसं प्रतिभोजने । श्यामात्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम् ॥५ ॥ यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरु भोजनम् । सर्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा ॥ ६ ॥ कफे पूर्वं जिते पित्ते मारुते चानलः समः । समधातोः पचत्यन्नं पुष्ट्यायुर्बलवर्धनम् ॥ ७ ॥ आहारं पचति शिखी दोषानाहारवर्जितः पचति । दोषक्षये च धातून् धातुक्षैण्ये तथा प्राणान् ॥८॥ मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत् । निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत् ॥ ९ ॥ कोलास्थिमज्जकल्कस्तु पीतो वाप्युदकेन वै । अचिराद्विनिहन्त्येवं प्रयोगो भस्मकं नृणाम् ॥ १० ॥ नारीक्षीरेण संपिष्य पिबेदौदुम्बरत्वचम् । ताभ्यां वा पायसं सिद्धं पिबेदत्यग्निशान्तये ॥११॥ सिततण्डुलसितकलमाक्षीरेण पायसं सिद्धम् । भुक्त्वा दत्तेन पुरुषो द्वादश दिवसान् बुभुक्षितो न भवेत् ॥ १२ ॥ विदारिस्वरसे क्षीरे पचेदष्टगुणं घृतम् । माहिषं जीवनीयेन कल्केनात्यग्निनाशनम् ॥ १३ ॥ इति भस्मकरोगनिदानचिकित्से ॥

॥ अथ क्रिमिनिदानम् ॥

तत्र क्रिमिभेदानाह ॥ क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः । बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥ १ ॥ नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः ॥ बाह्यक्रिमिरूपाण्याह ॥ तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥ २ ॥ बहुपादाश्च सूक्ष्माश्च यूकालिक्षाश्च नामतः । द्विधा ते कोष्ठपिटिकाकण्डूगण्डान्प्रकुर्वते ॥ ३ ॥ तेषां निदानमाह । अजीर्णभोजी मधुराम्लसेवी द्रवप्रियः पिष्टगुडोपभोक्ता । व्यायामवर्जी च दिवाशयी च विरुद्धभोक्ता लभते क्रमींश्च ॥ ४ ॥ पुरीषजानां निदानमाह । माषपिष्टान्नलवणगुडशाकैः पुरीषजाः ॥ कफोद्भवनिदानमाह । मांसमा-

---

१ (ग० च०) प्रवर्धये— २ (च०) मन्दः । ३ (ग० ङ० च०) वर्धनः । ४ (ग० ङ० च० छ०) निरन्धनो । ५ (क० (कल्मा) ग० कलसा घ० कलशा ङ० कल्या । ६ (ग० च० छ०) घृतेन ७ (च०) गुणे ।

मगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥ ५ ॥ शोणितजानां कारणमाह । विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि ॥ संजाताभ्यन्तरक्रिमिलक्षणमाह । ज्वरो विवर्णता शूलं हृद्रोगश्छर्दनं भ्रमः ॥ ६ ॥ भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम् ॥ कफजानां स्वरूपमाह । कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः ॥ ७ ॥ पृथुवर्ध्रनिभाः केचित्केचिद्गण्डूपदोपमाः । रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ॥ ८ ॥ श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते । अन्त्रादाश्चोदरावेष्टा हृदयादा महामुखाः ॥ ९ ॥ चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्वते । हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥ १० ॥ मूर्च्छाछर्दिज्वरानाहकार्श्यक्षवथुपीनसान् ॥ अथ रक्तजानां स्वरूपमाह । रक्तवाहिशिरास्थाना रक्तजा जन्तवोऽणवः ॥ ११ ॥ अपादवृत्तास्ताम्राश्च सौक्ष्म्यात्केचिददर्शनाः । केशादा लोमविध्वंसा रोमद्वीपा उदुम्बराः ॥ १२ ॥ षट् ते कुष्ठैककर्माणः सहसौरसमातरः ॥ पुरीषजानां स्वरूपमाह ॥ पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ॥ १३ ॥ वृद्धास्ते स्युर्भवेयुश्च ते यदामाशयोन्मुखाः । तदास्योद्गारनिश्वासविड्बन्धानुविधायिनः ॥ १४ ॥ तेषां शरीरमाह । पृथग्वृत्ततनुस्थूलाः श्यावपीतसितासिताः । ते पञ्च नाम्ना क्रमयः ककेरुकमकेरुकाः ॥१५॥ सौसुरादाः सलूनाख्या लेलिहा जनयन्ति च । भ्रमः शूलं तथा छर्दिर्हृदयज्वलनज्वराः ॥ १६ ॥ वैवर्ण्यमतिसारः स्यादरुचिः क्रमिलक्षणम् । विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ॥ रोमहर्षोऽग्निसदनं गुदे कण्डूर्विमार्गगाः ॥ १७ ॥ इति क्रिमिनिदानम् ॥

॥ अथातः क्रिमिचिकित्सितं व्याख्यास्यामः ॥

मुस्ताखुपर्णीफलदारुशिग्रुक्वाथः सकृष्णाक्रमिशत्रुकल्कः । मार्गद्वयेनापि चिरप्रवृत्तान् क्रमीन्निहन्ति क्रिमिजांश्च रोगान् ॥ १ ॥ दाडिमत्वक्कृतः क्वाथस्तिलतैलेन संयुतः । त्रिदिनात्पातयत्येवं कोष्ठतः क्रमिजालकम् ॥ २ ॥ खदिरः कुटजः पिचुमन्दवचात्रिकटुत्रिफलात्रिवृतासहितम् । पशुमूत्रयुतं पिब सप्तदिनं क्रमिकोटिशतान्यपि हन्त्यचिरात् ॥ ३ ॥ निम्बवत्सकविडङ्गसैन्धवं रामठेन सह जन्तुनाशनम् । निम्बपट्कमजमोदकान्वितं चूर्णमेव मधुना प्रशस्यते ॥ ४ ॥ आखुकर्णीदलैःपिष्टैः पिष्टकेन च पूपकान् । भुक्त्वा सौवीरकं चानु पिबेत्क्रमिहरं परम् ॥५॥ सुवर्चिकारामठपत्रिकाह्वाविडङ्गबाल्हीककणाग्निविश्वाः । यवानिकाग्रन्थिकभद्रमुस्तास्तक्रेण चूर्णं क्रमिकोटिहारि ॥ ६ ॥ भल्लातको वा दध्ना च चिञ्चाम्लेन हरेत्क्रमीन् । विडङ्गं पारिभद्राग्रं ब्रह्मबीजं पृथक् पिबेत् ॥ ७ ॥ मधुना क्रमिनाशाय निम्बं वा हिङ्गुना युतम् । निम्बाजमोदाजन्तुघ्नं ब्रह्मबीजं सचोरकम् ॥ सहिङ्गुकं समगुडं सद्यो

---

१ (क॰) वर्ध्म। २ (ग॰) गुरवः। ३ (च॰) अपादा वृत्तताम्राश्च। ४ (ग॰ च॰ छ॰) कर्णी।

जन्तुविनाशनम् ॥ ८ ॥ हरीतकी चैव तथा हरिद्रा सौवर्चलं चैव समं विचूर्णितम्। इन्द्रवारुणिजलेन भावितं कीटसङ्घविनिवारणं परम् ॥ ९ ॥ काकुभकुसुमविडङ्गं लाङ्गलिभल्लातकं तथोशीरम्। श्रीवेष्टकसर्जरसं चन्दनमथ कुष्ठमष्टमं दद्यात् ॥ १० ॥ एष सुगन्धो धूपः सकृत्कृमीणां विनाशकः प्रोक्तः। शय्यासु मत्कुणानां शिरसि च गात्रेषु यूकानाम् ॥ ११ ॥ इति सुगन्धो धूपः ॥ विशालायाः फलं पक्वं तप्तलोहे परिक्षिपेत्। तद्धूमो दन्तलग्नश्चेत्कीटानां पातनः परः ॥ १२ ॥ अथ विडङ्गादितैलम् ॥ सविडङ्गं च शिलया सिद्धं सुरभिजलेन कटुतैलम्। निखिला नयति विनाशं लिक्षासहिता दिनैर्यूकाः ॥ १ ॥ इति विडङ्गादितैलम्। पारदं मर्दयेन्निष्कं कृष्णधत्तूरकद्रवैः। नागवल्लीद्रवैर्वाथ वस्त्रखण्डं प्रलेपयेत् ॥ १ ॥ तद्वस्त्रं मस्तके पेष्य धार्यं यामत्रयं ततः। यूकाः पतन्ति निश्चेष्टाः सलिक्षा नात्र संशयः ॥२॥ चित्रकं दन्तीमूलं कोशातकीसमन्वितम्। कल्कं पिष्ट्वा पचेत्तैलं केशशत्रुविनाशनम् ॥ ३ ॥

॥ अथ रसादिलेपः ॥

रसेन्द्रेण समायुक्तो रसो धत्तूरपत्रजः। ताम्बूलपत्रजो वापि लेपनाद्यूकनाशनः ॥१॥

॥ अथ कृमिमुद्गरो रसः ॥

क्रमेण वृद्धं रसगन्धकाजमोदाविडङ्गं विषमुष्टिका च। पलाशबीजं च विचूर्णमस्य निष्कप्रमाणं मधुनावलीढम् ॥ १ ॥ पिबेत्कषायं घनजं तदूर्ध्वं रसोऽयमुक्तः कृमिमुद्गराख्यः। क्रिमीन्निहन्ति क्रिमिजांश्च रोगान् संदीपयत्यग्निमयं त्रिरात्रात् ॥२॥

॥ अथ कृमिकुठारः ॥

विश्वं रामठसैन्धवाग्निमरिचं पथ्या वचा गुग्गुलुर्बोलं रात्रिविडङ्गकुष्ठलशुनं गन्धः कुबेराक्षकः। इन्द्राह्वतपलाशबीजखदिराजाजीकणादीप्यकं सौवर्चं मधुना गुटी कृमिकुठाराह्वा रुजाजन्तुनुत् ॥ १ ॥ कृमिषु वर्ज्याण्याह। क्षीराणि मांसानि घृतानि चैव दधीनि शाकानि च पत्रवन्ति। समासतोऽम्लं मधुरान्रसांश्च कृमीञ्जिघांसुः परिवर्जयेत्तु ॥ २ ॥ शीताम्बु मधुरं क्षारं दधिक्षीरघृतादिकम्। सौवीरं पत्रशाकांश्च वर्जयेत्कृमिवान्नरः ॥ ५ ॥ इति कृमिचिकित्सा ॥

॥ अथातः पाण्डुरोगनिदानम् ॥

पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः। चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥ १ ॥ व्यवायमम्लं लवणानि मद्यं मृदं दिवा स्वप्नमतीव तीक्ष्णम्। निषेवमाणस्य विदूष्य रक्तं दोषास्त्वचं पाण्डुरतां नयन्ति ॥ २ ॥ अथ पूर्वरूपमाह।

---

१ (च०) लोहोपरि।

त्वक्स्फोटनिष्ठीवनगात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः । विण्मूत्रपीतत्वमथाविपाको भविष्यतस्तस्य पुरःसराणि ॥ १ ॥ अथ वातिकमाह ॥ विण्मूत्रनयनादीनां रूक्षकृष्णारुणाभता । वातपाण्ड्वामये कम्पतोदानाहभ्रमादयः ॥ १ ॥ अथ पैत्तिकमाह ॥ पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः । भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥ १ ॥ अथ श्लैष्मिकमाह ॥ कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः । पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ १ ॥ अथ त्रिदोषजमाह ॥ सर्वान्नसेविनः सर्वे दुष्टा दोषास्त्रिदोषजम् । त्रिदोषलिङ्गं कुर्वन्ति पाण्डुरोगं सुदुःसहम् ॥ १ ॥ इति चरके ॥ ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः । पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥ २ ॥ अथ मृत्तिकाजन्यमाह ॥ मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः । कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥ १ ॥ कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तं च रूक्षयेत् । पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥ २ ॥ इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा । पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ ३ ॥ अथ मृज्जस्य लक्षणमाह ॥ शूनाक्षिकूटगण्डभ्रूः शूनपन्नाभिमेहनः । क्रिमिकोष्ठोऽतिसार्येत मलं चासृक्कफान्वितम् ॥ १ ॥

॥ अथासाध्यलक्षणमाह ॥

पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति । कालप्रकर्षाच्छूनाङ्गो यो वा पीतानि पश्यति ॥ १ ॥ बद्धाल्पविट् सहरितं सकफं योऽतिसार्यते । दीनः श्वेतातिदिग्धाङ्गश्छर्दिमूर्छातृषान्वितः ॥ स नास्त्यसृक्क्षयाद्यस्तु पाण्डुश्वेतत्वमाप्नुयात् ॥ २ ॥ अन्यच्च । पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् । पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥१॥ अन्तेषु शूनं परिहीनमध्यं म्लानं तथान्तेषु च मध्यशूनम् । गुदे ऽथ शेफस्यथ मुष्कयोश्च शूनं प्रताम्यं तमसंज्ञकल्पम् ॥ विवर्जयेत्पाण्डुकिनं यशोऽर्थी तथातिसारज्वरपीडितं च ॥ २ ॥ कामलाकारणमाह ॥ पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥ १ ॥

॥ अथ कामलास्वरूपमाह ॥

हारिद्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः । रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥ १ ॥ दाहाविपाकदौर्बल्यसदनारुचिकर्शितः । कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ॥२॥ कालान्तरात्खरीभूता कृच्छ्रा स्यात्कुम्भकामला । कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ॥ ३ ॥ सरक्ताक्षिमुखच्छर्दिविण्मूत्रो यश्च ताम्यति । दाहारुचितृडानाहतन्द्रामोहसमन्वितः ॥ नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते ॥४॥ छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः । नश्यति श्वासकासार्तो विड्भेदी कुम्भकामली ॥ ५ ॥

---

१ च० त्वङ्मूत्र । २ (च०) मूत्रो ।

॥ अथ पाण्डुरोगावस्थायां हलीमकमाह ॥

यदा तु पाण्डोर्वर्णःस्याद्धारीतश्यावपीतकः । बलोत्साहक्षयस्तन्द्रामन्दाग्नित्वं मृदुज्वरः ॥ स्त्रीष्वहर्षोऽङ्गमर्दश्च सादस्तृष्णारुचिर्भ्रमः ॥१॥ हलीमकं तदा तस्य विद्याद्निलपित्ततः । पाण्डुरुक्कामलाकुम्भकामला च हलीमकम् ॥२॥ सन्तापो भिन्नवर्चस्त्वं बहिरन्तश्च पीतता । पाण्डुता नेत्रयोर्यस्य पानकीलक्षणं भवेत् ॥ ३ ॥ इति पाण्डुरोगकामलाहलीमकनिदानम् ॥

॥ अथातः पाण्डुरोगचिकित्सा ॥

साध्यं च पाण्ड्वामयिनं समीक्ष्य स्निग्धं घृतेनोर्ध्वमधश्च शुद्धम् । सम्पादयेत्क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णमयप्रयोगैः ॥ १ ॥ पिबेद्घृतं वा रजनीविपक्वं यत्त्रैफलं तैल्वकमेकमेव । विरेचनद्रव्यकृतं पिबेद्वा योगांश्च वैरेचनिकान् घृतेन ॥२॥ विधिः स्निग्धोऽत्र वातोत्थे तिक्तः शीतश्च पैत्तिके । श्लैष्मिके कटुरूक्षोष्णः कार्यो मिश्रस्तु मिश्रजे ॥ ३ ॥ द्विपञ्चमूलीकथितं सविश्वं कफात्मके पाण्डुगदे पिबेत्तम् । ज्वरेऽतिसारे श्वयथौ ग्रहण्यां कासेऽरुचौ कण्ठहृदामयेषु ॥ ४ ॥ फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः । क्वाथः क्षौद्रयुतो हन्यात्पाण्डुरोगं सकामलम् ॥ ५ ॥ पुनर्नवानिम्बपटोलशुण्ठीतिक्तामृतादार्व्यभयाकषायः । सर्वाङ्गशोफोदरपाण्डुरोगस्थौल्यप्रसेकोर्ध्वकफामयेषु ॥ ६ ॥

॥ अथ नवायसचूर्णम् ॥

त्र्यूषणत्रिफलामुस्ताविडङ्गदहनाः समाः । नवायोरजसो भागास्तच्चूर्णं मधुसर्पिषा । भक्षयेत्पाण्डुहृद्रोगकुष्ठार्शःकामलापहम् ॥ १ ॥ इति नवायसचूर्णम् ॥ लोहपात्रस्थितं क्षीरं सप्ताहं पथ्यभोजनः । पिबेत्पाण्ड्वामयी शोषी ग्रहणीदोषपीडितः ॥ १ ॥ दग्ध्वाक्षकाष्ठैर्मलमायसं तु गोमूत्रनिर्वापितसप्तवारम् । विचूर्ण्य लीढं मधुना चिरेण तक्रेण वा पाण्डुगदं निहन्यात् ॥२॥ इति वीरसिंहावलोकतः ॥ अतिशुद्धमयोभस्म मधुक्षौद्रयुतं लिहेत् । पाण्डुरोगस्य नाशाय कामलानां च सर्वशः ॥१॥ नागरं लोहचूर्णं वा कृष्णां पथ्यामथाश्मजम् । गुग्गुलुं वाथ मूत्रेण कफपाण्ड्वामयी पिबेत् ॥ २ ॥ शिलाजतु क्षौद्रविडङ्गसर्पिर्लोहाभयाशर्करया समक्षम् । आपूर्यते दुर्बलदेहधारी त्रिपञ्चरात्रेण यथा शशाङ्कः ॥ ३ ॥ वृदान्त् ॥ अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकधातुचूर्णम् । तैर्मोदकः क्षौद्रयुतो नु तक्रः पाण्ड्वामये दूरगतेऽपि शस्तः ॥ १ ॥

॥ अथ मण्डूरवटकाः ॥

सुराब्ददार्वीकटुषट्कतो[1]ऽप्यवेल्लं वरा चेति समांशचूर्णम् । मण्डूरभागद्वयमष्टमूत्रे पक्त्वा गवां तक्रसमं च योज्यम् ॥१॥ कामलापाण्डुमेहार्शःशोथकुष्ठकफामयान् । ऊरुस्तम्भमजीर्णं च प्लीहानं नाशयन्ति च ॥ २ ॥ इति रत्नप्रदीपात् ॥

---

१ (च०) श्वास । २ (च०) तोयम् ।

॥ अथ मण्डूरवज्रवटकः ॥

पञ्चकोलं समरिचं देवदारु फलत्रिकम्। विडङ्गमुस्तायुक्ताश्च भागास्त्रिपलसंमिताः ॥ १ ॥ यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः। पक्त्वाष्टगुणिते मूत्रे तद्घनीभूतमुद्धरेत् ॥ २ ॥ ततोऽक्षमात्रान्वटकान् पिबेत्तक्रेण तक्रभुक्। पाण्डुरोगं जयेत्तद्वन्मन्दाग्नित्वमरोचकम् ॥ ३ ॥ मण्डूरवज्रवटको रोगानीकप्रभेदनः। अर्शांसि ग्रहणीं शोफमूरुस्तम्भं हलीमकम्। क्रमीन्प्लीहानमुदरं गलरोगं च नाशयेत् ॥ ४ ॥ इति वृन्दात् ॥

॥ अथ मण्डूरलवणम् ॥

कृत्वाग्निवर्णं मलमायसं तु मूत्रेऽभिषिञ्चेद्बहुशो गवां च। तत्रैव सिन्धूत्थसमं विपाच्यं निरुद्धधूमं च बिभीतकाग्नौ ॥ १ ॥ तक्रेण पीतं मधुनाथवापि बिभीतकाख्यं लवणं प्रयुक्तम्। पाण्ड्वामयिभ्यो हितमेतदस्मात्पाण्ड्वामयघ्नं न हि किञ्चिदन्यत् ॥ २ ॥ इति योगतरङ्गिण्याः ॥

॥ अथ मधुमण्डूरः ॥

गृहीत्वा पृथक्प्रस्थमण्डूरभागं सृते त्रैफले मर्दयित्वा च यामम्। पुटे पाचयेद्यामयुग्मं कृशानौ पुटानीह देयानि चन्द्राक्षिवारम् ॥ १ ॥ तथा धेनुमूत्रे कुमारीरसे च विधेयश्च पञ्चामृते योगराजः। भवेत् सिन्धुनागैः पुटैः सिद्धिदोऽयमचिन्त्यप्रभावश्च मण्डूर एषः ॥ २ ॥ मधुमण्डूर एष कणामधुना चिरपाण्डुगदं ननु हेममितः। जनको रुधिरस्य निहन्ति परं विविधार्तिहरस्त्वनुपानबलैः ॥ ३ ॥

॥ अथ मण्डूराद्योऽरिष्टः ॥

मण्डूरस्य तु शुद्धस्य तुलार्धं परिकीर्तितम्। तद्वल्लोहस्य पत्राणि तिलोत्सेधप्रमाणतः ॥ १ ॥ पुराणगुडपञ्चाशत् कोलप्रस्थत्रयं तथा। निकुम्भचित्रकाभ्यां च पले द्वे द्वे सुचूर्णिते ॥ २ ॥ पिप्पलीनां विडङ्गानां कुडवं कुडवं पृथक्। क्षौद्रश्चापि त्रिफलाप्रस्थाञ्जलद्रोणे समावपेत् ॥ ३ ॥ अर्धमासस्थितो धान्ये पेयोऽरिष्टः प्रमाणतः। दोषानुभयतः श्राव्य पाण्डुरोगं नियच्छति ॥ ४ ॥ क्रमीनर्शांसि कुष्ठं च कासश्वासकफामयान्। एषोऽरिष्टस्तु मण्डूरः सर्वपाण्ड्वामयापहः ॥ ५ ॥

॥ अथ गदनिग्रहात् मण्डूराद्योऽरिष्टः ॥

रेचनं कामलार्तस्य स्निग्धस्यादौ प्रयोजयेत्। ततः प्रशमनी कार्या क्रिया वैद्येन जानता ॥ १ ॥ पाण्डुरोगक्रियां सद्यो योजयेच्च हलीमके। मलानुसरणं दृष्ट्वा सापि कार्या भिषग्वरैः ॥ २ ॥ हरिद्रात्रिफलानिम्बबलामधुकसाधितम्। सक्षीरं माहिषं सर्पिः कामलापहमुत्तमम् ॥ ३ ॥ त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य

---

१ (घ०) निषिञ्चेत्। २ (ख० घ०) भिषक्।

वा रसम् । प्रातर्मधुयुतं वैद्यः कामलार्ताय योजयेत् ॥ ४ ॥ दार्वीसत्रिफलाव्योष-विडङ्गानयसो रजः । मधुसर्पिर्युतं लिह्यात्कामलापाण्डुरोगवान् ॥ ५ ॥ अयोरजो व्योषविडङ्गचूर्णं लिह्याद्धरिद्रां त्रिफलान्वितां वा । सशर्करां कामलिनां त्रिभंडी[1] हिता गवाक्षी सगुडा च शुण्ठी ॥ ६ ॥ धात्रीलोहरजोव्योषनिशाक्षौद्रं सशर्करम् । लीढं निवारयत्याशु कामलामुद्धतामपि ॥ ७ ॥ लोहचूर्णं निशायुग्मं त्रिफलां कटुरोहिणीम् । प्रलिह्य मधुसर्पिर्भ्यां कामलार्तः सुखी भवेत् ॥ ८ ॥ व्योषाग्निवेल्ल-त्रिफलामुस्तैस्तुल्यमयोरजः । चूर्णितं तक्रमध्वाज्यकोष्णतोयोपयोजितम् ॥ ९ ॥ कामलापाण्डुहृद्रोगकुष्ठार्शोमेहनाशनम् । तुल्यं वायोरजः पथ्यां हरिद्रां क्षौद्र-सर्पिषा ॥ १० ॥ चूर्णितां कामली लिह्याद्गुडक्षौद्रेण वाभयाम् । एलाजीरक-भूधात्रीसितागव्येन भावयेत् ॥ ११ ॥ प्रातः संसेवनं कुर्यात्कामलानाशनं परम् । निशाचूर्णं कर्षमितं दध्नः पलमितं तथा ॥ १२ ॥ प्रातः संसेवनं कुर्यात्कामला-नाशनं परम् । अर्कमूलं हरेत्त्र्यस्यात्कामलां तण्डुलोदकैः ॥ १३ ॥ अञ्जनं कामलार्तस्य द्रोणपुष्पीरसस्य तु । निशागैरिकधात्रीणां चूर्णं चोपरि लेपयेत् ॥१४॥ गोदुग्धेन विशालाया मुनिसंख्यादलानि तु । जीरकेण युतं पेष्यं रसमेकं पलं पिबेत् ॥ १५ ॥ अथवा तज्जटाद्रावं कर्षार्धं दुग्धमिश्रितम् । पाययेत्तु प्रतिदिनमेव-मेतद्दिनत्रयम् ॥ १६ ॥ घृतदुग्धौदनं पथ्यं कुर्याद्धि लवणं विना । कामलां नाशय-त्याशु वायुरभ्रं हरेद्यथा ॥ १७ ॥

॥ अथ घृतानि ॥

अथ गुडूचीघृतम् । गुडूचीस्वरसे सर्पिः सक्षीरं माहिषं घृतम् । चतुर्गुणेन पयसा पाययेत्तद्धलीमके ॥ १ ॥ इति गुडूचीघृतम् । व्योषं बिल्वं द्विरजनी त्रिफला द्विःपु-नर्नवम् । मुस्ता अयोरजः पाठा विडङ्गं देवदारु च ॥ १ ॥ वृश्चिकाली च भार्ङ्गी च सक्षीरैस्तैर्घृतं शुभम् । सर्वान् प्रशमयत्याशु विकारान्मृतिकाकृतान् ॥ २ ॥ इति व्योषादिघृतम् ॥

॥ अथामलक्यवलेहः ॥

रसमामलकानां तु संशुद्धं यन्त्रपीडितम् । द्रोणं पचेच्च मृद्वग्नौ तत्र चेमानि दा-पयेत् ॥ १ ॥ चूर्णितं पिप्पलीप्रस्थं मधुकं द्विपलं तथा । प्रस्थं गोस्तनिकायाश्च द्राक्षायाः किल पेषितम् ॥२॥ शृङ्गवेरपले द्वे तु तुगाक्षीर्याः पलद्वयम् । तुलार्धं शर्क-रायाश्च घनीभूतं समुद्धरेत् ॥ ३ ॥ मधुप्रस्थसमायुक्तं लेहयेत्पलसम्मितम् । हलीमकं कामलां च पाण्डुत्वं चापकर्षति ॥ ४ ॥ इत्यामलक्यवलेहः ॥

॥ अथ त्रिफलाद्यवलेहः ॥

त्रिफलायास्त्रयो भागास्त्रयस्त्रिकटुकस्य च । भागाश्चित्रकमूलस्य विडङ्गानां तथैव

---

१ (च०) त्रिभण्डी ।

च ॥ १ ॥ पञ्चाश्मजतुनो भागास्तथा रूप्यमलस्य च । माक्षिकस्य च शुद्धस्य लोहस्य रजसस्तथा ॥ २ ॥ अष्टौ भागाः सितायास्तु तत्सर्वं मधुसंयुतम् । श्लक्ष्णचूर्णं सुसंस्थाप्यमायसे भाजने शुभे ॥ ३ ॥ उदुम्बरसमां मात्रां ततः खादेद्यथाग्निना । दिने दिने प्रयोक्तव्यं जीर्णे भोज्यं यथेप्सितम् ॥ ४ ॥ वर्जयित्वा कुलत्थांस्तु काकमाचीकपोतकान् । पाण्डुरोगं विषं कासं यक्ष्माणं विषमज्वरम् ॥ ५ ॥ कुष्ठान्यजीर्णकं मेहं श्वासं शोफमरोचकम् । विशेषाद्धन्त्यपस्मारं कामलां गुदजानि च ॥ ६ ॥ इति त्रिफलाद्यवलेहो योगतरङ्गिण्याः ॥ अथ हंसमण्डूरः ॥ मण्डूरं चूर्णयेच्छ्लक्ष्णं गोमूत्रेऽष्टगुणे पचेत् । पञ्चकोलं देवदारु मुस्ता व्योषफलत्रयम् ॥ १ ॥ विडङ्गं स्यात्प्रतिपलं पाकान्ते चूर्णितं क्षिपेत् । भक्षयेत्कर्षमात्रं च तक्रे तक्रं च भोजने ॥ २ ॥ पाण्डुशोफं हलीमं च ऊरुस्तम्भं च कामलाम् । अर्शांसि हन्ति नो चित्रं हंसमण्डूरको ह्ययम् ॥ ३ ॥

॥ अथ मदेभसिंहसूतो रसः ॥

काश्यपग्रन्थे ॥ रसगन्धवराटताम्रशङ्खं विषवङ्गाभ्रककान्ततीक्ष्णमुण्डम् । अहिहिङ्गुलटङ्कणं समांशं सकलैः स्यात्त्रिगुणं पुराणकिट्टम् ॥१॥ पशुमूत्रविशोधितं सुभृष्टा त्रिफलाभृङ्गमथार्द्रकोत्थनीरैः । सुविशोष्य वरामृताग्निवासास्वरसैरष्टगुणैः पुनर्नवोत्थैः ॥ २ ॥ पृथगग्निकृतं घनं विपाच्यं गुलिका गुञ्जमिता निजानुपानैः । ज्वरपाण्डुतृषास्रपैत्यगुल्मक्षयकासस्वरमग्निसादमूर्च्छाम् ॥ ३ ॥ पवनादिषु दुस्तराष्टरोगान् सकलं पित्तहरं मदावृतं च । बहुना किमसौ यथार्थनामा सकलव्याधिहरो मदेभसिंहः ॥ ४ ॥ इति मदेभसिंहः ॥

॥ अथ त्रैलोक्यनाथरसः ॥

पलानि चत्वारि रसस्य पञ्च गन्धस्य सत्त्वस्य गुडूचिकायाः । व्योषस्य चूर्णस्य च तालमूल्याः सशाल्मलस्येह पलत्रयं स्यात् ॥१॥ पृथक् पृथक् षड्गगनस्य चाष्टौ लोहस्य सर्वं त्रिफलाजलेन । घृष्टं चतुष्पष्टिमितं तदर्धाः स्युर्भावनामार्कवजद्रवस्य ॥२॥ शिग्रूत्थनीरेण च षोडशाष्टौ तथा नलोत्थाद् गृहकन्यकायाः ॥ आर्द्रद्रवस्येति रसोऽयमुक्तः पाण्डुक्षयश्वासगदादिहर्ता ॥ ३ ॥ क्षौद्रेण वा शर्करया घृतेन कर्षार्धमेतस्य भजेत्प्रयत्नात् ॥ इति रसरत्नप्रदीपात् ॥

॥ अथ पथ्यापथ्यम् ॥

यवगोधूमशाल्यन्नं रसैर्जाङ्गलजैः शुभैः । मुद्गाढकमसूराद्यैः पाण्डौ भोजनमिष्यते ॥ १ ॥ वह्निमातपमायासमन्नपानं च पित्तलम् । मैथुनं क्रोधमध्वानं पाण्डुरोगी सदा त्यजेत् ॥ २ ॥ इति पाण्डुकामलाहलीमकचिकित्सा समाप्ता ॥

---

१ (ख०) मूतं । २ (च०) विपाच्य । ३ (ग०) अहिकन्यकायाः ।

॥ अथ रक्तपित्तनिदानम् ॥

घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः । तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥ १ ॥ कोद्रवोद्दालकैश्चान्नैस्तद्युक्तैरतिसेवितैः । पित्तं विदग्धं स्वगुणैर्विदहत्याशु शोणितम् ॥ २ ॥ ततः प्रवर्तते रक्तमूर्ध्वं चाधो द्विधापि वा ॥ आमाशयाद्व्रजेदूर्ध्वमधः पक्वाशयाद्व्रजेत् ॥ ३ ॥ विदग्धयोर्द्वयोश्चापि द्विधाभागं प्रवर्तते । ऊर्ध्वं कर्णाक्षिनासास्यैर्मेण्ढ्रयोनिगुदैरधः ॥ ४ ॥ कुपितं रोमकूपैस्तु समस्तैस्तत्प्रवर्तते । श्लैष्मिकमाह । केचिच्च यकृतः प्लीह्नः प्रवदन्त्यसृजो गतिम् ॥ ५ ॥ सदनं शीतकामित्वं कण्ठधूमायनं वमिः । लोहगन्धिश्च निःश्वासो भवत्यस्मिन्भविष्यति ॥ ६ ॥ वातिकमाह ॥ सान्द्रं सपाण्डु सस्नेहं पिच्छिलं च कफात्मकम् ॥ श्यावारुणं सफेनं च तनु रूक्षं च वातिकम् ॥७॥ पैत्तिकमाह । रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् । मेचकागारधूमाभमञ्जनाभं च पैत्तिकम् ॥८॥ सान्निपातिकमाह । संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गात्सान्निपातिकम् । ऊर्ध्वगं कफसंसृष्टमधोगं मारुतानुगम् ॥९॥ द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्तते । ऊर्ध्वं साध्यमधो याप्यमसाध्यं युगपद्गतम् ॥१०॥ रूक्षाद्यभ्यासतो दुष्टो रसो रक्तं प्रदूषयेत् । एकमार्गं बलवतो नातिवेगं नवोत्थितम्॥११॥ रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् । एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ॥१२॥ त्रिदोषजमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् । व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥ १३ ॥ दौर्बल्यं श्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्च्छे भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा । तृष्णा कोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं भक्तद्वेषाविपाकौ विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥ १४ ॥ मांसप्रक्षालनाभं क्वथितमिव च यत्कर्दमाम्भोनिभं वा मेदःपूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम् । यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं रक्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥ १५ ॥ येन चोपहतो रक्तं रक्तपित्तेन मानवः । पश्येद् दृश्यं वियच्चापि तस्यासाध्यमसंशयम् ॥ १६ ॥ लोहितं छर्दयेद्यस्तु सततं लोहितेक्षणः । लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः ॥ १७ ॥ इति रक्तपित्तनिदानम् ॥

॥ अथातो रक्तपित्तचिकित्सां व्याख्यास्यामः ॥

पित्तास्रं स्तम्भयेन्नादौ प्रवृत्तं बलिनेऽश्नुतम् । हृत्पाण्डुग्रहणीरोगप्लीहगुल्मोदरादिकृत् ॥ १ ॥ क्षीणमांसबलं बालं वृद्धं शोषानुबन्धिनम् । अवाम्यमविरेच्यं च शमनीयैरुपाचयेत् ॥ २ ॥ अतिप्रवृद्धदोषस्य पूर्वं लोहितपित्तिनः । अक्षीणबलमांसाग्नेः कर्तव्यमपतर्पणम् ॥३॥ ऊर्ध्वगे रेचनं पूर्वमधोगे वमनं हितम् । आरग्वधेन धात्र्या वा त्रिवृता पथ्ययाथवा ॥ ४॥ विरेचनं प्रयोक्तव्यं शर्करामाक्षिकोत्तरम् । मुस्तेन्द्रयवयष्ट्याह्वमदनाह्वं पयो मधु ॥ ५ ॥ शिशिरं वमनं योज्यं रक्तपित्तहरं परम् । वृन्दात् ।

---

१ (च०) त्रिलिङ्गं । २ (ग० छ०) बलिनोऽश्नु (सु) तम् । ३ (क०) उपाचरेत् ।

द्राक्षा मधुककाश्मर्यसितायुक्तं विरेचनम् ॥६॥ यष्टीमधुकसंयुक्तं सक्षौद्रं वमनं हितम् । शालिपर्ण्यादिना सिद्धा पेया पूर्वमधोगमे ॥ रक्तातिसारहन्ता च योज्यो विधिरशेषतः ॥ ७ ॥ पयांसि शीतानि रसाश्च जाङ्गलाः सतीनयूषाश्च सशालिषष्टिकाः । हितानि चैतानि च रक्तपित्ते चान्यान्यपि स्युः किल पित्तहानि ॥८॥ शालिषष्टिकनीवारकोरदूषप्रसाधिकाः । श्यामाकाश्च प्रियङ्गुश्च भोजनं रक्तपित्तिनाम् ॥ ९ ॥ मसूरमुद्गचणकाः समकुष्टाढकीफलाः । प्रशस्ताः सूपयूषार्थे कल्पिता रक्तपित्तिनाम् ॥ ॥१० ॥ दाडिमामलकं बिल्वानम्लार्थं चापि दापयेत् । पटोलनिम्बवेत्राग्रप्लक्षवेतसपल्लवाः ॥ ११ ॥ शाकार्थं शाकसात्म्यानां तण्डुलीयादयो हिताः । पारावतकपोतांश्च लावान् रक्ताक्षवर्तकान् ॥ १२ ॥ शशान्कपिञ्जलानेणान्हरिणान् कालपुच्छकान् । रक्तपित्तहरान् विद्याद्रसं तेषां प्रयोजयेत् ॥ १३ ॥ ईषदम्लाननम्लांश्च घृतभृष्टान् ससैन्धवान् । कफानुगे यूपशाकं दद्याद्वातानुगे रसम् ॥ १४ ॥ पथ्यं सतीनयूषेण ससितैर्लाजसक्तुभिः । जलं खर्जूरमृद्वीकामधूकैः सपरूषकैः ॥ १५ ॥ शृतशीतं प्रयोक्तव्यं तर्पणायसशर्करम् । तर्पणं सघृतं क्षौद्रं लाजचूर्णैः प्रदापयेत् ॥ १६ ॥ ऊर्ध्वगं रक्तपित्तं तत् काले पीतं व्यपोहति । ह्रीबेरचन्दनोशीरमुस्तपर्पटकैः शृतम् ॥ केवलं शृतशीतं वा दद्यात्तोयं पिपासवे ॥१७॥ पयः सिताढ्यं शृतशीतमाजं गव्यं पयो वा प्रसमीक्ष्य वह्निम् । यष्टीमधूकार्जुनभावनीयं द्राक्षाबलागोक्षुरकैः शृतं वा ॥ १८ ॥ द्राक्षया फलिनीभिर्वा बलया नागरेण वा । श्वदंष्ट्रया शतावर्या रक्तजित्साधितं पयः ॥ १९ ॥ शृतेनाजेन पयसा सेपिष्टं कुङ्कुमं पिबेत् । ऊर्ध्वरक्तविनाशाय तेनैवाज्येन भोजनम् ॥ २० ॥ यष्टीमधुसमायुक्तं क्षीरं संक्काथ्य शीतलम् । शर्करामधुसंमिश्रं रक्तपित्तापहं पिबेत् ॥ २१ ॥ क्षीरेण लाक्षामधुमिश्रितेन प्रपीय जीर्णे पयसानुमद्यम् । सद्यो निहन्याद्रुधिरं क्षतोत्थं कान्तार्जुनानामथवापि कल्कः ॥ २२ ॥ कल्कं मधूकत्रिफलार्जुनानां निशि स्थितं लोहमये सुपात्रे । साज्यं विलिह्यात्तु पिबेत्सुशीतं सशर्करं छागपयः क्षतार्तः ॥ २३ ॥ वृषपत्राणि निष्पीड्य रसं समधुशर्करम् । अनेन प्रशमं याति रक्तपित्तं सुदारुणम् ॥ २४ ॥ मध्वाटरूपकरसौ यदि तुल्यभागौ कृत्वा नरः पिबति पुण्यतरः प्रभाते । तद्रक्तपित्तमतिदारुणमप्यवश्यमाशु प्रशाम्यति जलैरिव वह्निपुञ्जः ॥ २५ ॥ इति राजमार्तण्डात् । आटरूपकनिर्यूहः प्रियङ्गुमृत्तिकाञ्जने । विनीय लोध्रं सक्षौद्रं रक्तपित्तहरं पिबेत् ॥ २६ ॥ पिष्टानां वृषपत्राणां पुटपाको रसो हिमः । मधुयुक्तो जयेद्रक्तपित्तकासज्वरक्षयान् ॥ २७ ॥ इति वासापुटपाकः । वासायां विद्यमानायामाशायां जीवितस्य च । रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥ २८ ॥ वासाकषायोत्पलमृत्प्रियङ्गुलोध्राञ्जनाम्भोरुहकेसराणि । पीत्वा सिताक्षौद्रयुतानि जह्यात्पित्तासृजो वेगमुदीर्णमाशु ॥२९ ॥ आटरू-

---

१ (च०) काम्यानाम् । २ (च०) संपिष्टम् । ३ (च०) आजेन । ४ (च० छ०) सुदारुणम् । ५ (च०) काञ्जनैः । ६ (च०) हितः ।

पक्वमृद्वीकापथ्याक्काथः सशर्करः । क्षौद्राढ्यः कसनश्वासरक्तपित्तनिबर्हणः ॥ ३० ॥ मुद्राः सलाजाः सयवाः सकृष्णाः सोशीरमुस्ताः सह चन्दनेन । बलाजले पर्युषितः कषायः स रक्तपित्तं शमयत्युदीर्णम् ॥ ३१ ॥ ह्रीवेरं धान्यकं शुण्ठी चन्दनं मधुयष्टिका । वृषोशीरयुतः क्काथः शर्करामधुयोजितः ॥ ३२ ॥ रक्तपित्तं जयत्युग्रं तृष्णां दाहं ज्वरं तथा । उशीरं चन्दनं पाठा द्राक्षा मधुकपिप्पली ॥ ३३ ॥ सक्षौद्रं पाययेत्क्काथं रक्तपित्तं हरेद्ध्रुवम् । अमृता मधुकं चैव खर्जूरं गजपिप्पली ॥ ३४ ॥ क्काथः क्षौद्रयुतो ह्येष रक्तपित्तविकारनुत् । चन्दनेन्द्रयवौ पाठा कटुका सदुरालभा ॥ ३५ ॥ गुडूची वालुकं लोध्रं पिप्पलीक्षौद्रसंयुतम् । कफान्वितं जयेद्रक्तं तृष्णाकासज्वरापहम् ॥ ३६ ॥ शतावरी बला रास्ना काश्मर्यं सपरूषकम् । पाययेद्रक्तपित्तघ्नं सद्यः शूलहरं परम् ॥ ३७ ॥ त्रिफलाकृतमालभवं क्कथनं सितया मधुना मिलितं हरति । ननु शोणितपित्तरुजं विविधां घनदाहकपित्तजशूलदरम् ॥ ३८ ॥ अतसीकुसुमसमङ्गावटप्ररोहास्तृणाम्भसा पीताः । साधयति रक्तपित्तं यदि भुङ्क्ते मुद्गयूषेण ॥ ३९ ॥ पक्वोदुम्बरकाश्मर्यपथ्याखर्जूरगोस्तनी । मधुना घ्नन्ति संलीढा रक्तपित्तं पृथक् पृथक् ॥ ४० ॥ वासकस्वरसैः पथ्या सप्तधा परिभाविता । कृष्णा वा मधुना लीढा रक्तपित्तं दृढं जयेत् ॥ ४१ ॥ द्रवेण यावता द्रव्यमेकीभूयार्द्रतां व्रजेत् । तावत्प्रमाणं निर्दिष्टं भिषग्भिर्भावनाविधौ ॥४२॥ अभया मधुसंयुक्ता पाचनी दीपनी मता । श्लेष्माणं रक्तपित्तं च हन्ति शूलातिसारजित् ॥ ४३ ॥ लोहगन्धिनिभः श्वास उद्गारे रक्तगन्धिनि । मृद्वीकापणमात्रां तु खादेद्द्विगुणशर्कराम् ॥ ४४ ॥ उशीरकालीयकरोध्रपद्मकं प्रियङ्गुका कट्फलशङ्खगैरिकाः । पृथक् पृथक् चन्दनतुल्यभागिकाः सशर्करास्तण्डुलधावनप्लुताः॥४५॥ रक्तं च पित्तं तमकं पिपासां दाहं च पीताः शमयन्ति सद्यः॥४६॥ पलाशकल्कक्काथो वा सुशीतः शर्करान्वितः । पिबेद्वा मधुसर्पिर्भ्यां गवाश्वशकृतां रसम् ॥ ४७ ॥ सक्षौद्रं ग्रथिते रक्ते लिह्यात्पारावतं शकृत् । अतिनिःस्रुतरक्तो वा क्षौद्रेण रुधिरं पिबेत् ॥ ४८ ॥ खदिरस्य प्रियङ्गूणां कोविदारस्य शाल्मलेः । पुष्पचूर्णानि मधुना लिह्याद्वा रक्तपित्तनुत् ॥ ४९ ॥ अश्वत्थपत्राग्ररसात् षडंशो बोलोऽथ तस्माद्द्विगुणं मधु स्यात् । रक्तप्रवाहं हृदयस्थितं वा वातो यथाभ्रं हरते तथैव ॥ ५० ॥ मूलानि पुष्पाणि च मातुलुङ्ग्याः समं पिबेत्तण्डुलधावनेन । घ्राणप्रवृत्ते जलमाशु देयं सशर्करं नासिकयोः पयो वा । द्राक्षारसं क्षीरघृतं पिबेद्वा सशर्करं त्विक्षुरसं हितं वा॥ ५१ ॥ उदुम्बराणि पक्वानि गुडेन मधुनापि वा । उपयुक्तानि निघ्नन्ति नासारक्तं नृणां ध्रुवम् ॥ ५२ ॥ नस्यदाडिमपुष्पोत्थो रसो दूर्वाभवोऽथवा । आम्रास्थिजः पलाण्डोर्वा नासिकास्रुतरक्तजित् ॥५३॥ हरीतकी दाडिमपुष्पदूर्वा लाक्षारसो नस्यविधानयोगात् । निवारयत्येव चिरप्रवृत्तमप्याशु नासान्तरशोणितौघम् ॥ ५४ ॥ नासाप्रवृत्तरुधिरं घृतभृष्टं श्लक्ष्णपिष्टमामलकम् । सेतुरिव रुधिरवेगं रुणद्धि मूर्ध्नि प्रले-

पेन ॥ ५५ ॥ प्रियङ्गुमृत्तिकालोध्रमञ्जनं चेति चूर्णयेत् । तच्चूर्णं योजयेत्तत्र नस्ये क्षौद्रसमन्वितम् ॥ ५६ ॥ नासिकामुखपायुभ्यो योनिमेण्ढ्राच्च वेगितम् । रक्तपित्तस्रवं हन्ति सिद्ध एष प्रयोगराट् ॥ ५७ ॥ यत्र शस्त्रक्षते चैव रक्तं तिष्ठति वेगितम् । तद्‍प्यनेन चूर्णेन तिष्ठत्येवावचूर्णितम् ॥ मेण्ढ्रतोऽतिप्रवृत्तेऽस्रे बस्तिरुत्तर इष्यते॥५८॥

॥ अथ दूर्वाद्यं घृतम् ॥

दूर्वामुत्पलकिञ्जल्कं मञ्जिष्ठां सैलवालुकाम् । शिवालोध्रमुशीरं च मुस्ताचन्दनपद्मकैः ॥ १ ॥ विपचेत्कार्षिकैः कल्कैर्घृतप्रस्थं सुखाग्निना । तण्डुलाम्बुत्वजाक्षीरं दत्वा चैव चतुर्गुणम् ॥ २ ॥ तत्पानाद्वमतो रक्तं नावनं नासिकागतम् । कर्णाभ्यां यस्य गच्छेच्च तस्य कर्णौ प्रपूरयेत् ॥३॥ चक्षुःस्राविणि रक्ते च पूरयेत्तेन चक्षुषी । मेण्ढ्रपायुप्रवृत्तेषु बस्तिकर्म प्रकारयेत् ॥ रोमकूपप्रवृत्ते च तदभ्यङ्गं प्रयोजयेत्॥ ४ ॥ इति दूर्वाद्यं घृतम् ॥

॥ अथ वासादिघृतम् ॥

वासां सशाखां सदलां समूलां कृत्वा कषायं कुसुमानि चास्याः । प्रदाय कल्कं विपचेद्घृतं च सत्क्षौद्रमाश्वेव निहन्ति रक्तम् ॥१॥ इति वासादिघृतम् ॥ प्राणस्य कोविदारस्य वृषस्य ककुभस्य च । कल्काढ्यत्वात्पुष्पकल्कं प्रस्थे पलचतुष्टयम् ॥२॥ इति वृन्दात् ॥ सनास्यकोविदारस्य वृषस्य कुसुमस्य च । कल्काढ्यत्वात्प्रशंसन्ति पुष्पकल्कं चतुष्पलम् ॥ ३ ॥ इति योगतरङ्गिण्याः ॥

॥ अथ शतावरीघृतम् ॥

शतावरी दाडिमतित्तिडीकं काकोलिकन्दं मधुकं विदारी । पिष्ट्वा च मूलं फलपूरकस्य पचेद्घृतं क्षीरचतुर्गुणं तत् । कासज्वरोन्मादविबन्धशूलं तद्रक्तपित्तं विविधं निहन्ति ॥ १ ॥ इति शतावरीघृतम् ॥

॥ अथ चन्दनादिचूर्णम् ॥

चन्दनं नलदं लोध्रमुशीरं पद्मकेसरम् । नागपुष्पं च बिल्वं च भद्रमुस्तं सशर्करम् ॥ १ ॥ ह्रीबेरं चैव पाठा च कुटजोत्पलमेव च । शृङ्गबेरं सातिविषा धातकी सरसाञ्जनम् ॥ २ ॥ आम्रास्थिजम्बुसारास्थि तथा मोचरसोऽपि च । नीलोत्पलं समङ्गा च सूक्ष्मैला दाडिमत्वचः ॥ ३ ॥ चतुर्विंशतिरेतानि समभागानि कारयेत् । तण्डुलोदकसंयुक्तं मधुना सह योजयेत् ॥ ४ ॥ योगं लोहितपित्तानामर्शसां गरिणां तथा । मूर्च्छामदोपसृष्टानां तृष्णार्तानां प्रदापयेत् ॥ ५ ॥ अतिसारं तथा छर्दिं स्त्रीणां चापि रजोग्रहे । प्रच्युतानां च गर्भाणां स्थापनं परमिष्यते ॥ अश्विनोः सम्मतो योगो रक्तपित्तनिबर्हणः ॥ ६ ॥ इति चन्दनादिचूर्णम् ॥

---

१ (ख०) रसे । २ (ख०) नावनाच्चासिकागतम् । ३ (ख०) चक्षुर्भ्यां निर्गते ।

॥ अथैलादिगुटिका ॥

एला पत्रत्वचा द्राक्षा पिप्पल्यर्धपलं तथा । शिलामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ १ ॥ संचूर्ण्य मधुना युक्तां गुटिकां सम्यकल्पयेत् । अक्षमात्रां ततश्चैकां भक्षयेत्तां दिने दिने ॥ २ ॥ कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्च्छां मदं भ्रमम् । रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम् ॥ ३ ॥ शोषं प्लीहोर्ध्ववातं च स्वरभेदं क्षतं क्षयम् । गुटिका तर्पणी वृष्या रक्तपित्तं विनाशयेत् ॥ ४ ॥ इत्येलादिगुटिका ॥

॥ अथ कूष्माण्डावलेहः ॥

कूष्माण्डकात्पलशतं सुस्विन्नं निष्कुलीकृतम् । पचेत्तप्ते घृतप्रस्थे पात्रे ताम्रमये दृढे ॥ १ ॥ यदा मधुनिभः पाकस्तदा खण्डशतं न्यसेत् । पिप्पली शृङ्गबेरं च द्वे पले जीरकस्य च ॥ २ ॥ त्वगेला पत्रमरिचधान्यकानां पलार्धकम् । न्यसेच्चूर्णीकृतं तत्र दर्व्या तं घट्टयेत्ततः ॥ ३ ॥ लेहीभूते सुशीते च दद्यात् क्षौद्रं घृतार्धकम् । क्षौद्रार्धकां सितां केचिद्द्राक्षां केचित्सितार्धकाम् ॥ ४ ॥ द्राक्षार्धानि लवङ्गानि कर्षं कर्पूरकं क्षिपेत् । तद्यथाग्निबलं खादेद्रक्तपित्तक्षतक्षयी ॥ ५ ॥ कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः । वृष्यं पुनर्नवकरं बलवर्णप्रसाधनम् ॥ ६ ॥ उरस्सन्धानकरणं बृंहणं स्वरबोधनम् । अश्विभ्यां निर्मितं श्रेष्ठं कूष्माण्डकरसायनम् ॥ ७ ॥ इति कूष्माण्डावलेहः ॥

॥ अथ कूष्माण्डखण्डः ॥

खण्डकामलकान् गृह्याद्रसप्रस्थद्वयोन्मितः । खण्डकूष्माण्डके कंसः स्विन्नकूष्माण्डकद्रवात् ॥ १ ॥ अन्यत्र खण्डकूष्माण्डे सम्मतः सकलो रसः । पञ्चाशच्च पलं स्विन्नं कूष्माण्डात् प्रस्थमाज्यतः ॥ २ ॥ पक्वं पलशतं खण्डं वासाक्वाथाढके पचेत् । शिवा धात्री घनं भार्गी त्रिसुगन्धैश्च कार्षिकैः ॥ ३ ॥ तालीसविश्वधान्याकमरीचैश्च पलांशकैः । पिप्पलीकुडवं चैव मधुना सह दापयेत् ॥ ४ ॥ कासं श्वासं ज्वरं हिक्कां रक्तपित्तं हलीमकम् । हृद्रोगमम्लपित्तं च पीनसं च व्यपोहति ॥ ५ ॥ इति कूष्माण्डखण्डः ॥

॥ अथ वासाखण्डः ॥

तुलामादाय वासायाः पचेदष्टगुणे जले । तेन पादावशेषेण पाचयेदाढकं भिषक् ॥ १ ॥ चूर्णानामभयानां तु खण्डं शतपलं तथा । शीतीभूते निदध्यात्तु क्षौद्रस्याष्टौ पलानि च ॥ २ ॥ वंशोद्भवा च चत्वारि पिप्पली द्विपलं तथा । चातुर्जातपलं त्वेकं चूर्णितं तत्र दापयेत् ॥ ३ ॥ रक्तपित्तं निहन्त्याशु कासं श्वासं तथा क्षयम् । विद्रधिं जठरं गुल्मं तृष्णाहृद्रोगपीनसान् ॥ पलार्धं भोजनं चास्य यथेष्टं तत्र भोजनम् ॥ ४ ॥

---

१ (ख० ग० घ० ङ० च० छ०) खण्डकूष्माण्डः । २ (च०) कूष्माण्डकात् । ३ (च०) कूष्माण्डात् ।

॥ अथ खण्डकाद्यवलेहः ॥

शतावरी मुण्डितकाबलामृताफलत्वचः पुष्करमूलभार्गी । वृषो बृहत्यौ खदिरस्य मूलं पृथक् पृथक् पञ्च पलानि चात्र ॥ १ ॥ पक्कं जलद्रोणमितेऽष्टमांशं यावद्भवेच्छेषमथैव पूतम् । विमूर्च्छितस्यापि निधाय धीमान्पलानि च द्वादश माक्षिकस्य ॥२॥ तथा सुवर्णस्य च लोहजस्य विद्याद्धितं खण्डघृतस्य तुल्यम् । देयं पलं षोडशकं विधिज्ञो विपाचयेल्लोहमये कटाहे ॥ ३ ॥ गुडेन तुल्यं च यदा भवेत्तदा तुगा विडङ्गं मगधा च शुण्ठी । द्वे जीरके कर्कटकं फलत्रिकं धान्यं मरीचं सकणासकेसरम् ॥ ४ ॥ पलेन मात्रां विदधीत तत्पृथक् सुघट्टितं चूर्णमिदं घृतेन । स्निग्धे कटाहे प्रणिधाय युञ्ज्यात्कर्षप्रमाणं विदधीत चूर्णम् ॥ ५ ॥ प्रभातकाले त्वनुदुग्धपानं गुरूणि चान्नानि च भोजनानि । रक्तं सपित्तं सहसा निहन्ति रक्तप्रवाहं च सरक्तशूलम् ॥ ६ ॥ रक्तातिसारं रुधिरप्रमेहं तथैव वस्तौ विहितं नराणाम् । भगन्दरार्शः श्वयथुं निहन्ति तथाम्लपित्तं किल राजरोगम् ॥ ७ ॥ विशेषतः कुष्ठरुजश्च गुल्मान्बलप्रदं वृष्यतमं प्रदिष्टम् ॥ ८ ॥ इति खण्डकाद्यवलेहः ॥

॥ अथ रसाः ॥

शुद्धपारदबलिप्रवालकं हेममाक्षिकभुजङ्गरङ्गकम् । मारितं सकलमेतदुत्तमं भावयेत्पृथक् पृथक् द्रवैस्त्रिशः ॥ १ ॥ चन्दनस्य कमलस्य मालतीकोरकस्य वृषपल्लवस्य च । धान्यवारणकणाशतावरीशाल्मलीवटजटामृतस्य च ॥ २ ॥ रक्तपित्तकुलकण्डनाभिधो जायते रसवरोऽस्रपित्तिनाम् । प्राणदो मधुवृषद्रवैरयं सेवितस्तु वसुकृष्णलैर्मितः । नास्त्यनेन सममत्र भूतले भेषजं किमपि रक्तपित्तिनाम् ॥३॥ इति रक्तपित्तकुलकुठारो रसः ॥

॥ अथ वासामृतः ॥

आटरूषनवपल्लवद्रवे पालिके सरसभस्मवल्लकम् । कर्षसंमितमधुप्रयोजितम् माश्य नाशयति रक्तपित्तकम् ॥ १ ॥ इति वासामृतः ॥

॥ अथ बोलपर्पटी ॥

सूतगन्धकसुकज्जलिकायाः पर्पटी समयुता समभागम् । बोलचूर्णविहितं प्रतिवाप्यं स्याद्रसोऽयमसृगामयहारी ॥ १ ॥ वल्लयुग्मयुगुलं प्रतिदेयं शर्करामधुयुतः किल दत्तः । रक्तपित्तगुदजार्तियोनिस्रावमाशु विनिवारयतीशः ॥ २ ॥ इति बोलपर्पटी ॥

॥ अथ सुधानिधिरसः ॥

गन्धं सूतं माक्षिकं लोहचूर्णं सर्वं घृष्टं त्रैफलेनोदकेन । लौहे पात्रे गोपयसा च

---

१ (क०) घृते तु तुल्ये । देये पलैः षोडशकैर्वि० २ (क०) गोपयस्यं । क० । गोपयोभिश्च ।

कृत्वा रात्रौ दद्याद्रक्तपित्तप्रशान्त्यै ॥ १ ॥ इति सुधानिधिरसः ॥ यच्च पित्तज्वरे प्रोक्तं बहिरन्तश्च भेषजम् । रक्तपित्ते हितं तच्च क्षतक्षीणे हितं च यत् ॥ २ ॥ इति रक्तपित्तचिकित्सा ॥

॥ अथ राजयक्ष्मनिदानम् ॥

अनेकरोगानुगतो बहुरोगपुरोगमः । राजयक्ष्मा क्षयः शोषो रोगराडिति स स्मृतः ॥१॥ नक्षत्राणां द्विजानां च राजा चाभूदयं पुरा । यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥ २ ॥ राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः । तस्मात्तं राजयक्ष्मेति प्रवदन्ति मनीषिणः ॥ ३ ॥ देहौषधक्षयकृते क्षयस्तत्सम्भवाच्च सः । रसादिशोषणाच्छोषो रोगराट् तेषु राजनात् ॥ ४ ॥

॥ अथ तत्र कारणचतुष्टयमाह ॥

वेगरोधात्क्षयाच्चैव साहसाद्विषमाशनात् । त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात्॥१॥क्षयः शोषो राजयक्ष्मा रोगराडिति कीर्तितः । यावद्दोषा रसस्थानं नाप्नुवन्ति विशेषतः ॥ २ ॥ न भजेच्च ज्वरस्तावत् प्राप्ते प्राप्ते प्रवर्तते । कफप्रधानैर्दोषैर्हि रुद्धेषु रसवर्त्मसु ॥ ३ ॥ अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः । क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥ ४ ॥

॥ पूर्वरूपमाह ॥

श्वासाङ्गसादकफसंस्रवतालुशोषवम्यग्निसादमदपीनसकासनिद्राः । शोषे भविष्यति भवन्ति स चापि जन्तुः शुक्लेक्षणो भवति मांसपरो रिरंसुः ॥ १ ॥ स्वप्नेषु काकशुकशल्लकनीलकण्ठगृध्रास्तथैव कपयः कृकलासकाश्च । तं वाहयन्ति स नदीर्विजलाश्च पश्येच्छुष्कांस्तरून्पवनधूमदवार्दितांश्च ॥ २ ॥ त्रिरूपं दर्शयन्नाह । अंसपार्श्वाभितापाश्च सन्तापः करपादयोः । ज्वरः सर्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥ १ ॥ अग्निमान्द्यं ज्वरः शैत्यं वान्तिः शोणितपूययोः । सत्त्वहानिश्च दौर्बल्यं रोगराजस्य लक्षणम् ॥ २ ॥ दोषभेदेन एकादश रूपाण्याह ॥ स्वरभेदोऽनिलाच्छूलं सङ्कोचश्चांसपार्श्वयोः । ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥ ३ ॥ शिरसः परिपूर्णत्वमभक्तच्छन्द एव च । कासकण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः ॥ ४ ॥ तस्य षड्रूपाण्यपि दर्शयितुमाह ॥ भक्तद्वेषो* ज्वरः कासः श्वासशोणितदर्शनम् । स्वरभेदश्च जायन्ते षडेते राजयक्ष्मणि ॥ ५ ॥ एकादशभिरेतैर्वा षड्भिर्वापि समन्वितम् । कासातिसारपार्श्वार्तिस्वरभेदारुचिज्वरैः ॥ ६ ॥ त्रिभिर्वा पीडितं लिङ्गैः कासश्वासासृगामयैः । जह्याच्छोषार्दितं जन्तुमिच्छन्सुविपुलं यशः ॥ ७ ॥ सर्वैरर्धैस्त्रिभिर्वापि लिङ्गैर्मांसबलक्षयैः । युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोऽप्य-

---

* भक्तस्य श्रवणस्मरणदर्शनस्पर्शनैर्यत्रोद्विजते स भक्तद्वेषः

१ (ख०) क्षयकरः । २ (ख० ग० घ० ङ० च० छ०) रोगरञ्जनात् । ३ (च०) ज्वरकासा । ४ (च०) क्षये ।

शोऽन्यथा ॥ ८ ॥ महाशनं क्षीयमाणमतीसारनिपीडितम् । शूनमुष्कोदरं चैव यक्ष्मिणं परिवर्जयेत् ॥ ९ ॥ उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं नरम् । शुक्राक्षमद्वेष्टारमूर्ध्वश्वासनिपीडितम् ॥ १० ॥ कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवम् । व्यवायशोकवार्धक्यव्यायामाध्वप्रशोषितान् ॥ ११ ॥ व्रणोरःक्षतसंज्ञौ च शोषिणौ लक्षणैः शृणु ॥ शुक्रक्षयलक्षणमाह । शुक्रक्षये रतेऽशक्तिर्व्यथा शेफसि मुष्कयोः ॥१२॥ चिरेण शुक्रसेकः स्यात्सेके रक्ताल्पशुक्रता । व्यवायशोषी शुक्रस्य क्षयलिङ्गैरुपद्रुतः ॥१३॥ पाण्डुदेहो यथा पूर्वं क्षीयन्ते चास्य धातवः । प्रध्यानशीलः स्रस्ताङ्गः शोकशोष्यपि तादृशः ॥१४॥ चिन्ताशुक्रक्षयकृतैर्विकारैरुपलक्षितः ॥१५॥ जराशोषिलक्षणमाह ॥ जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः । दौर्बल्यं मुखशोषश्च पाण्डुत्वं सदनं भ्रमः ॥१६॥ क्लैब्यं शुक्रविसर्गश्च क्षीणशुक्रस्य लक्षणम् । कम्पनोऽरुचिमान्भिन्नकांस्यपात्रसमस्वनः ॥ १७ ॥ ष्ठीवति श्लेष्मणा हीनं गौरवारतिपीडितः । संप्रस्रुताक्षिनासास्यः शुष्करूक्षमलच्छविः ॥ १८ ॥ अध्वशोषिणमाह ॥ अध्वप्रशोषी स्रस्ताङ्गः सम्भृष्टपरुषच्छविः । प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः ॥१९॥ व्यायामशोषिलक्षणमाह ॥ व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः । लिङ्गैरुरःक्षतकृतैः संयुक्तश्च क्षताद्विना ॥ २० ॥ व्रणशोषिणमाह ॥ रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् । व्रणिनश्च भवेच्छोषः स चासाध्यतमो मतः ॥ २१ ॥ परं दिनसहस्रं तु यदि जीवति मानवः । सुभिषग्भिरुपक्रान्तस्तरुणः शोषपीडितः ॥ २२ ॥ मलायत्तं बलं पुंसां शुक्रायत्तं तु जीवितम् । तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥ २३ ॥ इति राजयक्ष्मनिदानम् ॥

॥ अथातो राजयक्ष्मचिकित्सां व्याख्यास्यामः ॥

किञ्चिल्लिङ्गयुतं दीप्तपावकं त्वकृशं नरम् । उपाचरेदात्मवन्तं यक्ष्मिणं साध्यलक्षणम् ॥ १ ॥ अर्धलिङ्गैः कृच्छ्रसाध्यं सर्वलिङ्गैः परित्यजेत् । यक्ष्मिणं शुक्लनयनं तथा भक्तद्विषं कृशम् ॥ २ ॥ तथोर्ध्वश्वासिनं कृच्छ्रं मेहन्तं परिवर्जयेत् । क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः ॥ ३ ॥ व्यवायशोषिणं क्षीररसमांसाज्यभोजनैः । मुकुलैर्मधुरैर्गन्धैर्जीवनीयैरुपाचरेत् ॥ ४ ॥ व्रणशोषं जयेत्स्निग्धैर्दीपनैः स्वादुशीतलैः । दीपनैर्लघुभिश्चान्नैः शोकशोषमुपाचरेत् ॥ ५ ॥ हर्षणाश्वासनैः क्षीरैः स्निग्धैर्मधुरशीतलैः । आस्यासुखैर्दिवास्वप्नशीतैर्मधुरबृंहणैः ॥ ६ ॥ तत्र मांसरसाहारैरध्वशोषिणमाचरेत् । ईषदम्लैरनम्लैर्वा यूषमांसरसादिभिः ॥ ७ ॥ व्यायामशोषिणं स्निग्धैः क्षतक्षयहितैर्हिमैः । उपचारैर्जीवनीयैर्विधिना श्लैष्मिकेण तु ॥ ८ ॥ बलिनो बहुदोषस्य वमनं रेचनं तथा । वातश्लेष्महरं कार्यं दद्याद्दोषापहं पुरा ॥९॥ यक्ष्मिणः क्षीणदेहस्य यत्कृतं स्याद्विषोपमम् । वृन्ताकं कारवेल्लं च तैलं बिल्वं च राजिकाम् ॥१०॥ मैथुनं च दिवा निद्रां क्षयी कोपं च वर्जयेत् । शालिषष्टिकगो-

---

१ (च०) बिना । २ (च०) वधि । ३ (च०) रक्तमांस० (ग० क० छ०) तक्रमांस०

धूमयवमुद्रादयः शुभाः ॥ ११ ॥ मद्यानि जाङ्गलाः पक्षिमृगाः शस्ताः विशुष्यतः । मूलकानां कुलत्थानां यूषैर्वा सूपसंस्कृतैः ॥ १२ ॥ सपिप्पलीकं सयवं सकुलत्थं सनागरम् । दाडिमामलकोपेतं स्निग्धमाजरसं पिबेत् ॥ १३ ॥ तेन षड् विनिवर्तन्ते विकाराः पीनसादयः । सधान्ययवगोधूममुद्राश्चापि सदा हिताः ॥१४॥ त्रिपश्चतुष्पदे श्रेष्ठाः पुमांसो विहगा मताः । हरिणच्छागमांसं तु श्लक्ष्णचूर्णीकृतं शुभम् ॥ १५ ॥ अजाक्षीरेण पातव्यं क्षयव्याधिनिवारणम् । छागमांसं पयश्छागं सर्पिश्छागं सशर्करम् ॥ छागोपसेवा सततं छागमध्ये तु यक्ष्मनुत् ॥ १६ ॥

॥ अथ षडङ्गयूषः ॥

द्रव्यतो द्विगुणं मांसं सर्वतोऽष्टगुणं जलम् । पादस्थं संस्कृतं चाज्ये षडङ्गो यूष उच्यते ॥ १ ॥ इति षडङ्गयूषः । धान्यकं पिप्पलीविश्वदशमूलीजलं पिबेत् । पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥ १ ॥ दशमूलबलारास्नापुष्करामरदारुनागरैः क्वथितम् । पेयं पार्श्वासशिरोरुकक्षतकासादिशान्तये सलिलम् ॥ २ ॥ इति दशमूलादिः ॥ ककुभत्वग्नागरबलाबातारिबीजानि चूर्णितं पीतम् । पक्वं मधुघृतयुक्तं सशिवं यक्ष्मादिकासहरम् ॥ १ ॥ अश्वगन्धामृता भीरुदशमूली बलावृषम् । पुष्करातिबला हन्ति क्षयं क्षीररसाशिनः ॥ २ ॥

॥ अथ तालीसाद्यं चूर्णम् ॥

तालीसपत्रं मरिचं नागरं पिप्पली तुगा । यथोत्तरं भागवृद्ध्या त्वगेले चार्धभागिके ॥ १ ॥ पिप्पल्यष्टगुणा चात्र प्रदेया सितशर्करा । कासश्वासारुचिहरं तच्चूर्णं दीपनं परम् ॥ पाण्डुत्त्हृद्ग्रहणीदोषप्लीहशोषज्वरापहम् ॥ २ ॥ अथ सितोपलाद्यं चूर्णम् ॥ सितोपला षोडश स्यादष्टौ स्याद्वंशरोचना । पिप्पली स्याच्चतुष्कर्षा एला स्याच्च द्विकार्षिका ॥ १ ॥ एककर्षस्त्वचः कार्यश्चूर्णयेत्सर्वमेकतः । सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत् ॥ २ ॥ कासश्वासक्षयहरं हस्तपादाङ्गदाहजित् । मन्दाग्निं सुप्तजिह्वत्वं पार्श्वशूलमरोचकम् । ज्वरमूर्ध्वगतं रक्तपित्तमाशु व्यपोहति ॥ ३ ॥ अथ लवङ्गादिचूर्णम् ॥ लवङ्गकक्कोलमुशीरचन्दनं नतं सनीलोत्पलकृष्णजीरकम् । एला सकृष्णागरुभृङ्गकेसरं कणा सविश्वानलदं सहाम्बुना ॥ १ ॥ कर्पूरजातीफलवंशरोचनं सितार्धभागं समसूक्ष्मचूर्णितम् । संरोचनं तर्पणमग्निदीपनं बलप्रदं वृष्यतमं त्रिदोषनुत् ॥ २ ॥ उरोविबन्धं तमकं गलग्रहं सकासहिध्मारुचि यक्ष्मपीनसम् । ग्रहण्यतीसारमथास्रजः क्षयं प्रमेहगुल्मांश्च निहन्ति सत्वरम् ॥ ३ ॥ अथ कर्पूराद्यं चूर्णम् ॥ कर्पूरचोचकक्कोलजातीफलदलाः समाः । लवङ्गमांसीमरिचकृष्णाशुण्ठ्यो विवर्धिताः ॥ १ ॥ चूर्णं सितासमं हृद्यं सदाहक्षय-

---

१ (ख० ग० घ० ङ० च० छ०) शुभा । २ (ङ०) द्विकार्षिका । ३ (च०) द्विका ।

कासजित् । वैस्वर्यपीनसश्वासच्छर्दिकण्ठामयापहम् । प्रयुक्तं चान्नपानैर्वा भेषजद्वेषिणां हितम् ॥ २ ॥ इति हृदयदाहे कर्पूराद्यं चूर्णम् ॥

॥ अथैलादिचूर्णम् ॥

एलापत्रं नागपुष्पं लवङ्गं भागस्त्वेषां द्वौ च खर्जूरकस्य । द्राक्षायष्टीशर्करापिप्पलीनां चत्वारस्तत्क्षौद्रयुक्तं क्षये स्यात् ॥ १ ॥

॥ अथाश्वगन्धाचूर्णम् ॥

अश्वगन्धादशपलं तदर्धं नागरान्वितम् । तदर्धं कणया युक्तं मरीचं च चतुर्थकम् ॥ १ ॥ चातुर्जातं वराङ्गं च भार्गीतालीसपत्रकम् । कचोराजाजिकैडर्यमांसीकक्कोलमुस्तकम् ॥ २ ॥ रास्नाकटुकरोहिण्याजीवन्तीकुष्ठकं तथा । प्रायः कर्षमितं चूर्णं चूर्णेन समशर्करा ॥ ३ ॥ प्रातःकाले लिहेद् चूर्णं जलेनोष्णेन सेवयेत् । वातक्षये पित्तशोषे त्वजागोघृतसंयुतम् ॥ ४ ॥ श्लेष्मक्षये क्षौद्रयुतं नवनीतेन मेहजित् । शिरोभ्रमे च पित्तार्ते गोक्षीरेण समायुतम् ॥ ५ ॥ क्षतक्षीणे च देहे च विशेषबलवर्धनम् । मेदोहरं च मन्दाग्निकुक्षिशूलोदरापहम् ॥ अनुपानविशेषेण सर्वरोगहरं परम् ॥ ६ ॥

॥ अथ द्राक्षादिचूर्णम् ॥

द्राक्षालाजसितोत्पलं समधुकं खर्जूरगोपीतुगाह्वीबेरामलकाब्दचन्दननतं कक्कोलजातीफलम् । चातुर्जातकणा सधान्यकमिदं चूर्णं समां शर्करां प्रातर्भक्षितमात्मकेन विधिना पित्तं सदाहं जयेत् ॥ १ ॥ मूर्च्छां छर्दिमरोचकं च शमयेत् कायस्य कान्तिप्रदं पाण्डुं कामलरक्तपित्तमुदरं दाहज्वरारोचकम् । यक्ष्माणं रुधिरप्रमेहहरणं तद्योनिदोषापहं रक्तार्शोमदवृद्धिविद्रधिहरं द्राक्षादिचूर्णोत्तमम् ॥ २ ॥ यवगोधूमचूर्णं वा क्षीरसिद्धं घृतप्लुतम् । सक्तून्वा सर्पिषा क्षौद्रसिताक्तान्क्षयशान्तये ॥ ३ ॥

॥ अथ चतुर्दशाङ्गलोहम् ॥

रास्नाकर्पूरतालीसं भेकपर्णी शिलाजतु । त्रिकटु त्रिफला मुस्ता विडङ्गदहनाः समाः ॥ १ ॥ चतुर्दशायसो भागास्तच्चूर्णं मधुसर्पिषा । लीढं कासं ज्वरं श्वासं राजयक्ष्माणमेव च ॥ बलवर्णाग्निपुष्टीनां वर्धनं दोषनाशनम् ॥ २ ॥

॥ अथ बृहन्नवायसम् ॥

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः । नवभागोन्मितैरेतैः समं तीक्ष्णं मृतं भवे-

---

१ (घ०) वैवर्ण्य । २ (ग० च०) क्षये । ३ (च०) संस्कृत्य । ४ (च०) सिताक्तं । ५ (ख० ग० च०) बृहन्नयायसम् ।

त् ॥ १ ॥ सञ्चूर्ण्यालोडयेत्क्षौद्रे नित्यं यः सेवते नरः । कासं श्वासं क्षयं मेहं पाण्डु-रोगं भगन्दरम् । ज्वरं मन्दानलं शोथं सम्मोहं ग्रहणीं जयेत् ॥ २ ॥

॥ अथ शिलाजतुयोगः ॥

फलत्रिकक्काथविशुद्धमादौ शीघ्रं गुडूच्या दशमूलसिद्धम् । स्थिरादिकाकोलियुगादिसिद्धं शिलाजतु स्यात्क्षयिषु प्रशस्तम् ॥ १ ॥ द्राक्षाखर्जूरसर्पिर्भिः पिप्पल्या च सह स्मृतम् । सक्षौद्रं ज्वरकासघ्नं स्वर्यं चैतत्प्रयोजयेत् ॥ २ ॥ मधुताप्यविडङ्गाश्मजतुलोहघृताभयम् । हन्ति यक्ष्माणमत्युग्रं सेव्यमानं हिताशिना ॥३॥ शिलाजतुमधुव्योषताप्यलोहरजांसि च । क्षीरभुग्लेहिनश्चाशु क्षयः क्षयमवाप्नुयात् ॥ ४ ॥ कृष्णाद्राक्षासितालेहः क्षयेद्वा क्षौद्रतैलवान् । मधुसर्पिर्युतो वाश्वगन्धाकृष्णासितोद्भवः ॥ ५ ॥ कूष्माण्डकगिरोत्थेन रसेन परिपेषितम् । लाक्षाकर्षद्वयं पीत्वा जयेद्रक्तक्षयं तथा ॥ ६ ॥ शतपुष्पा समधुकं कुष्ठं तगरचन्दनम् । आलेपनं स्यात्सघृतं शिरःपार्श्वांसशूलनुत् ॥ ७ ॥ अश्वत्थवल्कलं चैव त्रिकटुं लोहकिट्टकम् । गुडेन सह दातव्यं क्षयरोगविनाशनम् ॥८॥ अथ चिकित्साकलिकातश्च्यवनप्राशयावलेहः ॥ द्विपञ्चमूलीजलसिद्धमाज्यं वासाघृतं वाप्यथ षट्पलं च । पेयं हि तच्छागलगव्यतोऽथ प्रयुज्यते नागबलाभिधानम्॥१॥शृङ्गीतामलकीफलत्रिकबलाछिन्नाविदारीसटीजीवन्तीदशमूलचन्दनघनैर्नीलोत्पलैलावृषैः । मृद्वीकाष्टकवर्गपौष्करयुतैः सार्धं पृथक् पालिकैरष्टोनानि शतानि पञ्च विपचेद्धात्रीफलानामपः ॥ २ ॥ उद्धृत्यामलकानि तैलघृतयोः षड्भिश्च षड्भिः पलैर्भृष्टान्यर्धतुलां निधाय विधिवन्मत्स्यण्डिकायाः पचेत् । शीते षण्मधुनः पलानि कुडवो वांश्याश्चतुर्जाततो मुष्टिर्मागधिकाफलद्वयमयं प्राशयः स्मृतश्च्यावनः ॥ ३ ॥ न शोषः साफल्यं व्रजति वपुषि क्षीणमनसो न मूर्च्छा नो छर्दिस्तदपि च न च श्वासकसनम् । न चालक्ष्मीर्विघ्नः क्वचिदपि च न व्यापदभयं प्रयोगादेतस्मान्मनसिजधियो बिभ्रति मनः ॥ ४ ॥ इति च्यवनप्राशयः ॥ अथ खण्डपिप्पल्यवलेहः ॥ कृष्णाप्रस्थं पचेचाढकपयसि घृतस्याञ्जलिं खण्डपात्रं दत्वा लेहोऽयमस्मिन्सुरकुसुमचतुर्जातविश्वोषणादीन् । ग्रन्थिश्रीखण्डयष्टीमधुमसृणजलं जातिकोशं च कर्षं प्रत्येकं चूर्णयित्वा मधुकुडवयुतः स्याच्च कृष्णावलेहः ॥ १ ॥ आदौ मन्दाग्निकार्श्यं हरति स च शिशुस्त्रीजरन्मानुषेषु प्रायो वृष्यः क्षयाद्यो विपुलबलकरो दीपनः पाचनश्च । कासश्वासांश्च मेहक्षयरुगतितृषाकामलापाण्डुकण्डूप्लीहाजीर्णज्वरांश्चानिलकफविकृतिं रक्तपित्तं च हन्यात् ॥ २ ॥ अथ वासावलेहः ॥ तुलामादाय वासायाः पचेदष्टगुणे जले । तेन पादावशेषेण पाचयेदाढकं भिषक् ॥ १ ॥ चूर्णानामभयानां तु खण्डच्छेदशतं तथा । द्वे पले पिप्पलीचूर्णात्सिद्धे शीते च माक्षिकात् ॥ २ ॥ कुडवं पलमानं तु चातुर्जातं सुचूर्णितम् । क्षिप्त्वावलोडितं खादेद्रक्तपित्तक्षतक्षयी । कासश्वासगृहीतश्च यक्ष्मणा च विशेषतः ॥३॥ इति वासावलेहः । शार्ङ्ग-

---

१ (च०) क्षीरयुग्लेहिन—२ (च०) क्षये वा । ३ (च०) पल । ४ (च०) खण्डाच दशकं ।

धरादगस्त्यवलेहः। हरीतकीशतं भद्रं यवानामाढकं तथा। पलानां दशमूलस्य विंशतिं च नियोजयेत् ॥ १ ॥ चित्रकः पिप्पलीमूलमपामार्गः सटी तथा। कपिकच्छुः शङ्खपुष्पी भार्गी च गजपिप्पली ॥ २ ॥ बला पुष्करमूलं च पृथग् द्विपलमात्रया। पचेत्पञ्चाढके नीरे यवैः स्विन्नैः शृतं नयेत् ॥३॥ तत्राभयाशतं दद्यात्क्वाथे तस्मिन्विचक्षणः। सर्पिस्तैलाष्टपलिकं क्षिपेद् गुडतुलां तथा ॥ ४ ॥ पक्त्वा लेहत्वमानीय सिद्धशीते पृथक् पृथक्। क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया ॥ ५ ॥ हरीतकीद्वयं खादेत्तेन लेहेन नित्यशः। क्षयं कासं ज्वरं श्वासं हिक्काशोंऽरुचिपीनसान् ॥ ६ ॥ ग्रहणीं नाशयत्येष वलीपलितनाशनः। बलवर्णकरः पुंसामवलेहो रसायनम् ॥ ७॥ विहितोऽगस्त्यमुनिना सर्वरोगप्रणाशनः। शर्करामधुसंयुक्तं नवनीतं लिहन् क्षयी। क्षीराशी लभते पुष्टिमतुल्ये चाज्यमाक्षिके ॥ ८ ॥

॥ अथ शिवगुटिका ॥

त्रीन्वारान् प्रथमं शिलाजतुजले भाव्यं भवेत्त्रैफले निष्क्वाथे दशमूलजेऽथ तदनुच्छिन्नोद्भवाया रसे। वाट्यालक्कथने पटोलसलिले यष्टीकषाये पुनर्गोमूत्रेऽथ पयस्यथापि च गवामेषां कषाये ततः ॥ १ ॥ द्राक्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिरापौष्करैः पाठाकौटजकर्कटाख्यकटुकारास्नाम्बुदालम्बुषैः। दन्तीचित्रकचव्यवारणकणावीराष्टवर्गौषधैरब्द्रोणे चरणस्थिते पलमितैरेभिः पृथग्भावयेत् ॥ २॥ धात्रीमेषविषाणिकात्रिकटुकैरेभिः पृथक् पञ्चकैर्द्रव्यैश्च द्विपलोन्मितैरपि पलं चूर्णं विदारीभवम्। तालीसात्कुडवं चतुष्पलमिह प्रक्षिप्यते सर्पिषस्तैलस्य द्विपलं पलाष्टकमथ क्षौद्राद्भिषग् योजयेत् ॥ ३ ॥ तुल्यं पलैः षोडशभिः सितायास्त्वक्क्षीरिकापत्रककेसरैश्च। बिल्वांशकैस्त्वक्त्रुटिसम्प्रयुक्तैरित्यक्षमात्रा गुटिकाः प्रकल्प्याः ॥ ४ ॥ तासामेकतमां प्रयोज्य विधिवत्प्रातः पुमान्भोजनात्प्राग्वा मुद्गदलाम्बुजाङ्गलरसं शीतं शृतं वा जलम्। माक्षीकं मदिरामगुर्वशनभुक् पीत्वा पयो वा गवां प्राप्नोत्यङ्गमनङ्गवत्सुभगतां संपन्नमानन्दकृत् ॥ ५ ॥ शोफग्रन्थिविमन्थवेपथुवमीपाण्ड्वामयश्लीपदप्लीहार्शःप्रदरप्रमेहपिटिकामेहाश्मरीशर्कराः। हृद्रोगार्बुदवृद्धिविद्रधियकृद्योन्यामयाः सानिला ऊरुस्तम्भभगन्दरं ज्वररुजस्तूनी प्रतूनी तृषा ॥ ६ ॥ वातासृक् प्रबलं प्रवृद्धमुदरं कुष्ठं किलासं कृमीन्कासश्वासमुरःक्षतक्षयमसृक्पित्तं सपानात्ययम्। उन्मादं मदमप्यपस्मृतिमतिस्थौल्यं कृशत्वं तनोः सालस्यं च हलीमकं च शमयेन्मूत्रस्य कृच्छ्राणि च ॥७॥ भवति जरया सर्वश्वेतैरकालजराकृतैर्वृतमलिकुलाकारैरेभिः शिरश्च शिरोरुहैः। प्रसरति बलं त्वस्तातङ्कं वपुश्च समुद्वहन्प्रभवति शतं स्त्रीणां गन्तुं जनो जनवल्लभः ॥ ८ ॥ स्तिमितमतिरप्यज्ञानान्धः सदस्यपटुः पुमान् सकृदपि यया ज्ञानोपेतः श्रुतिस्मृतिमान् भवेत्। व्रजति च यया युक्तो योगी शिवस्य समीपतां शिवगुटिकया कस्तामेतां करोति न मानुषः ॥ ९ ॥ इति शिवगुटिका ॥

॥ अथ लघुशिवगुटिका ॥

कौटजत्रिफलानिम्बपटोलघननागरैः । भावितानि दशाहानि रसैर्द्वित्रिगुणानि च ॥१॥ शिलाजतुपलान्यष्टौ तावती सितशर्करा । त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्यान् पलोन्मितान् ॥२॥ निदिग्धिफलमूलाभ्यां पलं युञ्ज्यात्त्रिजातकान् । मधुत्रिफलसंयुक्तान्कुर्यादक्षसमान्गुडान् ॥ ३ ॥ दाडिमाम्रपयःक्षीररसयूषसुरासवान् । तं भक्षयित्वानुपिबेन्निरन्नो हितभक्ष्यभाक् ॥ ४ ॥ पाण्डुकुष्ठज्वरप्लीहतमकार्शोभगन्दरम् । नाशयेन्मूत्रकृच्छ्राणि मूत्रस्थानविबन्धनात् ॥५॥ यद्यत्र विनेतो येन कान्तलोहं तथाभ्रकम् । पलं पलं च मिलितं तदा स्यात् किमतः परम् ॥ ६ ॥ तीव्रदुःखप्रदं पाण्डुं प्रमेहं सपरिग्रहम् । राजरोगं च व्याधींश्च जयेदिति किमद्भुतम् ॥ ७ ॥ इति लघुशिवगुटिका ॥ अथ सूर्यप्रभागुटिका ॥ दार्वी व्योषविडङ्गचित्रकवचापीताकरञ्जामृतादेवाह्वातिविषा त्रिवृत्सकटुका कुस्तुम्बरुः कारवी । द्वौ क्षारौ लवणत्रयं गजकणा चव्यं तथा पुष्करं तालीसं कणमूलपुष्करजटाभूनिम्बसंज्ञैर्युतम् ॥ १ ॥ भार्गी पद्मकजीरकैशकुटजो दन्ती वचा भद्रकं सर्वं कर्षसमांशकं सुभिषजा सूक्ष्मं च संचूर्णितम् । तद्वत्पञ्चपलं वरं गिरिजतु स्यात्पञ्चमुष्टिः पुरो लोहस्य द्विपलं पलद्वयमथो ताप्यस्य सम्मिश्रितम् ॥ २ ॥ क्षिप्त्वा पञ्च पलानि शुभ्रसिकता वांशीपलं योजितमेकैकं त्रिसुगन्धि वस्तुपलिकं क्षौद्रैर्घृतैर्लेहवत् । एकीकृत्य समांशमेव गुटिका कार्या सुवर्णोन्मिता सा च ब्रह्ममुखाम्बुजप्रकटिता सूर्यप्रभा नामतः ॥ ३ ॥ शोषं कासमुरःक्षतं सतमकं पाण्ड्वामयं कामलां गुल्मं विद्रधिपार्श्वशूलमुदरं स्त्रीषु क्षयं च क्रिमीन् । कुष्ठार्शोविषमज्वरग्रहणिकामूत्रग्रहं नाशयेद्भुक्त्वैकां गुटिकां प्रहृष्टमनसा योज्यं यथेष्टाशनम् ॥ ४ ॥ नास्त्येतत्समभौषधं त्रिजगतांचक्रे हितं प्राणिनामुद्दामप्रमदामदद्विपदराट्सिंही तु सूर्यप्रभा ॥ ५ ॥ इति सूर्यप्रभा गुटिका ॥

॥ अथ घृतानि ॥

अथ बलाद्यं घृतम् । बलाश्वदंष्ट्रा बृहती कलशी धावनी स्थिरा । निम्बः पर्पटकं मुस्तं त्रायमाणं दुरालभा ॥ १ ॥ कृत्वा कषायं पेयार्थं दद्यात्तामलकीं सटीम् । द्राक्षां पुष्करमूलं च मेदामामलकानि च ॥ २ ॥ घृतं पयश्च तत्सिद्धं सर्पिर्ज्वरहरं परम् । क्षयकासप्रशमनं शिरःपार्श्वरुजापहम् ॥ ३ ॥ इति बलाद्यं घृतम् ॥ अथ कोलाद्यं घृतम् । कोललाक्षारसे तद्वत्क्षीराष्टगुणसाधितम् । कल्कैः षडङ्गदार्वीत्वग्द्राक्षाक्षोटफलान्वितम् ॥ १ ॥ घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः । सपिप्पलीकं वैस्वर्यकासश्वासज्वरापहम् ॥ २ ॥ इति कोलाद्यं घृतम् ॥ अथ गोक्षुराद्यं घृतम् ॥ श्वदंष्ट्रां सदुरालभां चतस्रः पर्णिनीर्बलाम् । भागान्पलोन्मितान्कृत्वा पलं पर्पटकस्य च ॥ १ ॥ पचेद्दशगुणे तोये दशभागावशेषिते । रसे पूते तु द्रव्याणा-

---

१ (च०) योजितम् । २ (ङ० च० छ०) कोश । ३ (ग० च० छ०) लेहयेत् । ४ (क० ङ० च०) पेयार्थम् ।५ (च०) रसैः ।

मेषीं कल्कान्समावपेत् ॥ २ ॥ सटी पुष्करमूलानां पिप्पलीत्रायमाणयोः । आमलक्याः किराततानां तिक्तस्य कटुकस्य च ॥ ३ ॥ फलानां सारिवायाश्च सुपिष्टा कर्षसम्मिताम् । तैः साधयेद् घृतप्रस्थं क्षीरद्विगुणितं भिषक् ॥ ४ ॥ ज्वरं दाहं तमः श्वासं कासं पार्श्वशिरोरुजम् । तृष्णां छर्दिमतीसारमेतत्सर्पिर्व्यपोहति ॥ ५ ॥ इति गोक्षुराद्यं घृतम् ॥ अथ जीवन्त्यादिघृतम् ॥ जीवन्तीमधुकं द्राक्षां फलानि कुटजस्य च । सटीपुष्करमूलं च व्याघ्रीं गोक्षुरकम्बलाम् ॥ १ ॥ नीलोत्पलं चामलकीं त्रायमाणां दुरालभाम् । पिप्पलीं च समां पिष्ट्वा घृतं वैद्यो विपाचयेत् ॥ २ ॥ एतद्व्याधिसमूहस्य रोगराजस्य दुर्जयम् । रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति ॥ ३ ॥ इति जीवन्त्यादि घृतम् ॥ इति घृतानि ।

॥ अथ तैलानि ॥

अथ चन्दनादितैलम् ॥ चन्दनाम्बुनखं वाप्यं यष्टी शैलेयपद्मकम् । मञ्जिष्ठा सरलं दारु पटोलं पूतिकेसरम् ॥ १ ॥ पत्रं बिल्वमुशीरं च कक्कोलं चन्दनाम्बुदम् । हरिद्रे सारिवे तिक्ता लवङ्गागुरुकुङ्कुमम् ॥ २ ॥ त्वग्रेणुनलिका चैभिस्तैलं मस्तु चतुर्गुणम् । लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्णकृत् ॥ ३ ॥ अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनम् । आयुःपुष्टिकरं चैव वशीकरणमुत्तमम् ॥ विशेषात् क्षयरोगघ्नं रक्तपित्तहरं परम् ॥४॥ इति चन्दनादितैलम् ॥ अथ लाक्षादितैलम् ॥ तैलं प्रस्थमितं चतुर्गुणजतुक्वाथं चतुर्मस्तुरुग्यष्टीदारुनिशाब्दमूर्वकटुकामिश्यश्च कौन्तीहिमैः । रास्नाद्यैः पिचुसम्मितैः कृतमिदं शस्तं तु जीर्णज्वरे सर्वस्मिन्विषमेऽपि यक्ष्मणि शिशौ वृद्धे सगर्भासु च ॥ १ ॥ इति लाक्षादितैलम् ॥

॥ अथ चन्दनबलालाक्षादि तैलम् ॥

चन्दनं च बलामूलं लाक्षा लामज्जकं तथा । पृथक् पृथक् प्रस्थमितं जलद्रोणे विपाचयेत् ॥ १ ॥ चतुर्भागावशेषेऽस्मिंस्तैलं प्रस्थद्वयं क्षिपेत् । चन्दनोशीरमधुकशताह्वा कटुरोहिणी ॥ २ ॥ देवदारु निशाकुष्ठं मञ्जिष्ठागुरुवालकम् । अश्वगन्धाबलादार्वीमूर्वा मुस्तां समूलिकाम् ॥ ३ ॥ एला त्वङ्नागकुसुमं रास्ना लाक्षा सुगन्धिका । चम्पकं पीतसारं च सारिवा चोरकद्वयम् ॥ ४ ॥ कल्कैरेतैः समायुक्तं क्षीराढकसमन्वितम् । तैलमभ्यञ्जने श्रेष्ठं सप्तधातुविवर्धनम् ॥ ५ ॥ कासश्वासक्षयहरं सर्वच्छर्दिनिवारणम् । असृग्दरं रक्तपित्तं हन्ति पित्तकफामयम् ॥ ६ ॥ कान्तिकृद्दाहशमनं कण्डूविस्फोटनाशनम् । शिरोरोगं नेत्रदाहमङ्गदाहं च नाशयेत् ॥ ७ ॥ वातामयहतानां च क्षीणानां क्षीणरेतसाम् । बालमध्यमवृद्धानां शस्यते शोफकामले ॥ पाण्डुरोगे विशेषेण सर्वज्वरविनाशनम् ॥ ८ ॥

॥ अथाश्वगन्धादितैलम् ॥

अश्वगन्धा बला लाक्षा प्रस्थं प्रस्थं पृथक् पृथक् । जलद्रोणेऽपि पक्तव्यं चतु-

१ (च०) पट्टेलाजाति ।

भागावशेषितम् ॥ १ ॥ तैलं त्रिमानिकं दद्याद्दधिमस्तु चतुर्गुणम् । अश्वगन्धा निशा दारु कौन्ती कुष्ठाब्दचन्दनैः ॥ २ ॥ निशा तिक्ता शताह्वा च लाक्षा मूर्वा समूलकैः । सुरदारु च मञ्जिष्ठा मधुकोशीरसारिवा ॥ ३ ॥ समभागानि सर्वाणि कल्कीकृत्य विपाचयेत् । सर्वज्वरं हरत्याशु शोफघ्नं लघु बृंहणम् ॥४॥ कासश्वासहरं चैव सर्वधातुविवर्धनम् । एतदभ्यञ्जनेनाशु क्षयरोगी विमुच्यति ॥ ५ ॥ इत्यश्वगन्धादितैलम् ॥

॥ अथ लक्ष्मीविलासतैलम् ॥

एलाश्रीखण्डरास्नाजतुनखशशिकेकोलकं चाथ मुस्ता बालत्वग् दारुकृष्णागुरुतगरजटाकुष्ठमेतत् समांशम् । त्रैगुण्यं कालरालं सुदृढमरुकायन्त्रतः सिद्धमेतत्तैलं पुष्पैश्च भाव्यं परिमलमिलितं नामतो गन्धतैलम् ॥ १ ॥ एतल्लक्ष्मीविलासं जनयति जगतीनायकैः सम्प्रयुक्तं युक्त्या नाना च रोगान्निखिलगदहरं वातसङ्घातहन्तृ । पीतं ताम्बूलवल्लीदलमिलितमलं जाठरं वह्निमिद्धं कुर्याद्दुर्नामदद्रुक्षयमपि नितरामङ्गसम्मर्दनेन ॥ २ ॥ इति लक्ष्मीविलासतैलम् ॥

॥ अथ द्राक्षासवः ॥

मृद्वीकायास्तुलार्धं तु द्विद्रोणेऽपां विपाचयेत् । पादशेषे कषाये च पूते शीते प्रदापयेत् ॥ १ ॥ गुडस्य द्वितुला मानी धातक्या घृतभाजने । विडङ्गं फलिनी कृष्णा त्वगेला पत्रकेसरम् ॥ २ ॥ मरीचं च भिषक् चूर्णं सम्यग्दत्वा विचक्षणः । क्षिपेच्च पलिकैर्भागैः स्थापयेच्चैव तद्दिने ॥ ३ ॥ ततो यथाबलं पीत्वा कासश्वासगलामयान् । हन्ति यक्ष्माणमत्युग्रमुरःसन्धानकारकम् ॥ ४ ॥ चतुर्थभागां द्राक्षायाः धातकीमत्र केचन । प्रयच्छन्ति ततो वीर्यमेतस्योच्चैः प्रजायते ॥ ५ ॥ इति द्राक्षासवो वीरसिंहावलोकतः ॥

॥ अथ पिप्पल्यरिष्टः ॥

पिप्पली लोध्रमरिचपाठाधान्येलवालुकैः । चव्यचित्रकजन्तुघ्नक्रमुकोशीरचन्दनैः ॥ १ ॥ मुस्ताप्रियङ्गुलवलीहरिद्राभिसिपेल्लवैः । पत्रत्वक्कुष्ठतगरैर्नागकेसरसंयुतैः ॥२॥ भागैः स्यादर्धपलिकैर्द्राक्षां षष्टिपलां क्षिपेत् । पलानि दश धातक्या गुडस्य च शतत्रयम् ॥ ३ ॥ तोयार्मणद्वये सिद्धं भवत्येतत्सुखावहम् । ग्रहणीपाण्डुरोगार्शःकार्श्यगुल्मोदरापहः ॥ पिप्पल्यादिररिष्टोऽयं क्षयक्षयकरः परम् ॥ ४ ॥ इति पिप्पल्यरिष्टः ॥

॥ अथ खर्जूरासवः ॥

पञ्चप्रस्थं समादाय खर्जूरस्य विचक्षणः । द्रोणाम्भसि पचेत्सम्यगुत्तार्य गालयेत्ततः ॥ १ ॥ कुर्वीं सुधूपितां कृत्वा प्रक्षिपेत्तं रसं शुभम् । हपुषां ताम्रपुष्पीं च कषायं

---

१ (क०) क्षयरोगम् । २ (क० ग० छ०) शशिनः कोलकम् । ३ (च० छ०)—पिप्पली (क०) विडङ्गफलिनी । ४ (घ० च०) कुम्भं सुधूपितम् । (ख० ग० छ०) कुपीं । (क०) कुम्भीं ।

तत्र निक्षेपेत् ॥ २ ॥ द्वारं निरुध्य सुदृढं निक्षिपेद्वसुधातले । सप्तकद्वययोगेन सिद्धोऽयं त्वासवो रसः ॥ ३ ॥ रोगराजं तथा शोफं प्रमेहं पाण्डुकामलाम् । ग्रहणीं पञ्च गुल्मार्शो नाशयत्यतिवेगतः ॥ ४ ॥ इति गदनिग्रहात्खर्जूरासवः ॥

॥ अथ गुडूच्यादिमोदकः ॥

गुडूचीं खण्डशः कृत्वा कुट्टयित्वा सुमर्दयेत् । वस्त्रेण विधृतं तोयं स्रावयेत्तच्छनैः शनैः ॥ १ ॥ शुद्धशङ्खनिभं चूर्णमेतैः सम्मिश्रयेद्भिषक् । उशीरं वालकं पत्रं कुष्टं धात्रीं च मौसलीम् ॥ २ ॥ एलां हरेणुकां द्राक्षां कुङ्कुमं नागकेसरम् । पद्मकन्दं च कर्पूरं चन्दनद्वयमिश्रितम् ॥ ३ ॥ व्योषं च मधुलाजांश्च[1] अश्वगन्धां शतावरीम् । गोक्षुरं मर्कटाख्यं च जातीकक्कोलचोरकम् ॥ ४ ॥ रसाभ्रवङ्गलोहैश्च सम्मिश्रं कारयेद्बुधः । एतानि समभागानि द्विगुणामृतशर्करा ॥५॥ मत्स्यण्ड्याज्यमधूपेतं भक्षयेत्प्रातरुत्थितः । क्षयं च रक्तपित्तं च पाददाहमसृग्दरम् ॥ ६ ॥ मूत्राघातं मूत्रकृच्छ्रं वातकुण्डलिकां तथा । निहन्याच्च प्रमेहांश्च सोमरोगं च दारुणम् ॥ ७ ॥ रसायनमिवर्षीणाममृतं वामृतान्धसाम् ॥ ८ ॥ इति गुडूच्यादिमोदकः ॥

॥ अथ रसाः ॥

॥ अथ चतुर्मुखरसः ॥

सूतायोऽभ्रकगन्धकं समलवं सूताङ्घ्रितुल्यं मृतम् स्वर्णं सर्वमिदं निधाय विमले खल्वे दिनं मर्दयेत् । कन्याव्योषवरापुनर्नवरसैः कच्चूलवङ्गैः पुनर्भाव्यं चित्रकपत्रके घनतरं सेव्येष्टधान्यान्तगम् ॥ १ ॥ कुर्याद्ब्रह्मविनिर्मितं रसवरं यक्ष्मापहं पुष्टिदम् वल्लक्षौद्रफलत्रयेण सहितं मेहाग्निमान्द्यप्रणुत् ॥ २ ॥ इति चतुर्मुखरसः ॥

॥ अथ रत्नगर्भपोटलीरसः ॥

रसं वज्रं हेम तारं नागं लोहं तथाभ्रकम् । तुल्यांशं मारितं योज्यं मुक्तामाक्षिकविद्रुमम् ॥ १ ॥ राजावर्तं च वैक्रान्तं गोमेदं पुष्परागकम् । शङ्खं च तुल्यतुल्यांशं सप्ताहं चित्रकद्रवैः ॥ २ ॥ मर्दयित्वा विचूर्ण्याथ तेनापूर्य वराटकान् । टङ्कणं रविदुग्धेन पिष्ट्वा तन्मुद्रणं चरेत् ॥ ३ ॥ मृद्भाण्डे तान्सुसंयन्त्य सम्यग्गजपुटे पचेत् । आदाय चूर्णयेत्सम्यग् निर्गुण्ड्याः सप्त भावनाः॥४॥ आर्द्रकस्य रसैः सप्त चित्रकस्यैकविंशतिः । द्रव्यैर्भाव्यं ततः शुष्कं देयं गुञ्जाचतुष्टयम् ॥ ५ ॥ क्षयरोगं निहन्त्याशु सत्यं शिव इवान्धकम् । योजयेत्पिप्पलीक्षौद्रैः सघृतैर्मरिचैश्च वा । पोटली रत्नगर्भोऽयं सर्वरोगहरो मतः ॥ ६ ॥

॥ अथ राजमृगाङ्कः ॥

रसभस्म त्रिभागं च भागैकं हेमभस्मकम् । मृतताम्रस्य भागैकं शिलागन्धकतालकम् ॥ १ ॥ प्रतिभागद्वयं शुद्धमेकीकृत्वा विचूर्णितम् । वराटान्पूरयेत्तेन अजाक्षी-

[1] (ग० क० च० छ०) मधुलाजश्च ।

रेण टङ्कणम् ॥ २॥ पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे सन्निधापयेत् । शुष्कं गर्तपुटे पाच्यं चूर्णयेत्स्वाङ्गशीतलम् ॥ ३ ॥ रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः । एकोनविंशन्मरिचैर्घृतेन सह भक्षयेत् ॥ ४ ॥ दशानां पिप्पलीनां च चूर्णं दत्वा प्रदापयेत् । क्षये कासे ज्वरे पाण्डौ ग्रहण्यामतिसारके ॥ ५ ॥ इति राजमृगाङ्कः ॥

॥ अथ रसरत्नप्रदीपान्मृगाङ्कः ॥

रसेन तुल्यं कनकं तयोस्तु साम्येन युञ्ज्यान्नवमौक्तिकानि । रसप्रमाणो बलिरङ्घ्रिभागः क्षारश्च सर्वं तुषवारिणा तु ॥ १ ॥ सम्मर्द्य वस्त्रं तु विधाय गोलं दिनं पचेत्तं लवणेन पूर्णे । भाण्डे मृगाङ्कोऽयमतिप्रगल्भः क्षयाग्निमान्द्यग्रहणीगदेषु ॥ २ ॥ साज्योषणाभिर्मधुपिप्पलीभिर्वल्लोऽस्य देयो न ततोऽधिकस्तु । पथ्यं हितं शीतलमेव योज्यं त्याज्यं सदा पित्तकरं विदाहि ॥ ३ ॥ अन्यच्च वैद्यविलासात् ॥ रसबलितपनीयं योजयेत्तुल्यभागं तदनु युगुलभागं मौक्तिकानां शुभानाम् । यवजचरणयुक्तं मर्दयेत्सर्वमेतद्दिनमपि तुषवारा गोलकं लघ्वमत्रे ॥ १ ॥ विधाय मुद्रां विदधीत भाण्डे चुल्यां समुद्र लवणेन पूर्णे । दिनं पचेच्चारु मृगाङ्कनामा क्षयाग्निमान्द्यग्रहणीविकारे ॥ ५ ॥ योज्यः सदा वह्निजसर्पिषा वा कृष्णामधुभ्यां सततं त्रिगुञ्जः । वर्ज्यं सदा पित्तकरं हि वस्तु लोकेशवत्पथ्यविधिर्निरुक्तः ॥ ३ ॥ इति मृगाङ्कः ॥

॥ अथ नवरत्नराजमृगाङ्कः ॥

सूतं गन्धकहेमताररसकं वैक्रान्तकान्तायसं वङ्गं नागपविप्रवालविमला माणिक्यगारुत्मतम् । ताप्यं मौक्तिकपुष्परागजलजं वैदूर्यकं शुल्बकं शुक्तिस्तालकमभ्रहिङ्गुलशिला गोमेदनीलं समम् ॥ १ ॥ गोक्षूरैः फणिवल्लिसिंहवदनामुण्डीकणाचित्रकैरिक्षुच्छिन्नरुहाहरप्रियजयाद्राक्षावरीजद्रवैः । शोफघ्नीशतपत्रिकामधुजलैः सच्छाल्मलीधातकीजातीसत्यबलाचतुष्टयजलत्वग्देवपुष्पद्रवैः ॥ २ ॥ कर्कोलैर्मदनागकेसरजलैर्भाव्यं पृथक् सप्तधा भाण्डे सिन्धुभृते मृगाङ्कवदयं पाच्यः क्रमाग्नौ दिनम् । भूयः प्राक् समुदाहृतैर्द्रवचयैस्तं भावयेत्पूर्ववत् पश्चात्तुल्यविभागशीतलरजःकस्तूरिका भावना ॥३॥ गोप्याद् गोप्यतरं रसायनमिदं श्रीशङ्करेणोदितं गुञ्जासिन्धुयुतं कणामधुयुतं शोफे सपाण्ड्वामये । वातव्याधिमुपद्रवैश्च सहितं मेहांस्तथा विंशतिं संयोज्यं च हरीतकीगुडयुतं वातास्रके दुर्जये ॥ ४ ॥ गम्भीरे च गुडूचिसत्वचपलाक्षौद्रैस्तु संयोजितस्त्वाध्मानारुचिशूलमान्द्यकसनापस्मारवातोदरान् । श्वासान्संग्रहणीं हलीमकमथो सर्वज्वरान्नाशयेद्धातून्पोषयति क्षयं क्षपयति श्यामाशतं यौवनम् ॥ ५ ॥ प्रौढाटोपयुतं करोति सहसा तारुण्यगर्वोज्झितं सिद्धो राजमृगाङ्क एष जयति स्वस्वानुपानैर्गदान् ॥ ६ ॥ इति नवरत्नराजमृगाङ्कः ॥

॥ अथ महाकनकसिन्दूररसः ॥

रसगन्धकनागाश्च रसको माक्षिकाभ्रके । कान्तविद्रुमयुक्तानां वङ्गभस्म च तार-

कम् ॥ १ ॥ भस्म कृत्वा प्रयत्नेन प्रत्येकं कर्षसंमितम् । सर्वतुल्यं शुद्धहेमभस्म कृत्वा प्रयोजयेत् ॥ २ ॥ मर्दयेत् त्रिदिनं सर्वं हंसपादीरसैर्भिषक् । ततो वै गोलकाम्[1] कृत्वा काचकूप्यां विनिक्षिपेत्॥३॥रुद्ध्वा तत्काचकूपीं च सप्तवस्त्रेण वेष्टिताम् । ततो वै सिकतायन्त्रे त्रिदिनं चोक्तवह्निना ॥४॥ पश्चात्तं स्वाङ्गशीतं च पूर्वोक्तरसमर्दितम् । विनिक्षिप्य करण्डेऽथ संपूज्य रसराजकम् ॥ ५ ॥ महाकनकसिन्दूरो राजयक्ष्महरः परः । पाण्डुरोगं श्वासकासं कामलाग्रहणीगदान् ॥ ६ ॥ क्रिमिशोफोदरावर्तगुल्ममेहगुदाङ्कुरान् । मन्दाग्निं छर्दिमरुचिं आमशूलहलीमकान्॥७॥ज्वरान् द्वन्द्वादिकान् सर्वान् सन्निपातांस्त्रयोदश । पैत्यरोगमपस्मारं वातरोगान्विशेषतः॥८॥रक्तपित्तप्रमेहांश्च स्त्रीणां रक्तस्रवांस्तथा । विंशतिश्लेष्मरोगांश्च मूत्ररोगान्निहन्त्यसौ ॥ ९ ॥ हेमवर्णश्च बल्यश्च आयुःशुक्रविवर्धनः । महाकनकसिन्दूरः काश्यपेन विनिर्मितः ॥१०॥ इति महाकनकसिन्दूररसः योगतरङ्गिण्याः ॥

॥ अथ कनकसिन्दूररसः ॥

योगतत्वे । रसः कनकभागिकः कनकमाक्षिकस्तालकः शिलारसकगन्धकौ रससमाः समुत्था इमे । विमर्द्य पयसा रवेः सकलमेतदस्योपरि द्रवैः प्रतिदिनं पृथक् तदिति भावयेद्बुद्धिमान् ॥ १ ॥ जयामुनिकलिप्रियादहनभृङ्गवासोद्भवैर्विभाव्य च रसैस्ततः सुदृढगोलकं स्वेदयेत् । मृगाङ्कवदथार्द्रकद्रवभरेण तं सप्तधा विमर्द्य च कटुत्रयाम्बुभिरयं क्षयस्यान्तकृत्॥२॥रसः कनकसुन्दरो भवति सन्निपातेऽप्ययं सदार्द्रकरसैस्तथा पवनगुल्मशूलादिहृत् । स विश्वघृतयोजितः सकलमत्र पथ्यं हितं मृगाङ्कवदथापरं किमपि नैव योज्यं क्वचित् ॥ ३ ॥ इति कनकसुन्दरो रसः ॥

॥ अथ सुवर्णभूपतिः ॥

शुद्धसूतसमं गन्धं मृतशुल्बं तयोः समम् । अभ्रलोहकयोर्भस्म कान्तभस्म सुवर्णजम् ॥ १ ॥ रजतं च विषं सम्यक् पृथक् सूतं समं भवेत् । हंसपादीरसैर्मर्द्य दिनमेकं वटीकृतम् ॥ २ ॥ काचकूप्यां विनिक्षिप्य मृदा संलेपयेद्बहिः । शुष्का सा वालुकायन्त्रे शनैर्मृद्वग्निना पचेत् ॥ ३ ॥ चतुर्गुञ्जमितं देयमार्द्रकद्रवपिप्पली । क्षयं त्रिदोषजं हन्ति सन्निपातांस्त्रयोदश ॥ ४ ॥ अण्डवातं धनुर्वातं शृङ्खलावातमेव च । आढ्यवातं पङ्गुवातं कफवाताग्निमान्द्यनुत् ॥ ५ ॥ कटिवातं सर्वशूलं नाशयेन्नात्र संशयः । गुल्मशूलमुदावर्तं ग्रहणीमतिदुस्तराम् ॥ ६ ॥ प्रमेहमुदरं सर्वामश्मरीं मूत्रविड्ग्रहम् । भगन्दरं सर्वकुष्ठं विद्रधिं महतीं तथा ॥ ७ ॥ श्वासकासमजीर्णं च ज्वरमष्टविधं तथा । कामलां पाण्डुरोगं च शिरोरोगं च नाशयेत् ॥ ८ ॥ अनुपानविशेषेण सर्वरोगान्विनाशयेत् । यथा सूर्योदये नश्येत् तमः सर्वगतं तथा ॥ सर्वरोगविनाशाय सर्वेषां स्वर्णभूपतिः ॥ ९ ॥ इति सुवर्णभूपतिः ॥

---

१ (ग० ङ० च० छ०) वर्ण्य—२ (ङ० च० छ०) योगतरङ्गिण्याः । ३ (घ० च० छ०) सर्वं सूतकसम । ४ (च०) आमवातम् ।

॥ अथ लक्ष्मीविलासः ॥

सुवर्णताराभ्रकताम्रवङ्गत्रिलोहनागामृतमौक्तिकं च । एतत्समं योज्यरसस्य भस्म खल्वे कृतं स्यात् कृतकज्जलीकम् ॥ १ ॥ सुमर्दयेन्माक्षिकसम्प्रयुक्तं तच्छोषयेद्दित्रिदिनं च घर्मे । तत्कल्कमूषोदरमध्यगामी यत्नात्कृतं तार्क्ष्यपुटेन पक्वम् ॥ २ ॥ यामाष्टकं पावकमर्दितं च लक्ष्मीविलासो रसराज एषः । क्षये त्रिदोषप्रभवे च पाण्डौ सकामलासर्वसमीरणेषु ॥ ३ ॥ शोफप्रतिश्यायविनष्टवीर्यं मूलामयं चैव सशूलकुष्ठम् । हत्वाग्निमान्द्यं क्षयसन्निपातं श्वासं च कासं च हरेत्प्रयुक्तम् ॥ ४ ॥ तारुण्यलक्ष्मीप्रतिबोधनाय श्रीमद्विलासो रसराज एषः ॥ ५ ॥

॥ अथ त्रैलोक्यचिन्तामणिः ॥

रसं वज्रं हेमतारं ताम्रं तीक्ष्णाभ्रकं मृतम् । गन्धकं मौक्तिकं शङ्खं प्रवालं तालकं शिला ॥ १ ॥ शोधितं च समं सर्वं सप्ताहं भावयेद्दृढम् । चित्रमूलकषायेण भानुदुग्धैर्दिनत्रयम् ॥ २ ॥ निर्गुण्डीसूरणद्रावैर्वज्रिदुग्धैर्दिनत्रयम् । अनेन पूरयेत्सम्यक् पीतवर्णान्वराटकान् ॥ ३ ॥ टङ्कणं रविदुग्धेन पिष्ट्वा तेषां मुखं लिपेत् । मृदा भाण्डे पुटे पश्चात् स्वाङ्गशीतं विचूर्णयेत् ॥४॥ चूर्णतुल्यं मृतं सूतं वैक्रान्तं सूतपादकम् । शिग्रुमूलद्रवैः सर्वं सप्तवारं विभावयेत् ॥ ५ ॥ चित्रमूलकषायेण भावनाश्चैकविंशतिः । आर्द्रकस्य रसेनैव भावनाः सप्त एव च । जम्बीरैर्मातुलुङ्गैर्वा सप्तवारं विभावयेत् ॥ ६ ॥ सूक्ष्मचूर्णं ततः कृत्वा चूर्णपादांशटङ्कणम् । टङ्कणांशं वत्सनाभं तत्समं मरिचं क्षिपेत् ॥ ७ ॥ लवङ्गं नागरं पथ्या कणा जातीफलं पृथक् । प्रत्येकं वत्सनागस्य पादांशं चूर्णितं क्षिपेत् ॥८ ॥ मातुलुङ्ग्या आर्द्रकस्य रसेनैतद्विलोडयेत् । चतुर्गुञ्जामितं खादेत्कणाक्षौद्रं लिहेदनु ॥ ९ ॥ क्षौद्रैर्वा चार्द्रकद्रावैः शुण्ठ्या वाथ गुडैर्युतम् । अनुपानैः समायोज्यं सर्वरोगोपशान्तये ॥ १० ॥ वह्निं दीपयते बलं च कुरुते तेजो महद्वर्धते वीर्यं वर्धयते विषं च हरते दार्ढ्यं विधत्ते तनोः । अभ्यासेन निहन्ति मृत्युपलितं पुष्टिं प्रदत्ते नृणां कासं नोदयते क्षयं क्षपयति श्वासं च निर्नाशयेत् ॥ ११ ॥ वातं विद्रधिपाण्डुशूलग्रहणीरक्तातिसारं जयेन्मेहप्लीहजलोदराश्मरितृषाशोफं हलीमोदरम् । लूताकृच्छ्रभगन्दरं ज्वरगणं चार्शांसि कुष्ठं जयेत् साध्यासाध्यरुजो निहन्ति च रसस्त्रैलोक्यचिन्तामणिः ॥ १२ ॥ इति त्रैलोक्यचिन्तामणिः ॥

॥ अथ द्वितीयस्त्रैलोक्यचिन्तामणिः ॥

योगतरङ्गिण्याः । सूताभ्रस्वर्णताराऽरुणभिदुरशिलाताप्यगन्धप्रवालायोमुक्ताशङ्खतालं वरमिदमनलक्काथतः सप्त भाव्यम् । निर्गुण्डीसूरणाम्भःपविरविपयसा त्रिः पृथक् चाथ पीतानापूर्यैतैर्वराटानथ मिहिरपयष्टङ्कणालिप्तवक्त्रान् ॥१॥ कृत्वा भाण्डे च रुद्ध्वा

---

१ (च०) मूषा । २ (च०) रुद्ध्वा भाण्डपुटे पक्त्वा ।

गजपुटजठरे शुक्तितस्तत्तु पक्त्वोद्धृत्यैतन्मर्दयित्वा तदखिलतुलितं सूतभस्म प्रदद्यात् । वैक्रान्तं सूततुर्यांशकमथ मिलितं सप्तशः शिग्रुमूलं त्वग्बाणस्तेन तुल्यं विषमनलवरं टङ्कणं चोषणं च ॥ २ ॥ पथ्याजातीफलं चामरकुसुमकणानागरं वत्सनाभाञ्चतुर्यांशं मेलयित्वा पृथगथ दिवसं मर्दयेल्लुङ्गतोयैः । एष त्रैलोक्यचिन्तामणिरखिलगदध्वान्तविध्वंसहंसस्तत्तद्रोगानुपानादुषसि कवलितः सार्धवल्लप्रमाणः ॥३॥ वातव्याध्यामवातज्वरजठरकृमिश्वासशूलास्रवातासृक्पित्तक्षैण्यकासक्षयकफजगदोरःक्षताजीर्णमेहे । कुष्ठातीसारपाण्डुग्रहणिषु तमकेऽथव्रणार्शःप्रकेष्टे स्वाङ्गे खञ्जाढ्यवातश्रुतिभगजगदे सर्वथैव प्रशस्तः ॥ ४ ॥ इति त्रैलोक्यचिन्तामणिः । अथ योगसाराचिन्तामणिरसः । रसेन्द्रवैक्रान्तकरौप्यताम्रं सलोहमुक्ताफलगन्धहेम । त्रिर्भावितं चार्द्रकभृङ्गवह्निरसैरजागोपयसा तथैव ॥ १ ॥ अर्शः क्षयं कासमरोचकं च जीर्णज्वरं पाण्डुमपि प्रमेहान् । गुञ्जाप्रमाणं मधुमागधीभ्यां लीढं निहन्याद्विषमं च वातम् ॥ चिन्तामणिरिति ख्यातः पार्वत्या निर्मितः स्वयम् ॥ २ ॥ इति चिन्तामणिः ॥

॥ अथ वसन्तकुसुमाकरः ॥

प्रवालरसमौक्तिकाभ्रकमिदं चतुर्भागभाक् पृथक् पृथगतः स्मृते रजतहेमनी द्व्यंशके ॥ अयोभुजगरङ्गकं त्रिवैलकं विमर्द्याखिलं शुभेऽहनि विभावयेद्भिषगिदं धिया सप्तशः ॥ १ ॥ द्रवैर्वृषनिशेक्षुजैः कमलमालतीपुष्पजैः पयःकदलिकन्दजैर्मलयचन्दनाद्युद्रवैः । वसन्तकुसुमाकरो रसपतिर्द्विवल्लोशितः समस्तगदहृद् भवेत्किल निजानुपानैरयम् ॥ २ ॥ क्षिणोत्यनुमधूषणैः क्षयगदेषु सर्वेष्वपि प्रमेहरुजि रात्रिभिः समधुशर्कराभिः सह । सितामलयजद्रवैर्महति रक्तपित्तेऽथवा सितामधुसमन्वितैर्वृषभपल्लवानां द्रवैः ॥३॥ त्रिजातगतचन्दनैरपि च तुष्टिपुष्टिप्रदो मनोभवकरः परो वमिषु शङ्खपुष्पीरसैः । अभीरुरसशर्करामधुभिरम्लपित्तामये परेषु च यथोचितं ननु गदेषु संसेवयेत् ॥ ४ ॥ इति वसन्तकुसुमाकरो योगतरङ्गिण्याः ॥

॥ अथ लोकेश्वरः ॥

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः । माषष्टङ्कणकस्यैको जम्बीराद्भिर्विमर्दयेत् ॥ १ ॥ पुटेल्लोकेश्वरो नाम्ना लोकनाथोऽयमुत्तमः । ऋते कुष्ठं रक्तपित्तमन्यरोगान्क्षयं जयेत् ॥२॥ पुष्टिवीर्यप्रसादौजःकान्तिलावण्यदः परः । कोऽस्ति लोकेश्वरादन्यो नृणां शम्भुमुखोद्गतात् ॥ ३ ॥ इति लोकेश्वरः ॥

॥ अथ लोकेश्वरपोटलीरसः ॥

रसस्य भस्मना हेमपादांशेन प्रकल्पयेत् । द्विगुणं गन्धकं दत्त्वा मर्दयेच्चित्रकाम्बुना ॥१॥ वराटकांश्च संपूर्य टङ्कणेन निरुध्य च । भाण्डे चूर्णप्रलिप्तेऽथ शीघ्रं रुन्ध्यात्तु मृन्मये ॥२॥ शोषयित्वा पुटे गर्ते रत्निमात्रेऽपराह्णके । स्वाङ्गशीतलमुद्धृत्य चूर्णयित्वाथ विन्य-

१ (ख०) स्वच्वारा । २ (ख०) प्रकुष्टे । ३ (ख० ग० घ०) गज० गरु ।

वेत् ॥ ३ ॥ एष लोकेश्वरो नाम्ना वीर्यपुष्टिविवर्धनः । गुञ्जाचतुष्टयं खादेत्पिप्पलीमधुसंयुतम् ॥ ४ ॥ भक्षयेत्परया भक्त्या लोकेशः सर्वदर्शनः । अङ्गकार्श्येऽग्निमान्द्ये च कासे पित्ते रसः स्वयम् ॥ ५ ॥ मरीचैर्घृतसंयुक्तैः प्रदातव्यो दिनत्रयम् । लवणं वर्जयेत्तत्र साज्यं दधि च योजयेत् ॥ ६ ॥ एकविंशत्यहानीत्थं मरीचं सघृतं पिबेत् । पथ्यं मृगाङ्कवज्ज्ञेयं शयीतोत्तानपादतः ॥ ७ ॥ ये शुष्का विषमाशनैः क्षयरुजा व्याप्ताश्च ये कुष्ठिनो ये पाण्डुत्वहताः कुवैद्यविधिना ये शोषिणो दुर्भगाः । ये तप्ता विविधैर्ज्वरैर्भ्रमयदोन्मादैः प्रमादं गतास्ते सर्वे विगतामया हि परया स्युः पोटलीसेवया ॥ ८ ॥ इति लोकेश्वरपोटलीरसः ॥

॥ अथ प्राणदा पर्पटी ॥

सूताभ्रायोऽहिवङ्गोषणविषमखिलांशेन गन्धेन लोह्यां कोलाग्नौ विद्रुतेन क्षणमथ मिलितं दापितं गोमयस्थे । रम्भापत्रेऽमुनान्येन च दृढपिहितं प्राणदा पर्पटी स्यात्पाण्डौ रेके ग्रहण्यां ज्वररुजि कसने यक्ष्ममेहाग्निमान्द्ये ॥ १ ॥ प्राणदा पर्पटी सेषा भाषिता शम्भुना स्वयम् । तत्तद्रोगानुपानेन सर्वरोगविनाशिनी ॥ २ ॥ ॥ इति प्राणदा पर्पटी ॥

॥ अथ कुमुदेश्वरो रसः ॥

रसार्णवात् । पारदं शोधितं गन्धमभ्रकं च समं समम् । तदर्धं दरदं विद्यात्तदर्धां च मनःशिलाम् ॥ १ ॥ सर्वार्धं मृतलोहं च खल्वमध्ये विनिक्षिपेत् । त्रिःसप्तभावना देयाः शतावर्या रसेन च ॥ २ ॥ ततः सिद्धो भवत्येष कुमुदेश्वरसंज्ञकः । सितया मरिचेनाथ गुञ्जाद्वित्रिप्रमाणतः ॥ ३ ॥ भक्षयेत्प्रातरुत्थाय पूजयित्वेष्टदेवताम् । यक्ष्माणमुग्रं हन्त्येव वातपित्तकफामयान् ॥ ४ ॥ ज्वरादीनखिलान् रोगान् यथा दैत्याञ्जनार्दनः । सततभ्यासयोगेन वलीपलितनाशनः ॥ ५ ॥

॥ अथ पञ्चामृताख्यो रसः ॥

सारसङ्ग्रहात् ॥ भस्मीभूतसुवर्णतारदिनकृत्सूताभ्रसत्त्वैः क्रमात् संवृद्धैस्त्रितयं त्रयः क्रमिहराम्भोदैर्युतः कट्फलैः । निर्गुण्डीदशमूलवह्निरजनीव्योषार्द्रकैर्भावितो गोलीकृत्य विशोषितो निगदितः पञ्चामृताख्यो रसः ॥ १ ॥ नानेन सदृशः कोऽपि रसोऽस्ति भुवनत्रये । निहन्ति सकलान्रोगान् भवरोगमिवाच्युतः ॥ २ ॥ सर्वरोगहरः सूतस्तत्तद्रोगानुपानतः । अयं पञ्चामृतो नृणां त्रिदशानामिवामृतम् ॥ ३ ॥ योगसारात् ॥

॥ अथ हेमाभ्रकरससिन्दूरः ॥

अभ्रकं रससिन्दूरमिश्रितं हेमभस्मना । समभागं प्रकुर्वीत रसेनार्द्रकयोजितम्

१ (च०) व्यंशगन्धेन । २ (क० ग० छ०) मलमिलितम् । ३ (क० ग० ङ०) ढालितम् च० द्रालितम् ।

॥ १ ॥ क्षयं च क्षयपाण्डुं च क्षयकासं च कुष्ठकम् । जयेन्मण्डलपर्यन्तं पूर्वकर्मविपाककृत् ॥ २ ॥ इति हेमाभ्रकरससिन्दूरः ॥

॥ अथ शिलाजत्वादिलोहम् ॥

शिलाजतुयुतं लोहं वल्लं तु विधिमारितम् । पथ्याशी सेवते यस्तु स यक्ष्माणं व्यपोहति ॥ १ ॥ इति शिलाजत्वादिलोहम् ॥

॥ अथ सुवर्णपर्पटीरसः ॥

शुद्धं सुवर्णदलमष्टगुणेन शुद्धसूतेन पिण्डितमथो वसुभागभाजम् । गन्धे द्रुते बदरबर्हिषि लोहपात्रे दत्वावलोड्य लघुलोहशलाकया तत् ॥ १ ॥ मन्दं निरस्य सुरभीमलमण्डलस्थं रम्भादले तदुपरि प्रणिधाय चान्यत् । रम्भादलं लघु नियन्त्र्य तदा ददीत शीतं सुवर्णरसपर्पटिकाभिधानम् ॥ २ ॥ पित्तोल्बणे ससितया तुगयाथ वातश्लेष्मोल्बणे किल तुगामधुपिप्पलीभिः । क्षीणे विरेकिणि च शोषिणि मन्दवह्नौ पाण्डौ प्रमेहिणि चिरज्वरिणि ग्रहण्याम् ॥ वृद्धे शिशौ सुखिनि राज्ञि तथैव नार्यां भैषज्यमेतदुदितं हितमामयघ्नम् ॥ ३ ॥ इति सुवर्णपर्पटीरसः ॥

॥ अथ सर्वरोगेषु मृत्युञ्जयरसः ॥

त्रिकटु त्रिफला सूतगन्धकौ टङ्कणं विषम् । यष्टीनिशाकुबेराक्षीदन्तीबीजमथापि च॥१॥ एतानि समभागानि खल्वमध्ये विनिक्षिपेत् । भृङ्गराजरसेनैव मर्दयेत्त्रिदिनं भिषक् ॥२॥ गुटिका माषमात्रास्तु च्छायाशुष्काश्च कारयेत् । अनुपानविशेषेण सर्वरोगेषु योजयेत् ॥ मृत्युञ्जयो रसो नाम सर्वरोगविदारणः ॥ ३ ॥ इति मृत्युञ्जयरसः ॥ इति रसाः ॥

॥ अथ क्षयरोगचिकित्सा ॥

ज्वराणां शमनीयो यः पूर्वमुक्तः क्रियाविधिः । यक्ष्मिणां ज्वरदाहेषु स सर्वोऽपि प्रशस्यते ॥ १ ॥ नित्यं स्वदेवपूजाभक्तिर्भैषज्यदेवतागुरुषु । छागलमांसपयोऽश्नञ्जीवति यक्ष्मी चिरं धृतिमान् ॥ २ ॥ उपद्रवान्सत्वरवैकृतादीञ्जयेद्यथा क्षिप्रसमीक्ष्य शास्त्रम्[1] । त्यजेत्कुवैद्यप्रतिपादितानि बुधो विरुद्धानि च भेषजानि ॥३ ॥ गीतवादित्रशब्दैश्च प्रियस्तुतिभिरेव च । हर्षणाश्वासनैर्नित्यं गुरूणां समुपासनैः ॥ ४ ॥ ब्रह्मचर्येण दानेन तपसा देवतार्चनैः । सत्येनाचारयोगेन रविमण्डलसेवया ॥ वैद्यविप्रार्चनाच्चैव रोगराजो निवर्तते ॥ ५ ॥ इति क्षयरोगचिकित्सा ॥

॥ अथोरःक्षतनिदानम् ॥

धनुराकर्षतोऽत्यर्थं भारमुद्वहतो गुरुम् । युध्यमानस्य बलिभिः पततो विषमोन्नतः ॥ १ ॥ वृषं हयं वा धावन्तं दम्यं चान्यं निगृह्णतः । शिलाकाष्ठाश्मनिर्घातात् क्षि-

1 यथात्वं प्रसमीक्ष्य ।

पतो निघ्नतोऽपरान् ॥ २ ॥ अधीयानस्य वात्युच्चैर्दूरं वा व्रजतो द्रुतम् । महानदीं वा तरतो हयैर्वा सह धावतः ॥ ३ ॥ सहसोत्पततो दूरं तूर्णं चाप्यतिनृत्यतः । तथान्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य च ॥४॥ विक्षयेते वक्षसि व्याधिर्बलवान्समुदीर्यते । स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ॥५॥ उरो विरुज्यतेऽत्यर्थं भिद्यतेऽथ विद्यते । प्रपीड्येते ततः पार्श्वे शुष्यत्यङ्गं प्रकम्पते ॥ ६ ॥ क्रमाद्वीर्यं बलं वर्णोऽरुचिरग्निश्च हीयते । ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधस्तथा ॥ ७ ॥ दुष्टः श्यावः सुदुर्गन्धिः पीतो विग्रथितो बहुः । कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्तते ॥ ८ ॥ सक्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् । अव्यक्तं लक्षणं तस्य पूर्वरूपमिदं स्मृतम् ॥ ९ ॥ उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते । क्षीणे च रक्तमूत्रत्वं पार्श्वपृष्ठकटिग्रहः ॥ १० ॥ अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः । परिसंवत्सरो याप्यः सर्वलिङ्गं विवर्जयेत् ॥ ११ ॥

॥ अथ तच्चिकित्सा ॥

उरोमन्थी क्षती लाजान्पयसा मधुसंयुतान् । सद्य एव पिबेज्जीर्णपयसाद्याद्रसशर्करम् ॥ १ ॥ पार्श्ववस्तिरुजि स्वल्पपित्ताग्निस्तान् सुरायुतान् । बलाश्वगन्धाश्रीपर्णीबहुपत्रीपुनर्नवाः ॥ २ ॥ पयसा नित्यमभ्यस्ताः शमयन्ति ह्युरःक्षतम् । शर्करामधुसंयुक्तं जीवकर्षभकौ मधु ॥ ३ ॥ लिह्यात्क्षीरानुपानानि रक्तक्षीणतरः कृशः । नीलिकातिविषाग्रन्थिपद्मकेसरचन्दनैः ॥ शृतं पयो मधुयुतं सन्धानार्थं पिबेत्क्षती ॥४॥ लाक्षाचूर्णं सुष्ठु कृतं क्षौद्राज्येनान्वितं क्षीरम् ॥ शमयति शोषोद्भूतं वमनं रक्तस्य सत्यमिव ॥ ५ ॥

॥ अथैलादिगुटिका ॥

एलापत्रत्वचो द्राक्षा पिप्पल्यर्धपलं तथा । सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः ॥ १ ॥ सञ्चूर्ण्य मधुना युक्तां गुटिकां सम्प्रकल्पयेत् । अक्षमात्रां ततश्चैकां भक्षयेच्च दिने दिने ॥ २ ॥ कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्च्छां मदं भ्रमम् । रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकम् ॥ ३ ॥ शोषप्लीहाढ्यवातांश्च स्वरभेदं क्षतक्षयम् । गुटिका तर्पणी वृष्या रक्तपित्तं च नाशयेत् ॥ ४ ॥

॥ अथ यष्ट्याद्यं घृतम् ॥

यष्ट्याह्वनागबलयोः क्वाथे क्षीरसमं घृतम् । पयसा पिप्पलीवांशीकल्कसिद्धं क्षते हितम् ॥ १ ॥

॥ अथ बलाद्यं घृतम् ॥

घृतं बलानागबलार्जुनाम्बुसिद्धं सयष्टीमधुकल्कपादम् । हृद्रोगशूलक्षतरक्तपित्तकासानिलान्संशमयत्युदीर्णान् ॥ १ ॥

---

१ (क० च० छ०) विक्षते । (ङ०) वीक्षते । २ (ग० च० छ०) जीर्णे । ३ (ग० ङ० च० छ०) सिद्ध । ४ (ग० च० छ०) मांसी ।

॥ अथ श्वदंष्ट्राद्यं घृतम् ॥

श्वदंष्ट्रोशीरमञ्जिष्ठाबलाकाश्मर्यकत्तृणम् । दर्भमूलं पृथक्पर्णी बला सर्षपिका स्थिरा ॥ १ ॥ पलिकान्साधयेत्तेषां पचेत्क्षीरे चतुर्गुणे । कल्कः स्वगुप्तवर्षाभूमेदाजीवन्तिजीवकैः ॥ २ ॥ शतावर्यादिमृद्वीकाशर्कराश्रावणीद्वयैः । प्रस्थः सिद्धो घृताद्धा तु पित्तहृद्रोगगुल्मनुत् ॥ ३ ॥ मूत्रकृच्छ्रप्रमेहार्शःकासशोषक्षयापहः । धनुस्तम्भाध्वभाराध्वक्षीणानां बलमांसदः ॥ ४ ॥

॥ अथ द्राक्षाद्यं घृतम् ॥

द्राक्षायाः सम्मितं प्रस्थं मधुकस्य पलाष्टकम् । पचेत्तोयाढके सिद्धे पादशेषेण तेन तु ॥ १ ॥ पलिके मधुकद्राक्षे पिष्टे कृष्णापलद्वयम् । प्रदाय सर्पिषः प्रस्थं पचेत्क्षीरे चतुर्गुणे ॥ २ ॥ सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत् । एतद्द्राक्षाघृतं सिद्धं क्षीणक्षतहितं परम् ॥ ३ ॥ वातपित्तज्वरश्वासविस्फोटकहलीमकान् । प्रदरं रक्तपित्तं च हन्यान्मांसबलप्रदम् ॥ ४ ॥

॥ अथामृतप्राश्यावलेहः ॥

क्षीरधात्रीविदारीक्षुक्षीरिणां च तथा रसे । पचेत्समे घृतप्रस्थे मधुकैरिक्षुरन्वितैः ॥ १ ॥ द्राक्षादिचन्दनोशीरशर्करोत्पलपद्मकैः । मधुकं कुसुमानन्ता काश्मरी तृणसंज्ञकैः ॥ २ ॥ प्रस्थार्धं मधुनः शीते शर्करायास्तुलां तथा । पलार्धकांश्च संचूर्ण्य त्वगेलापत्रकेसरान् ॥ ३ ॥ विनीय तस्य संलिह्यान्मात्रां नित्यं सुयन्त्रितः । अमृतप्राश्यमित्येतदश्विभ्यां निर्मितं पुरा ॥ ४ ॥ क्षीरमांसाशिनो हन्ति रक्तपित्तक्षतक्षयम् । तृष्णारुचिश्वासकासच्छर्दिहिक्काप्रमर्दनम् । मूत्रकृच्छ्रज्वरघ्नं च वल्यं स्त्रीरतिवर्धनम् ॥ ५ ॥

॥ अथ रसराजः ॥

मुक्ताप्रवालरसहेमसिताभ्रकान्तवङ्गं मृतं सकलमेतदहो विभाव्यम् । छिन्नारसेन च वरीसलिलेन सप्तवारं ततो मधुहविर्मरिचेन साकम् ॥ लिह्यादुरःक्षतहरं रसराजकाख्यं माषप्रमाणमतनूद्भवहेतुमानम् ॥ १ ॥ अन्यच्च तर्पणं शीतमविदाहि हितं लघु । अन्नपानं निषेव्यं तु क्षतक्षीणैः सुखार्थिभिः ॥ २ ॥ शोकं स्त्रियं क्रोधमसूयनं च त्यजेदुदारान् विषयान्भजेच्च । तथा द्विजातींस्त्रिदशान् गुरूंश्च कथाश्च पुण्याः शृणुयाद्द्विजेभ्यः ॥ ३ ॥ इत्युरःक्षतचिकित्सा ॥

---

१ (घ०) पालिकान् । २ (च० छ०) कर्षांश । ३ (घ०) मधूकं । ४ (ग० छ० ख०) पचा- (?) प्रदेन्मधु । ५ (ग० क० घ० छ०) मेनम् ।

॥ अथ कासनिदानम् ॥

धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वाच्च हि भोजनस्य वेगावरोधात्क्षवथोस्तथैव ॥ १ ॥

॥ तस्य सम्प्राप्तिमाह ॥

प्राणो ह्युदानानुगतः प्रदुष्टः सम्भिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः ॥ १ ॥

॥ अथ तस्य संख्यामाह ॥

पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः । क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम् ॥ १ ॥ पूर्वरूपं भवेत्तेषां शूकपूर्णगलास्यता । कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते ॥ २ ॥

॥ अथ वातिकमाह ॥

हृच्छङ्खमूर्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः । प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ॥ १ ॥

॥ अथ पैत्तिकमाह ॥

उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषार्तः । पित्तेन पीतानि वमेत्कटूनि कासेत्सपाण्डुः परिदह्यमानः ॥ १ ॥

॥ अथ कफजमाह ॥

प्रलिप्यमानेन मुखेन सीदञ्शिरोरुगार्तः कफपूर्णदेहः । अभक्तरुग्गौरवकण्डुयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥ १ ॥

॥ अथ क्षतकासमाह ॥

अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः । रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् ॥ ८ ॥

॥ अथ तेनैते उपद्रवाः ॥

स पूर्वं कासते शुष्कं ततः ष्ठीवेत्स शोणितम् । कण्ठेन रुजतात्यर्थं विभग्नेनेव चोरसा ॥ १ ॥ सूचिभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना । दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥ २ ॥ पर्वभेदज्वरश्वासतृष्णावैस्वर्यपीडितः । पारावत इवाकूजेत्कासवेगात्क्षतोद्भवात् ॥ ३ ॥

॥ अथ क्षयजमाह ॥

विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् । घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः ॥ कुपिताः क्षयजं कासं कुर्युर्देहक्षयप्रदम् ॥ १ ॥

॥ अथास्योपद्रवानाह ॥

स गात्रशूलज्वरदाहमोहान् प्राणक्षयं चोपलभेत् स कासी । शुष्कं स निष्ठीवति दुर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम् ॥ तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति ॥ १ ॥ इत्येष क्षयजः कासः क्षीणानां देहनाशनः । साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥ २ ॥

॥ अथ पुनरसाध्यत्वमाह ॥

नवौ कदाचित्सिध्येतामपि पादगुणान्वितौ । स्थविराणां जरा कासः सर्वो याप्यः प्रकीर्तितः ॥ १ ॥

॥ अथ चिकित्साद्वारेण साध्ययाप्यत्वमाह ॥

त्रीन्पूर्वान् साधयेत्साध्यान्पथ्यैर्याप्यांस्तु यापयेत् । पूयाभमरुणं श्यावं हरितं पीतनीलकम् ॥ १ ॥ निष्ठीवञ्श्वासकासार्तो न जीवति हतस्वरः । कासाच्छ्वासक्षयच्छर्दिस्वरसादादयो गदाः ॥ भवन्त्युपेक्षया यस्मात्तस्मात्तं त्वरया जयेत् ॥ २ ॥ इति कासनिदानम् ।

॥ अथ कासचिकित्सा ॥

अथ वातकासचिकित्सा ।

रूक्षस्यानिलजं कासमादौ स्नेहैरुपाचरेत् । सर्पिर्भिर्बस्तिभिः पेयाक्षीरयूषरसादिभिः ॥ १ ॥ ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान् । रसैर्मांसात्मगुप्तानां यूषैर्वा भोजयेद्धितान् ॥ २ ॥ दशमूली सुता श्वासकासहिक्कारुजापहा । यवागूर्दीपनी वृष्या वातरोगविनाशिनी ॥ ३ ॥ रसः कर्कोटकानां च घृतभृष्टः स नागरः । वातकासप्रशमनः शृङ्गीमत्स्यस्य वा पुनः ॥ ४ ॥

॥ अथापराजितलेहः ॥

सटीशृङ्गीकणाभार्गीगुडवारिदयासकैः । सतैलैर्वातकासघ्नो लेहोऽयमपराजितः ॥१॥

॥ अथ भार्ग्यादिलेहः ॥

भार्गीद्राक्षासटीशृङ्गीपिप्पलीविश्वभेषजम् । गुडतैलयुतो लेहो हितो मारुतकासिनाम् ॥ १ ॥

॥ अथ विश्वादिलेहः ॥

विश्वाभार्गीकणासोमवल्कं द्राक्षा सटी सिता । लिह्यात्तैलेन वातोत्थकासं जयति दुस्तरम् ॥ १ ॥

॥ अथ दशमूलादिघृतम् ॥

दशमूलीकषायेण भार्गीकल्कं घृते पचेत् । दक्षतित्तिरनिर्यूहे तत्परं वातकासजित् ॥ १ ॥

॥ अथ कण्टकार्यवलेहः ॥

चित्रकं पिप्पलीमूलं व्योषं मुस्तं दुरालभाम् । शटी पुष्करमूलं च श्रेयसी सुरसा वचा ॥ १ ॥ भार्गी छिन्नरुहा रास्ना कर्कटाख्या च कर्षिकान् । कल्कान्नि-दिग्धिद्विितुला कषाये पलविंशतिः ॥ २ ॥ मत्स्यण्डिकाया दत्वा तु सर्पिषः कुडवं पचेत् । सिद्धशीते पृथक् क्षौद्रपिप्पलीकुडवान्वितम् ॥ ३ ॥ चतुष्पलं तुगाक्षीर्याश्चूर्णं तत्र प्रदापयेत् । लेहयेत्कासहृद्रोगश्वासगुल्मनिवारणम् ॥ ४ ॥ चूर्णिता विश्वदुः-स्पर्शा शृङ्गीद्राक्षाशटीसिताः । लिह्याचैलेन वाताढ्यं कासं जयति दुस्तरम् ॥ ५ ॥ पञ्चमूलकृतः क्वाथः पिप्पलीचूर्णसंयुतः । रसः समश्नुतो नित्यं वातकासमुदस्यति ॥ ६ ॥ इति वातकासः ॥

॥ अथ पित्तकासे बलादिक्वाथः ॥

बलाद्विबृहतीद्राक्षावासाभिः कथितं जलम् । पित्तकासापहं पेयं शर्करामधु-योजितम् ॥ १ ॥

॥ अथ शट्यादिक्वाथः ॥

शटीह्रीबेरबृहतीशर्कराविश्वभेषजम् । एतं क्वाथं पिबेत्पूतं सघृतं पित्तकासनुत् ॥ १ ॥ शुण्ठीद्विपञ्चमूलस्य पिप्पलीद्राक्षयोस्तथा । कषायेण शृतं क्षीरं पिबेत्समधु-शर्करम् ॥ २ ॥

॥ अथ खर्जूरादिलेहः ॥

खर्जूरपिप्पलीद्राक्षासितालाजाः समांशकाः । मधुसर्पिर्युतो लेहः पित्तकासहरः परः ॥ १ ॥

॥ अथ क्षीरामलकघृतम् ॥

महिष्यजाविगोक्षीरधात्रीफलरसैः समैः । सर्पिष्प्रस्थं पचेद्युक्त्या पित्तकासनिब-र्हणम् ॥ १ ॥

॥ अथ वङ्गसेनात् ॥

काकोलीबृहतीमेदायुग्मैः सवृषनागरैः । पित्तकासे रसक्षीरयूषांश्चाप्युपकल्पयेत् ॥ १ ॥

॥ अथ षट्प्रस्थं घृतम् ॥

अपोथ्या क्षीरिणां शृङ्गान् पचेत् क्षीरचतुर्गुणे ॥ द्राक्षाकल्के घृतं सिद्धं लिह्या-त्पित्तकासनुत् ॥ १ ॥

॥ अथ क्षीरघृतम् ॥

क्षीरवृक्षाङ्कुरक्वाथः पचेत् क्षीरसमं घृतम् । पाययेत्पित्तकासघ्नं मधुना वावलेहयेत् १ ॥ इति वङ्गसेनात् पित्तकासः ॥

॥ अथ द्राक्षामलकादिलेहः ॥

द्राक्षामलकखर्जूरं पिप्पलीमरिचान्वितम् । पित्तकासहरं ह्येतल्लिह्यान्माक्षिकसर्पिषा ॥ १ ॥

॥ अथ कफकासः ॥

कफजे वमनं कार्यं कासे लङ्घनमेव च । शस्ताः यवाता प्रकृतिर्यूपाश्च कटुतिक्तकाः ॥ १ ॥ मुद्रामलाभ्यां यवदाडिमाभ्यां कर्कन्धुना शुष्कमूलकेन । शुण्ठीकणाभ्यां सकुलत्थकेन यूषो नवाङ्गः कफकासहन्ता ॥२॥ इति नवाङ्गयूषः ॥ सटी सातिविषा मुस्तशृङ्गी कर्कटकस्य च । अभया शृङ्गबेरं च समं सश्यादि पेषयेत् ॥ १ ॥ हिङ्गुसैन्धवसंयुक्तं तक्रोदकपरिप्लुतम् । श्लेष्मकासी लिहेदेतमवलेहं मुहुर्मुहुः ॥ २ ॥ इति शट्याद्यवलेहः । व्योषाजमोदचित्रकषड्ग्रन्थचव्यकल्कितं सर्पिः । कफकासश्वासहरं वासकरससाधितं समधु ॥ १ ॥ इति व्योषाद्यं घृतम् ॥ इतिश्लेष्मकासः ॥

॥ अथ द्वन्द्वकासचिकित्सा ॥

कट्फलं कत्तृणं भार्गी मुस्ता धान्यं वचाभया । शुण्ठी पर्पटकं शृङ्गी सुराह्वं च जले शृतम् ॥ १ ॥ मधुहिङ्गुयुतं पेयं कासे वातकफान्विते । कण्ठरोगे मुखे शूले हिक्काश्वासज्वरेषु च ॥ २ ॥

॥ अथ कट्फलादिः ॥

सिंहास्यामृतसिंहीनां क्वाथं मधुयुतं पुमान् । पिबेत्सपित्तकफजे कासे श्वासे क्षये ज्वरे ॥ १ ॥ वासकस्वरसः पेयो मधुयुक्तो हिताशिना । पित्तश्लेष्मकृते कासे तालीसाद्यं च योजयेत् ॥ २ ॥

॥ अथ क्षतकासः ॥

कासे तु क्षतजे बल्यं पाचनैर्बृंहणैरपि । शमनैः पित्तकासघ्नैरन्यैश्च मधुरौषधैः ॥ १ ॥ यवागूं वा पिबेत्सिद्धां क्षतोरस्कः सुशीतलाम् । इक्ष्विक्षुवालिकापद्ममृणालोत्पलचन्दनैः ॥ २ ॥ मधुकं पिप्पली द्राक्षा शृङ्गी चैव शतावरी । द्विगुणा च तुगाक्षीरी सिता सर्वैश्चतुर्गुणा । लिह्यात्तं मधुसर्पिर्भ्यां क्षतकासनिवृत्तये ॥ ३ ॥ इति इक्ष्वाद्यो लेहः । मञ्जिष्ठमूर्वानतवह्निपाठाकृष्णाहरिद्राविहितं तु चूर्णम् । क्षौद्रेण कासेऽवलिहेत्क्षतोत्थे पिबेद् घृतं चेक्षुरसे विपक्वम् ॥ १ ॥ इक्ष्विक्षुवालिकापद्ममृणालोत्पलचन्दनैः । शृतं पयो मधुयुतं सन्धानार्थं पिबेत्क्षती ॥ २ ॥ इति क्षतकासः ॥

॥ अथ क्षयकासः ॥

पिप्पलीगुडसंसिद्धं छागीक्षीरयुतं घृतम् । एतदग्निविवृद्ध्यर्थं सर्पिश्च क्षयकासिनाम् ॥ १ ॥ इति पिप्पल्यादिघृतम् ॥ ककुभपिष्टं कृत्वा वासारसभावितं बहून्वारान् । मधुघृतसितोपलाभिर्लेह्यं क्षयकासरक्तपित्तहरम् ॥ १ ॥ इति ककुभचूर्णम् ॥

॥ अथ पिप्पल्याद्यवलेहः ॥

पिप्पलीमधुकं पिष्टं कर्षकं ससितोपलम्। प्रस्थैकं गव्यमाज्यं च क्षीरमिक्षुरसस्तथा ॥ १ ॥ यवगोधूममृद्वीकाचूर्णमामलकीरसम्। तैलं च प्रसृतांशानि तत्सर्वं मृदुवह्निना ॥ २ ॥ पचेल्लेहं घृतक्षौद्रयुक्तं स श्वासकासजित्। क्षयहृद्रोगकासघ्नो हितो वृद्धाल्परेतसाम् ॥ ३ ॥ इति पिप्पल्याद्यवलेहः। अन्यच्च। पिप्पलीमधुकं द्राक्षा सुपक्वं बृहतीफलम्। घृतक्षौद्रयुतो लेहः क्षयकासनिबर्हणः ॥ १ ॥ सन्निपातभवो ह्येष क्षयकासः सुदारुणः। सन्निपातहितं तस्मात्कार्यमत्र चिकित्सितम् ॥ २ ॥ इति क्षयकासः ॥

॥ अथ कासश्वासः ॥

अमृतानागरफञ्जीव्याघ्रीपर्णीसुसाधितः क्वाथः। पीतः सकणाचूर्णः कासश्वासौ जयत्याशु ॥ १ ॥ इत्यमृतादिक्वाथः। भार्गीसनागरासिंहीकुलत्थं मूलकं तथा। पिबेत्पिप्पलिचूर्णेन कासश्वासौ व्यपोहति ॥१॥ इति भार्ग्यादिक्वाथः। स्वरसं शृङ्गबेरस्य माक्षिकेण समन्वितम्। पाययेच्छ्वासकासघ्नं प्रतिश्यायकफापहम् ॥ १ ॥ सेवितं मधुखण्डाभ्यां चूर्णं मरिचजं यदि। किमर्थं क्रियते चिन्ता कासश्वासपराजितैः॥२॥ कुलित्थः कण्टकारी च तथा ब्राह्मणयष्टिका। शुण्ठीसुरभिसंयुक्तः कासश्वासज्वरापहः ॥ ३ ॥ पौष्करं कट्फलं भार्गीविश्वपिप्पलिसाधितम्। पिबेत्क्वाथं कफोद्रेके कासे श्वासे च हृद्ग्रहे ॥३॥ कुनटीसैन्धवव्योषविडङ्गामरहिङ्गुभिः। लेहः साज्यमधुः कासहिक्काश्वासनिवारणः॥ ४ ॥ इति कुनट्यादिलेहः। श्वासकासहरा बार्हीपादा च क्षौद्रसर्पिषा। लिह्यान्मरिचचूर्णं वा सघृतक्षौद्रशर्करम् ॥ १ ॥ भार्गीशुण्ठीकणाचूर्णं गुडेन श्वासकासनुत्। पथ्याशुण्ठीगुडयुतां गुटिकां धारयेन्मुखे ॥ २ ॥ सर्वेषु श्वासकासेषु केवलं वा बिभीतकम्। नागरेणाभया तद्वत्कासमाशु व्यपोहति ॥ ३ ॥ इति कासश्वासः ॥

॥ अथ सर्वकासः ॥

सपिप्पलीपुष्करमूलपथ्याशुण्ठीसटीमूलकसूक्ष्मचूर्णम्। गुडेन युक्ता गुटिका प्रयोज्या कासेषु नासास्रववैस्वरे च ॥ १ ॥क्षवथौ गन्धनाशे च धूमपानं प्रयोजयेत्। अर्कमूलशिले तुल्ये ततोऽर्धेन कटुत्रिकम् ॥ २ ॥ चूर्णितं वह्निनिक्षिप्तं पिबेद्धूमं तु योगवित्। भक्षयेदथ ताम्बूलं पिबेद्दुग्धमथाम्बु वा ॥३॥ कासाः पञ्चविधा यान्ति शान्तिमाशु न संशयः। मनःशिलैलमरिचं मांसीमुस्तागुडैः पिबेत् ॥४॥ धूमं तस्यानु च पयः सुखोष्णं सगुडं पिबेत्। एष कासान्पृथग् द्वन्द्वसन्निपातसमुद्भवान् ॥५॥ शतैरपि प्रयोगाणां साधयेदमसाधितान्। मनःशिलालिप्तदलं बदर्यातपशोषितम्॥६॥ सक्षीरं धूमपानं च महाकासनिबर्हणम्। पीत्वा त्रिपुटधत्तूरमूलव्योषमनःशिलाः ॥७॥

---

१ (च०) शिलालं। २ (च०) मुस्तेङ्गुदैः।

तेन प्रलिप्य वसनं धूमवर्तिं प्रकल्पयेत् । धूमं तस्याः पिबेद्यस्तु त्रिदिनात्कसनं हरेत् ॥ ८ ॥ जातीपत्रशिलारालैर्योजयेद् गुग्गुलं समम् । अजामूत्रेण सम्पिष्टो धूमः कासहरः परः ॥ ९ ॥

॥ अथ जात्यादिधूमः ॥

जातीजटाकिसलयैर्बदरीदलैश्च जातीमसूरकफलैः सुमनःशिला च । स्याद्धूमवर्तिरिह गुग्गुलुना समेतैः कासच्छिदे बदरिकाग्निविदह्यमानैः ॥ १ ॥ रात्रिद्वयशिलाधूमपानात्कासश्रुतिः कुतः । जलपानादपि तथा क्षणेन क्षणदाक्षये ॥२॥ इतिजात्यादिधूमः ॥ हरीतकीकणाशुण्ठीमरीचगुडसंयुतः । कासघ्नो मोदकः प्रोक्तः परं चानलदीपनः॥१॥ इति हरीतक्याद्यो मोदकः ॥ शुण्ठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात् । खादेदिदं समसितं गुदजाग्निमान्द्यगुल्मारुचिश्वसनकण्ठहृदामयेषु ॥१॥इति समशर्करं चूर्णम् ॥ कर्पूरवालककोलजातीफलदलं समम् । लवङ्गनागमरिचकृष्णाशुण्ठ्यो विवर्धिताः ॥१॥ चूर्णं सितासमं ग्राह्यं रोचनं क्षयकासजित् । वैस्वर्यंकासश्वासघ्नं छर्दिं चैव क्षयं नयेत् ॥ प्रयुक्तं चान्नपानेषु भैषज्यं द्विगुणं हितम् ॥ २ ॥ इति कर्पूराद्यं चूर्णम् ॥ कर्षः कर्षांशः* पलं पलद्वयं स्यात्ततोऽर्धकर्षश्च । मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानाम् ॥ १ ॥ सर्वौषधैरसाध्या ये कासाः सर्ववैद्यनिर्मुक्ताः । अपि पूयं छर्दयतां तेषामिदमौषधं पथ्यम् ॥ २ ॥

॥ अथ मरिचाद्यं चूर्णम् ॥

देवदारुबलारास्नात्रिफलाव्योषपद्मकैः । सविडङ्गैः सितातुल्यैस्तच्चूर्णं सर्वकासनुत् ॥१॥बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम् । स्वरोपघाते कासे च लेहमेतं प्रयोजयेत् ॥२॥ द्वौ क्षारौ पञ्च मूलानि पञ्चैव लवणानि च । सटीनागरकोदीच्यकल्कं वा वस्त्रगालितम् ॥ पाययेच्च घृतोन्मिश्रं सर्वकासनिबर्हणम् ॥ ३ ॥

॥ अथ त्रिजातगुटिका ॥

त्रिजातमर्धकर्षं च पिप्पल्यर्धपलं सिता । द्राक्षामधुकखर्जूरं पलांशं श्लक्ष्णकल्कितम् ॥१॥ मधुना गुटिका घ्नन्ति ता वृष्याः पित्तशोणितम् । कासश्वासारुचिच्छर्दिमूर्च्छाहिध्मामदभ्रमान् ॥ २ ॥ क्षतक्षयस्वरभ्रंशप्लीहशोषाढ्यमारुतान् । रक्तनिष्ठीवहृत्पार्श्वरुक्पिपासाज्वरानपि ॥ ३ ॥

॥ अथ मरीचादिगुटिका ॥

शार्ङ्गधरात् । मरीचं कर्षमात्रं च पिप्पली कर्षसम्मिता । अर्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमात् ॥१॥ एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि । शाणप्रमाणां गुटिकां कृत्वा वक्त्रे च धारयेत् ॥ अस्याः प्रभावात्सर्वेऽपि कासा यान्त्येव संक्षयम् ॥ २ ॥

---

* अत्र कर्षांशो द्विकर्षमेव ।

१ (ख०) जातीमसूरकफलैः सुमनःशिला च ।

॥ अथ लवङ्गादिवटी ॥

तुल्या लवङ्गमरिचाक्षफलत्वचः स्युः सर्वैः समो निगदितः खदिरस्य सारः । बब्बूलवल्कलकषाययुजां चतुर्णां कासान्निहन्ति गुटिका घटिकाष्टकान्ते ॥ १ ॥ धनञ्जयत्रिजातकं कणाजटाकटुत्रिकम् । रसार्द्रकेन भावितं जयेच्च कासमाततम्॥२॥ कटुत्रिकं छिन्नलताकृशानुफलत्रिकं वेल्लभवं सरास्नम् । सशर्करं चूर्णमिदं सुसेव्यं कासाटवीदाहदवानलाख्यम् ॥ ३ ॥

॥ अथ बिभीतकावलेहः ॥

प्रस्थं बिभीतकानामस्थीनि विहाय साधयेदजामूत्रे । लेह्यस्त्ववलेहोऽयं मधुना सहितोऽतिकासहरः ॥ १ ॥

॥ अथ खदिरादिगुटिका ॥

खादिरं पौष्करं शृङ्गी कट्वलं[1] द्विजयष्टिका । हरीतकी लवङ्गं च व्योषं चातिविषं तथा ॥ १ ॥ कारवीयासममृता बृहतीद्वयमक्षकम् । पृथक्कर्षद्वयं ग्राह्यं सूक्ष्मचूर्णं तु कारयेत् ॥ २ ॥ सर्वैः समं खादिरं च मेलयित्वा विभावयेत् । दाडिमत्वक् तथा क्षुद्राखदिराम्भोभिरार्द्रकैः ॥ ३ ॥ बब्बूलत्वगुदलक्काथैराटरूपजलैस्तथा । सप्तधा भावयेद्बद्ध्वा गुटिका खादिरी मता ॥ कासश्वासौ निहन्त्याशु दुस्तरौ चिरजावपि ॥ ४ ॥ इति श्वासकासे खदिरादिगुटिका ॥

॥ अथार्द्रकावलेहः ॥

वैद्यजीवनात् । आर्द्रादर्धतुला गुडादपि तथा द्व्याम्रं च कुस्तुम्बरीदीप्यायोजरणत्रिजातजलदादेतत्पचेद्युक्तितः । लेहो रत्नकले तवैव कथितः प्राणप्रियाया मया कासार्शोज्वरपीनसश्वयथुरुग्गुल्मक्षयध्वंसनः ॥ १ ॥

॥ अथ व्याघ्रीहरीतकीलेहः ॥

समूलपुष्पच्छदकण्टकार्यास्तुलाजलद्रोणपरिप्लुता च । हरीतकीनां च शतं निदध्याद् ग्राह्यं तु पक्त्वा चरणावशेषम् ॥१॥ गुडस्य दत्वा शतमेतदग्नौ विपक्वमुत्तार्य ततः सुशीते । कटुत्रिकं च त्रिपलप्रमाणं पलानि षट् पुष्परसस्य चापि ॥ २ ॥ क्षिपेच्चतुर्जातपलं यथाग्नि प्रयुज्यमानो विधिनावलेहः । वातात्मकं पित्तकफोद्भवं च द्विदोषकासानपि सन्निपातान् ॥ ३ ॥ क्षतोद्भवं कासक्षयं च हन्यात् स पीनसश्वासमुरःक्षतं च । यक्ष्माणमेकादशरूपमुग्रं भृगूपदिष्टं हि रसायनं स्यात् ॥ ४ ॥

॥ अथ कासकण्डनावलेहः ॥

अजामूत्रं शतपलं मन्दाग्नौ गुडपाकवत् । पक्त्वा बिभीतकं चूर्णं पलद्वयमितं क्षिपेत् ॥ १ ॥ पिप्पली पिप्पलीमूलं पलमात्रं मृतायसम् । कण्टकारीफलरजो

---

१ (च०) कट्फलं ।

निक्षिपेच्च पलद्वयम् ॥ २ ॥ ततो माषद्वयं खादेट्टङ्कं कर्षमथापि च। क्षौद्रेणोष्णाम्बुना वापि सर्वकासात्प्रमुच्यते ॥ ३ ॥ असाध्या भिषजा त्यक्ताश्चिरजाः पथ्यवर्जिताः। ये कासास्तेऽप्यनेनाशु प्रणश्यन्ति न संशयः ॥ कासकण्डननामायं योग आत्रेयभाषितः ॥ ४ ॥

॥ अथागस्तिहरीतकीपाकः ॥

वृन्दात्। दशमूलीं स्वयं गुप्तां शङ्खपुष्पीं शटीं बलाम्। हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥ १ ॥ भार्गीपुष्करमूलं च द्विपलांशं यवाढकम्। हरीतकीशतं चैव जले पञ्चाढके पचेत् ॥ २ ॥ यवैः स्विन्नैः कषाये च पूतं तच्चाभयाशतम्। पचेद् गुडतुलां दत्त्वा कुडवं च पृथग् घृतात् ॥ ३ ॥ तैलात्पिप्पलिचूर्णाच्च सिद्धे शीते च माक्षिकात्। लिह्याद्द्वे चाभये नित्यं ततः खादेद्रसायनम् ॥ ४ ॥ वलीं च पलितं हन्याद्वर्णायुर्बलवर्धनम्। पञ्च कासान्क्षयश्वासान् हिक्कां च विषमज्वरान् ॥ ५ ॥ हन्यात्तथा ग्रहण्यर्शोहृद्रोगारुचिपीनसान्। अगस्तिविहितं धन्यमिदं श्रेष्ठं रसायनम् ॥ ६ ॥

॥ अथ वैद्यजीवनाद्विभीतकावलेहः ॥

आजस्य मूत्रस्य शतं पलं च शतं पलानां च कलिद्रुमस्य। पक्कं समध्वाशु निहन्ति कासं श्वासं च तद्वत्सबलं बलासम् ॥ १ ॥ कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम्। पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥ २ ॥ पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकम्। मुस्तकर्कटशृङ्गी च त्र्यूषणं धन्वयासकम् ॥ ३ ॥ भार्गी रास्ना शटी चैव शर्करा पलविंशतिः। प्रत्येकं च पलान्यष्टौ प्रदद्याद्घृततैलयोः॥४॥ पक्त्वा लेहत्वमायाते शीते मधुपलाष्टकम्। चतुष्पलं तुगाक्षीरीपिप्पलीनां चतुष्पलम् ॥ ५ ॥ क्षिप्त्वा निदध्यात्सुदृढे मृन्मये भाजने शुभे। लेहोऽयं हन्ति कासार्तिहिक्काश्वासानशेषतः ॥ ६ ॥ इति कण्टकार्यवलेहो वृन्दात् ॥ व्याघ्रीस्वरसविपक्वै रास्नाकट्फलसुगोक्षुरव्योषैः। सर्पिः स्वरोपघातं निहन्ति कासं च पञ्चविधम् ॥१॥ वृन्दात्। सर्पिर्गुडूचीवृषकण्टकारीक्वाथेन कल्केन च सिद्धमेतत्। पेयं पुराणज्वरकासशूलप्लीहाग्निमान्द्यग्रहणीगदेषु ॥ २ ॥

॥ अथ त्र्यूषणादिघृतं वृन्दात् ॥

त्र्यूषणं त्रिफलाद्राक्षाकाश्मर्यश्चाटरूपकम्। द्वे पाठे देवदार्व्यब्दस्वगुप्तं चित्रकं शटी ॥ १ ॥ व्याघ्री तामलकी मेदा काकनासा शतावरी। त्रिकण्टकं विदारी च पिष्ट्वा कर्षसमान्घृतात् ॥ २ ॥ प्रस्थं चतुर्गुणक्षीरसिद्धं कासहरं पिबेत्। ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥३॥ कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम्। त्र्यूषणं नाम विख्यातं घृतमेतन्महोत्तमम् ॥ ४ ॥

---

१ (च०) मानीय। २ (च०) विपक्वं।

॥ अथ कण्टकारीघृतम् ॥

समूलफलपत्रायाः कण्टकार्या रसाढकम् । घृतप्रस्थं बलाव्योषविडङ्गशटिदाडिमैः ॥ १ ॥ सौवर्चलयवक्षारविश्वामलकपौष्करैः । वृश्चीवबृहतीपथ्यायवानीचित्रकादिभिः ॥ २ ॥ मृद्वीकाचव्यवर्षाभूदुरालम्भाम्लवेतसैः । शृङ्गीतामलकीभार्गीरास्नागोक्षुरकैः पचेत् ॥ ३ ॥ कल्कैस्तत्सर्वकासेषु श्वासहिक्कासु शस्यते । कण्टकारीघृतं सिद्धं कफव्याधिनिषूदनम् ॥४॥ वृन्दात् ॥ द्वितीयं कण्टकारीघृतं योगतरङ्गिण्याः । कण्टकार्यास्तुलां क्षुण्णां कृत्वा द्रोणेऽम्भसः पचेत् । तेनाढकेन क्वाथस्य घृतप्रस्थं पिचून्मितैः ॥१॥ रास्नादुःस्पर्शषड्ग्रन्थिपिप्पलीद्वयचित्रकैः । सौवर्चलयवक्षारकृष्णामूलैश्च तत्पचेत् ॥ कासश्वासकफष्ठीवहिक्कारोचकपीनसान् ॥ २ ॥ इति कण्टकारीघृतम् ॥

॥ अथ रसाः ॥

रसगन्धकणापथ्याकलिद्रुफलवासकाः । भार्गी चेति क्रमाद् वृद्धैरेतद्द्वर्वरजद्रवैः॥१॥ पिष्टं विंशतिमेकान्तान् कुर्यात्क्षौद्रेण गोलकान् । कर्षप्रमाणमेतस्य तमेकं प्रातरुत्थितः ॥ २ ॥ दद्यान्मासत्रयं क्षुद्राक्वाथं दशकणायुतम् । पिबेत्तदनु कासाच्च श्वासाच्च परिमुच्यते ॥ ३ ॥ इति भार्गोत्तरवटी ॥

॥ अथ पर्पटीरसः

रसरत्नप्रदीपात् । भागौ रसस्य गन्धस्य द्वावेको लोहभस्मतः । एतद्घृते द्रवीभूतं मृद्वग्नौ कदलीदले ॥ १ ॥ पातयेद् गोमयगते तथैवोपरि योजयेत् । ततः पिष्ट्वा द्रवैरेभिर्मर्दयेत्सप्तधा पृथक् ॥ २ ॥ भार्गीमुण्डीमुनिवराजयानिर्गुण्डिकाद्रवैः । व्योषवासककन्यार्द्रद्रवैः शुष्कं पुटेल्लघु ॥ ३ ॥ अगन्धं खर्परे नाम्ना पर्पटीति रसो भवेत् । सर्वरोगहरः स्वैः स्वैरनुपानैर्द्विमाषतः ॥ ४ ॥ ताम्बूलपत्रसहिता कासश्वासहरा परा । सकणः सुरसाक्वाथोऽनुपानं वासगोजलम् ॥ ५ ॥

॥ अथ पारदादिचूर्णम् ॥

योगरत्नावलितः ॥ पारदं गन्धकं शुद्धं मृतं लोहं च टङ्कणम् । रास्नाविडङ्गत्रिफलादेवदारुकटुत्रयम् ॥ १ ॥ अमृतापद्मकक्षौद्रं पिचुतुल्यानि चूर्णयेत् । त्रिगुञ्जः सर्वकासघ्नो ज्वरारोचकमेहनुत् ॥ २ ॥

॥ अथ कासश्वासविधूननो रसः ॥

रसभागो भवेदेको गन्धकाद्द्वौ तथैव च । यवक्षारस्त्रिभागः स्याद् रुचकं च चतुर्गुणम् ॥ १ ॥ मरिचं पञ्चभागं स्याच्छुद्धं रसविमर्दितः । कासं पञ्चविधं हन्याच्छ्वासं पञ्चविधं हरेत् ॥ २ ॥

---

१ (च०) हिक्कासु । २ (च०) हिम्मा । ३ (ख०) शुष्कपुटे लघु ।

॥ अथ ताम्रपर्पटीरसः ॥

मृतं ताम्रं त्रिभागं च रसं तत्समगन्धकम् । भागमेकं वत्सनाभं कज्जलीखल्वम-ध्यगम् ॥ १ ॥ गोघृतेन कृतं कल्कं लोहपात्रे विपाचयेत् । ढालयेदर्कपत्रस्था पर्पटीरससिद्धये ॥ २ ॥ गुञ्जाद्वयं त्रयं चैव पिप्पलीमधुसंयुतम् । त्रिसप्तरात्रयोगेन रोगराजं च नाशयेत् ॥ ३ ॥ आर्द्रकस्य रसेनैव सन्निपातं नियच्छति । त्रिफलारससंयुक्ता सर्वपाण्डुं विनाशयेत् ॥४॥ वातारितैलसंयुक्ता सर्वशूलनिवारणी । कुमारीरसयोगेन वातपित्तोपशान्तिकृत् ॥ ५ ॥ बाकुचीरससंयुक्ता सर्वदद्रुविनाशनी । त्रिफला मधुसंयुक्ता सर्वमेहनिवारणी ॥६॥ खदिरक्वाथपानेन कुष्ठाष्टादशनाशनी । मन्थानभैरवेणोक्ता लोकानां हितकाम्यया ॥ ७ ॥ इति ताम्रपर्पटीरसः ॥

॥ अथ नागवल्लभः ॥

कर्षमाना मृगमदचोचटङ्कणिका अथ । कश्मीरजन्मदरदपिप्पल्यः स्युर्द्विकर्षकाः ॥ १ ॥ अकारकरभो जातीपत्री जातीफलं विषम् । प्रत्येकं पलमानानि चत्वार्यथ सुखल्वके ॥ २ ॥ अहिवल्लीदलरसैर्मर्दयेच्च दिनत्रयम् । मुद्गप्रमाणा वटका लीढा मध्वार्द्रकद्रवैः ॥ ३ ॥ ताम्बूलचर्विता मेहकासक्षयमरुद्धराः । नागवल्लभनामायं रसो विश्वोपकारकः ॥ ४ ॥ इति नागवल्लभरसो ग्रन्थान्तरात् ॥

॥ अथ हेमगर्भपोटलीरसः ॥

शार्ङ्गधरात् । रसस्य भागाश्चत्वारस्तावन्तः कनकस्य च । तयोश्च पिष्टिकां[1] कृत्वा गन्धो द्वादशभागिकः ॥ १ ॥ कुर्यात्कज्जलिकां तत्र मुक्ताभागाश्च षोडश । चतुर्विंशश्च शङ्खस्य भागैकं टङ्कणस्य च ॥ २ ॥ एकत्र मर्दयेत्सर्वं पक्वनिम्बुकजै रसैः । कृत्वा तेषां ततो गोलं मूषासम्पुटके न्यसेत् ॥ ३ ॥ मुद्रां दत्वा ततो हस्तमात्रे गर्ते च गोमयैः । पुटेद् गजपुटेनैव स्वाङ्गशीतं समुद्धरेत् ॥ ४ ॥ पिष्ट्वा गुञ्जाचतुर्मानं दद्याद् गव्याज्यसंयुतम् । एकोनत्रिंशदुन्मानमरिचैः सह दीयते ॥ ५ ॥ राजते मृन्मये पात्रे काचजे वाथ लोहजे । लोकनाथसमं पथ्यं कुर्यात्प्रयतमानसः ॥ ६ ॥ कासे श्वासे क्षये वाते कफे ग्रहणिकागदे । अतिसारे प्रयोक्तव्या पोटली हेमगर्भिका ॥ ७ ॥ इति हेमगर्भपोटलीरसः ॥

॥ अथ द्वितीयहेमगर्भपोटलीरसः ॥

शुद्धसूतं चतुर्भागं द्विभागं गन्धकस्य च । भागमेकं सुवर्णं च त्रिभागं शुल्बभस्म च ॥१॥ कुमारीरससंयुक्तं सप्ताहं मर्दयेद्दृढम् । गुटिकां कारयेत्तां तु बध्नीयात् खरकर्पटे ॥ २ ॥ वस्त्रे किञ्चिद् बलिं स्थाप्य तत्र गोलं निधाय च । बध्नीयात् पोटलीं गाढां पश्चाद्वस्त्रेण वेष्टयेत् ॥ ३ ॥ सर्वभागसमं गन्धं दत्वा मृन्मयभाजने । तन्मध्ये पोटलीं न्यस्य मुखे मुद्रां च कारयेत् ॥ ४ ॥ विधाय च्छिद्रं मुद्रास्थं द्रावं

१ (च०) धारयेत् । २ (च०) पिष्टिकां ।

दृष्ट्वा शलाकया । पाचयेत्सिकतायन्त्रे रसोऽयं मृदुवह्निना ॥ ५ ॥ यामार्धेन सुसञ्जातं स्वाङ्गशीतं समुद्धरेत् । कासे श्वासे क्षये वाते कफे ग्रहणिकागदे । सर्वरोगेषु दातव्या हेमगर्भाख्यपोटली ॥ ६ ॥

॥ अथान्यः प्रकारः ॥

शुद्धसूतं त्रिभागं च तत्समं शुल्बभस्म च । भागैकं गन्धकं दद्यात्तदर्धं स्वर्णमेव च ॥ १ ॥ कज्जलीं कारयेत्तां तु खल्वके सप्तवासरम् । अथ निर्गुण्डिकाद्रावैर्मर्दयेद्दिनसप्तकम् ॥ २ ॥ अथवा कनकद्रावैर्गुटिकां कारयेत्ततः । किञ्चिद्वल्लिसमायुक्ते वस्त्रे गोलं निधाय च ॥ ३ ॥ बध्नीयात्पोटलीं गाढामेवं च त्रिपुटं चरेत् । दृढमृन्मयपात्रे तु गन्धं दत्वाधरोत्तरम् । तन्मध्ये पोटलीं न्यस्य निर्वातभवनान्तरे । वितस्तिप्रमितं गर्तं तस्मिन् संस्थाप्य मुद्रयेत् ॥ ५ ॥ अङ्गुलिमृत्तिकाभिश्च ज्वालयेदिन्धनानि च । यामेन सिद्धतां याति हेमगर्भाख्यपोटली ॥ अनुपानानुसारेण सर्वरोगेषु योजयेत् ॥ ६ ॥

॥ अथान्यः प्रकारः ॥

रसं च गन्धकं चैव समं खल्वे विमर्दयेत् । कज्जल्या[1] च तथा स्वर्णसंशुद्धं च विनिक्षिपेत् ॥१॥ सुसूक्ष्मे सुदृढे वस्त्रे बद्ध्वा पोटलिकां दृढाम् । गन्धकेनायसे पात्रे पक्त्वा पोटलिकां चिरम् ॥२॥ मन्दाग्निना पचेद्यावद् व्योमवर्णं भवेत्तु तत् । हेमगर्भ इति ख्यातो रसोऽयं श्वासकासनुत् ॥ अनुपानविभेदेन सर्वरोगाञ्जयत्यसौ॥३॥

॥ अथ कफकुञ्जररसः ॥

रसगन्धौ समांशौ च स्नुह्यर्कपयसः पलम् । पलं च पञ्चलवणमेकीकृत्वावचूर्णयेत् ॥१॥ आलोड्य चार्कदुग्धेन पूरयेच्छङ्खमध्यतः । पिप्पलीभकणावारिचूर्णं कृत्वा प्रलेपयेत् ॥२ ॥ प्रज्वालयेद्याममात्रं सूक्ष्मचूर्णं तु कारयेत् । कर्पूरनागपत्रैश्च देयो मात्रार्धगुञ्जया ॥ ३ ॥ श्वासं कासं च हृद्रोगं कफं पञ्चविधं तथा । नाशयेत् सर्वरोगांश्च रसोऽयं कफकुञ्जरः ॥ ४ ॥

॥ अथ कफरोगे नागरसः ॥

लवङ्गजातीफलजातिपत्रिकास्तथैव नागोषणग्रन्थिकानि । कर्षप्रमाणानि तथैकशाणं कस्तूरिकाकुङ्कुमयोः प्रयुञ्ज्यात् ॥ १ ॥ आर्द्राम्बुनाथ विहिता वटिका त्रिगुञ्जा चार्द्राम्भसापि विनिहन्ति कफक्षयादीन् । किं श्वासकासं जठरस्य शूलं नानानुपानैः सकलामयघ्नम् ॥ २ ॥

॥ अथोन्मत्तभैरवरसः ॥

पारदं दरदं शुद्धं गन्धकं कज्जलाकृति । गजकणावत्सनागं शुण्ठी चोन्मत्तबी-

---

1 (क०) कज्जल्यां ।

जकम् ॥ १ ॥ जातीफलं जातिपत्रं लवङ्गमरिचं तथा। अकलकरं समानं स्यान्मर्दयेच्च दिनत्रयम् ॥ २ ॥ आर्द्रकस्य रसेनैव गुटिकां वल्लसन्निभाम्। मधुना चपला चैव क्षयश्वासनिबर्हणः ॥३ ॥ कफरोगविनाशाय रस उन्मत्तभैरवः। अनुपानविशेषेण धातुपुष्टिकरः स्मृतः ॥ ४ ॥ इति रसाः।

॥ अथ पथ्यापथ्यम् ॥

शालिषष्टिकगोधूममाषमुद्गकुलत्थकाः। छाग्याः पयो घृतं बिम्बी वार्ताकं बालमूलकम् ॥ १ ॥ कासमर्दकजीवन्तीवास्तुकं बीजपूरकम्। गोस्तनी लशुनं लाजा व्योषमुष्णोदकं मधु ॥ २ ॥ पथ्यमेतद्यथादोषमुक्तं कासगदातुरे। मैथुनं स्निग्धमधुरं दिवा स्वापं पयो दधि ॥ पिष्टान्नं पायसादीनि कासी धूमं च वर्जयेत् ॥३॥ इति पथ्यापथ्यम्। इति कासचिकित्सा ॥

॥ अथातो हिक्कानिदानं व्याख्यास्यामः ॥

विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः। शीतपानाशनस्नानरजोधूमातपानिलैः ॥ १ ॥ व्यायामकर्मभाराध्ववेगाघातापतर्पणैः। हिक्का श्वासश्च कासश्च नृणां समुपजायते ॥ २ ॥

॥ अथ सम्प्राप्तिमाह ॥

मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन्। स घोषवानाशु हिनस्ति यस्मात्ततस्तु हिक्केत्यभिधीयते बुधैः ॥ १ ॥ अथ तासां पूर्वरूपमाह ॥ कण्ठोरसोर्गुरुत्वं च वदनस्य कषायता। हिक्कानां पूर्वरूपाणि कुक्षेराटोप एव च ॥१॥

॥ अथ तासां नामान्याह ॥

अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा। वायुः कफेनानुगतः पञ्च हिक्काः करोति हि ॥ १ ॥

॥ अथान्नजालक्षणमाह ॥

पानान्नैरतिसम्भुक्तैः सहसा पीडितोऽनिलः। हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् ॥ १ ॥

॥ अथ यमलामाह ॥

चिरेण यमलैर्वेगैर्या हिक्का सम्प्रवर्तते। कम्पयन्ती शिरोग्रीवं यमलां तां विनिर्दिशेत् ॥ १ ॥

॥ अथ क्षुद्रामाह ॥

विकृष्टकालैर्या वेगैर्मन्दैः समभिवर्तते। क्षुद्रिका नाम सा ज्ञेया सर्वगात्रप्रकम्पिनी॥१॥

॥ अथ गम्भीरामाह ॥

नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी। अनेकोपद्रववती गम्भीरा नाम सा स्मृता॥ १॥

॥ अथ महतीमाह ॥

मर्माण्यापीडयन्तीव सततं या प्रवर्तते। महाहिक्केति सा ज्ञेया सर्वगात्रप्रकम्पिनी॥ १॥

॥ अथासाध्यत्वलक्षणमाह ॥

आयम्यते हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं ताम्यते यस्य नित्यम्। क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं तौ द्वौ चान्त्यौ वर्जयेद्धिक्कमानौ॥ १॥ अतिसञ्चितदोषस्य भक्तच्छेदकरस्य च। व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः॥ २॥

॥ अथ पुनरसाध्यत्वमाह ॥

एषां या सा समुत्पन्ना हिक्का हन्त्याशु जीवितम्। यमिका च प्रलापार्तिमोहतृष्णासमन्विता॥ १॥ अक्षीणश्चाप्यदीनश्च स्थिरधात्विन्द्रियश्च यः। तस्य साधयितुं शक्या यमिका हन्त्यतोऽन्यथा॥ २॥ वातेन हिक्काः प्रभवन्ति पञ्च तासामसाध्यत्वमुदाहरन्ति। अक्षीणमांसस्य भवेच्च साध्या प्रान्ते च हिक्के परिवर्जनीये॥ ३॥ इति हिक्कानिदानम्॥

॥ अथ हिक्काचिकित्सा ॥

नारीपयःपिष्टसुशुक्रचन्दनं कृतं सुखोष्णं च ससैन्धवं च। पिष्टं तथा सैन्धवमम्बुना वा निहन्ति हिक्कां ननु नावनेन॥१॥ इति नारायणीयात्॥ मधुकं मधुसंयुक्तं पिप्पली शर्करान्विता। नागरं गुडसंयुक्तं हिक्काघ्नं नावनत्रयम्॥१॥ इति वृन्दात्॥

॥ अथ यवागूः ॥

दशमूलीशटीरास्नापिप्पलीविश्वपौष्करैः। शृङ्गीतामलकीभार्गीगुडूचीनागरादिभिः॥ १॥ यवागूं मधुना सिद्धां कषायं वा पिबेन्नरः। कासहृद्ग्रहपार्श्वार्तिहिक्काश्वासप्रशान्तये॥२॥ इति वृन्दात्। हिङ्गुसौवर्चलाजाजीविडपौष्करचित्रकैः। सटीकर्कटशृङ्गी च यवागूः श्वासहिक्किनाम्॥१॥ इति हिङ्ग्वादियवागूः। चिकित्सासारात्॥

---

१ (च०) जत्रुमूलात्प्रधावति। २ (च०) भक्तद्वेषकृशस्य च। ३ (च०) चामलकी।

॥ अथ यूषः ॥

कासमर्दकपत्राणां यूषः शोभाञ्जनस्य च । शुष्कमूलकयूषश्च हिक्काश्वासनिवारणः ॥ सदधिव्योषसर्पिष्को यूषो वार्ताकजो हितः ॥ १ ॥ इति वृन्दात् ॥

॥ अथ क्वाथः ॥

दशमूलीजलयुतं स्रुतं हिक्किषु योजयेत् । श्वासकासहरः सर्वो विधिरत्रापि युज्यते ॥ १ ॥ इति रसरत्नदीपात् । पाटल्याः फलतोयेन क्षौद्रेण च समन्वितम् । हेमभस्म निहन्त्येव हिक्काः पञ्चातिदुस्तराः ॥ १ ॥ दशमूलीकषायेण मधुना च समन्वितम् । कान्तायोभस्म हिक्कानां पञ्चतां पञ्चतां नयेत् ॥ २ ॥ कुलित्थयवकोलाम्बुदशमूलबलाजलम् । पानार्थं कल्पयेत्कासहिक्काश्वासप्रशान्तये ॥ ३ ॥ इति वृन्दात् । धात्री च मागधी शुण्ठी क्वाथश्चैषां सितायुतः । हिनस्ति हृदयोद्भूतां हिक्कां प्राणापनोदिनीम् ॥ इति वैद्यविलासात् ॥ १ ॥

॥ अथ चूर्णम् ॥

शिखिपिच्छभस्म कृष्णाचूर्णं मधुमिश्रितं मुहुर्लीढम् । हिक्कां हरति प्रबलां श्वासं चैवातिदुस्तरं छर्दिम् ॥ १ ॥ इति चिकित्सादीपात् ॥ कृष्णामलकशुण्ठीनां चूर्णं मधुसितायुतम् । मुहुर्मुहुः प्रयोक्तव्यं हिक्काश्वासनिवारणम् ॥ १ ॥ हिक्काश्वासी पिबेद् भार्गीं सविश्वामुष्णवारिणा । नागरं वा सिताभार्गीसौवर्चलसमन्वितम् ॥ २ ॥ ॥ इति वृन्दात् ॥ शृङ्गीकटुत्रिकफलत्रयकण्टकारी—भार्गीसपुष्करजटालवणानि चैषाम् । चूर्णं पिबेदशिशिरेण जलेन हिक्काश्वासोर्ध्ववातकसनारुचिपीनसेषु ॥ १ ॥ इति शृङ्ग्यादिचूर्णम् । योगशतकात् ॥ विश्वामिसीकणाचूर्णःससितः समधुः स्मृतः । गुडूचीनागरं नस्यं हिक्काधिक्कारकारकम् ॥१॥ इति वैद्यजीवनात् ॥

॥ अथ सामान्यप्रतीकारः ॥

हिक्कार्तस्य पयश्छागं हितं नागरसाधितम् । रसान् पचेत्फलाम्लांश्च लाजाचूर्णं ससैन्धवम् ॥ १ ॥ इति नारायणीयात् ॥ यष्ट्याह्वं वा माक्षिकेणावलीढं कृष्णाचूर्णं शर्कराढ्यं च किं वा । सर्पिः कोष्णं क्षीरमुष्णं रसो वा हन्याद्धिक्कोः पानतः पञ्च हिक्काः ॥ १ ॥ इति सुश्रुतात् ॥ मधुसौवर्चलोपेतं मातुलिङ्गरसं पिबेत् । हिक्कार्तो मधुना लिह्याच्छुण्ठीधात्रीकणान्वितम् ॥ १ ॥ योगतरङ्गिण्याम् ॥ कपित्थस्वरसो वापि रस आमलकस्य च । पिप्पलीक्षौद्रसंयुक्तो हिक्काश्वासनिवारणः ॥ १ ॥ पिप्पलीमूलमधुकगुडगोऽश्वशकृद्रसान् । हिध्माभिष्यन्दकासघ्नाः लिह्यान्मधुघृतान्वितान् ॥ २ ॥ खर्जूरः पिप्पली द्राक्षा शर्करा चेति तत्समम् । मधुसर्पिर्युतो लेहो हिक्काश्वासनिवारणः ॥३॥ इति चिकित्सातसारात् ॥ कटुकागैरिकाभ्यां च मुक्ताभस्म

१ (क॰) वातार्क—२ (क॰) स्रुतं । (छ॰) स्रुतम् । ३ (ग॰) मिश्री । (घ॰ छ॰) मिश्र ।
४ (घ॰) पञ्च-

तथैव च । बीजपूरस्य तोयेन ताम्रं तद्वत्समाक्षिकम् ॥१॥ हेममुक्तार्ककान्तानां भस्म वल्लमितं वरम् । बीजपूररसक्षौद्रसौवर्चलसमन्वितम् ॥ २ ॥ हन्ति हिक्काशतं सत्यमेकमात्राप्रयत्नतः । का कथा पञ्चहिक्कानां हरणे सूत उच्यते ॥ ३ ॥ इति बौद्धसर्वस्वात् ॥

॥ अथ शङ्खचूलो रसः ॥

रसरत्नप्रदीपात् ॥ रसाभ्रहेमभस्मानि वैक्रान्तं सर्वतुल्यकम् । सर्वैः पञ्चगुणं शङ्खचूर्णं शुष्कं विमर्दयेत् ॥ १ ॥ लेहयेन्मधुना माषचतुष्कं सानुपानकम् । हिक्कां पञ्चविधां हन्ति मुमूर्षोरपि तत्क्षणात् ॥ २ ॥ इति शङ्खचूलो रसः ॥ कासप्रकरणोक्तं च भिषगत्र नियोजयेत् । क्षयोक्तं वात्र कासे च हिक्काश्वासे नियोजयेत् ॥१॥

॥ अथ पथ्यापथ्यम् ॥

स्वेदनं वमनं नस्यं धूमपानं विरेचनम् । निद्रा स्निग्धानि चान्नानि मृदूनि लवणानि च ॥ १ ॥ जीर्णाः कुलित्था गोधूमाः शालयः षष्टिका यवाः । एणतित्तिरलावाद्या जाङ्गला मृगपक्षिणः ॥ २ ॥ उष्णोदकं मातुलिङ्गं पटोलं बालमूलकम् । पक्कं कपित्थं लशुनं क्षौद्रं चेष्टानि हिक्किनाम् ॥३॥ निष्पावमाषपिण्याकवारिजानूपमामिषम् । अविदग्धं दन्तकाष्ठं वस्तिं मत्स्यांश्च सर्षपान् ॥ ४ ॥ आम्लं तुम्बीफलं कन्दं तैलभृष्टमुपोदिकाम् । गुरुशीतं चान्नपानं हिक्कारोगी विवर्जयेत् ॥ ५ ॥ इति हिक्काचिकित्सा ॥

॥ अथ श्वासचिकित्सां व्याख्यास्यामः ॥

कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोषकोपनैः । आमातिसारवमथुविषपाण्डुज्वरैरपि ॥ १ ॥ रजोधूमानिलैर्मर्मघातादपि हिमाम्बुना । यैरेव कारणैर्हिक्का बहुभिः सम्प्रवर्तते ॥ २ ॥ तैरेव कारणैः श्वासो घोरो भवति देहिनाम् । विहाय प्रकृतिं वायुः प्राणोऽथ कफसंयुतः ॥ श्वासयत्यूर्ध्वगो भूत्वा तं श्वासं परिचक्षते ॥ ३ ॥ दोषाणामप्यनेकत्वाच्छोषितस्यापि सम्भवात् । श्वासो नैकप्रकारः स्यादिति तावद्व्यवस्थितम् ॥ ४ ॥ महोर्ध्वच्छिन्नतमकक्षुद्रभेदैस्तु पञ्चधा । भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ ५ ॥

॥ अथ तस्य पूर्वरूपमाह ॥

प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च । आनाहो वक्त्रवैरस्यं शङ्खनिस्तोद एव च ॥ १ ॥

॥ अथ महाश्वासलक्षणमाह ॥

यदा स्रोतांसि संरुध्य मारुतः कफपूर्वकः । विष्वग्व्रजति संरुद्धस्तदा श्वासान् करोति सः ॥ १ ॥ उद्धूयमानवातो यः शब्दवद्दुःखितो नरः । उच्चैः श्वसिति सं-

क्रुद्धो मत्तर्षभ इवानिशम् । प्रनष्टज्ञानविज्ञानस्तथा विभ्रान्तलोचनः ॥२ ॥ विवृताक्षाननो बद्धमूत्रवर्चा विशीर्णवाक् । दीर्घं प्रश्वसितं चास्य दूराद्विज्ञायते भृशम् । महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥ ३ ॥

॥ अथोर्ध्वश्वासलक्षणमाह ॥

ऊर्ध्वं श्वसिति यो दीर्घं न च प्रत्याहरत्यधः । श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः॥१॥ऊर्ध्वदृष्टिर्विपश्यंस्तु विभ्रान्ताक्ष इतस्ततः। प्रमुह्यन्वेदनार्तश्च शुष्कास्यो रतिपीडितः ॥ २ ॥ ऊर्ध्वश्वासे प्रकुपिते ह्यधः श्वासो निरुध्यते । मुह्यतस्ताम्यतश्चोर्ध्वं श्वासस्तस्यैव हन्त्यसून् ॥ ३ ॥

॥ अथ विच्छिन्नश्वासलक्षणमाह ॥

यस्तु श्वसिति विच्छिन्नं सर्वप्राणेन पीडितः । न वा श्वसिति दुःखार्तो मर्मभेदरुगर्दितः ॥ १ ॥ आनाहस्वेदमूर्च्छार्तो दह्यमानेन बस्तिना । विप्लुताक्षः परिक्षीणः श्वसन् रक्तैकलोचनः ॥ २ ॥

॥ अथ व्याधिप्रभावादसाध्यत्वमाह ॥

विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः । छिन्नश्वासेन विच्छिन्नः स शीघ्रं विजहात्यसून् ॥ १ ॥

॥ अथ तमकलक्षणमाह ॥

प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते । ग्रीवां शिरश्च संगृह्य श्लेष्माणं समुदीर्य च ॥ १ ॥

॥ अथ तेन कफेन रुद्धो वायुरेतानि करोति ॥

करोति पीनसं तेन रुद्धो घुर्घुरकं तथा । अतीवतीव्रवेगं च श्वासं प्राणप्रपीडकम् ॥ १ ॥

॥ अथ तेन श्वासवेगेन प्रताम्यति ॥

प्रताम्यति स वेगेन तस्याग्निः सन्निरुध्यते । प्रमोहं कासमानश्च स गच्छति मुहुर्मुहुः ॥ १ ॥ श्लेष्मणा मुच्यमानेन भृशं भवति दुःखितः । तस्यैव च विमोक्षान्ते मुहूर्तं लभते सुखम् ॥२॥ तथास्योद्ध्वंसते कण्ठः कृच्छ्राच्छक्नोति भाषितुम् । न चापि निद्रां लभते शयानः श्वासपीडितः ॥ ३ ॥ पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः । आसीनो लभते सौख्यमुष्णं चैवाभिकाङ्क्षति॥४॥उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्तिमान् । विशुष्कास्यो मुहुः श्वासो मुहुश्चैवावधम्यते ॥५॥ मेघाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्धते । स याप्यस्तमकः श्वासः साध्यो वा स्यान्नवोत्थितः ॥ ६ ॥

---

१ (च०) संरब्धो । २ (च०) दीनः । ३ (च०) त्रस्यते । ४ (च०) नन्दति ।

॥ अथ तमकस्यैव पित्तानुबन्धाज्ज्वरादियोगेन प्रतमकसंज्ञामाह ॥

ज्वरमूर्च्छापरीतस्य विद्यात्प्रतमकं तु तम् । उदावर्तरजोऽजीर्णक्लिन्नकायनिरोधजः ॥ १ ॥ तमसा वर्धतेऽत्यर्थं शीतैश्चाशु प्रशाम्यति । मज्जतस्तमसीवास्य विद्यात्प्रतमकं तु तम् ॥ २ ॥

॥ अथ क्षुद्रश्वासलक्षणमाह ॥

रूक्षायासोद्भवः कोष्ठे क्षुद्रवातमुदीरयेत् । क्षुद्रश्वासो न सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः ॥ १ ॥ हिनस्ति न स गात्राणि न च दुःखो यथेतरे । न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥ २ ॥ इन्द्रियाणां व्यथां वापि काञ्चिदापादयेद्रुजम् । स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः ॥ ३ ॥.

॥ अथ साध्यासाध्यानाह ॥

वाताधिको भवेत्क्षुद्रस्तमकश्च कफाधिकः । कफवाताधिकः पित्तसंसर्गाच्छिन्नसंज्ञकः ॥ १ ॥ श्वासो मारुतभूयिष्ठो महानूर्ध्वस्तथा तमः । क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ॥ त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥ २ ॥ कामं प्राणहरा रोगा बहवो न तु ते तथा । यथा श्वासश्च हिक्का च हरतः प्राणमाशु वै ॥ ३ ॥ इति श्वासनिदानम् ॥

॥ अथ श्वासचिकित्सा ॥

स्नेहवस्तिमृते केचिदूर्ध्वं चाधश्च शोधनम् । मृदु प्रणयतां श्रेष्ठं श्वासिनामादिशन्ति हि ॥ १ ॥ सर्वेषु श्वासरोगेषु वातश्लेष्मनिबर्हणम् । विदधीत विधिं विद्वानादौ स्वेदं मृदुं तथा ॥ २ ॥

॥ अथ क्वाथः ॥

कुलत्थनागरव्याघ्रीवासाभिः क्वथितं जलम् । पीतं पौष्करसंयुक्तं श्वासकासनिवारणम् ॥ १ ॥ इति कुलत्थादिः । दशमूलीकृतः क्वाथः पौष्करेणावचूर्णितः । श्वासकासप्रशमनः पार्श्वशूलनिवारणः ॥ १ ॥ इति दशमूलादिः ॥ देवदारुवचाव्याघ्रीविश्वकट्फलपौष्करैः । कृतः क्वाथो जयत्याशु श्वासकासावशेषतः ॥ १ ॥ इति देवदार्वादिः ॥ सिंहीनिशासिंहमुखीगुडूचीविश्वोपकुल्याभृगुजाघनानाम् । कृष्णामरीचैर्मिलितः कषायः श्वासाटवीदाहपयोद एषः ॥ १ ॥ इति वैद्यविलासात् ॥ वासाहरिद्रामगधागुडूचीभार्गीघनानागररिङ्गणीनाम् । क्वाथेन मारीचकणान्वितेन श्वासः शमं याति न कस्य पुंसः ॥ १ ॥ अयि प्राणप्रिये जातीफललोहितलोचने । भार्गीनागरयोः क्वाथं श्वासत्रासाय पाययेत् ॥ २ ॥ इति वैद्यजीवनात् ॥ द्राक्षामृता-

---

१ (च०) उदीरयन् ।

नागरमुष्णतोयं कृष्णाविपाकं बहुरोगनिघ्नम्। श्वासं च शूलं कसनं च मान्द्यं जीर्णज्वरं चैव जले च तृष्णाम् ॥ १ ॥ इति शङ्कराख्यात् ॥

॥ अथ चूर्णम् ॥

कूष्माण्डकशिफाचूर्णं पीतं कोष्णेन वारिणा। शीघ्रं शमयति श्वासं कासं चैव सुदारुणम् ॥१॥ इति योगतः। शृङ्गीकटुत्रयफलत्रयकण्टकारीभार्गीसपुष्करजटालवणानि पञ्च। चूर्णं पिबेदशिशिरेण जलेन हिक्कां श्वासोर्ध्ववातकसनारुचिपीनसेषु ॥ १ ॥ शृङ्ग्यादियोगशतात्। शटीभार्गीवचाव्योषपथ्यारुचककट्फलम्। तेजोह्वा पौष्करं शृङ्गी सक्षौद्रं श्वासकासनुत् ॥ १ ॥ गुडोषणनिशारास्नाद्राक्षामागधिकाः समाः। तैलेन चूर्णिता लीढास्तीव्रश्वासनुदः स्मृताः ॥ २ ॥ वृन्दात्। शुण्ठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात्। खादेदिदं समसितं गुदजाग्निमान्द्यगुल्मारुचिश्वसनकण्ठहृदामयेषु ॥ १ ॥ इति योगशतात्। मर्कटीनां तु बीजानां चूर्णं माक्षिकसर्पिषा। प्रलिह्यात्प्रातरुत्थाय श्वासार्तः स्वास्थ्यमाप्नुयात् ॥ १ ॥ इति चिकित्सासारात् ॥

॥ अथावलेहः ॥

गुडं कटुकतैलेन मिश्रयित्वा समं लिहेत्। त्रिःसप्ताहप्रयोगेण श्वासो निःशेषतां व्रजेत् ॥ १ ॥ इति गुडावलेहः। हरिद्रा मरिचं द्राक्षा गुडो रास्ना कणा शटी। तैले नैम्बे लिहन् हन्याच्छ्वासान्प्राणहरानपि ॥ १ ॥ इति हरिद्रादिः ॥ भार्गीनागरयोश्चूर्णं लीढमार्द्रकवारिणा। श्वासं निहन्ति दुर्धर्षं पञ्चानन इव द्विपम् ॥ १ ॥ इति भार्ग्यादिः। व्याघ्रीशतं स्यादभयाशतं च द्रोणे जलस्य प्रपचेत्कषायम्। तुलाप्रमाणेन गुडेन युक्तं पक्त्वाभयाभिः सह ताभिरत्र ॥ १ ॥ शीते क्षिपेत्षण्मधुनः पलानि एतानि च त्रीणि कटुत्रयस्य। त्वक्पत्रकैलाकरिकेसराणां चूर्णात्पलं चेति विदेहदक्षः ॥ २ ॥ क्षुद्रावलेहः कफजान्विकारान् सश्वासशोषानपि पञ्च कासान्। हिक्कासुरोरोगमपस्मृतिं च हत्वा विवृद्धिं कुरुतेऽनलस्य ॥ ३ ॥ इति क्षुद्रावलेहः। योगतरङ्गिण्यामित्यादियोगः। भार्गीजटापलशतं सलिलार्मणस्थं युक्पञ्च मूलतुलया सहितं विपाच्य। पादस्थिते तु शतमत्र हरीतकीनां पक्तव्यमुज्ज्वलगुडस्य शतेन साकम् ॥ १ ॥ उत्तार्य तत्र शिशिरे मधुनः पलानि चत्वारि च द्विगुणितानि फलत्रयं च। व्योषं तृटीत्वगिभकेसरपत्रकाणामेषां पलं खलु निधेयमथोपयोज्यम् ॥२॥ श्वासं च कासमपि शोषमथातिहिक्कामैकाहिकं ज्वरमथोत्कफपीनसं च। हन्याद्रसायनमिदं हि पुरन्दरस्य प्रोक्तं सहस्रकरपुत्रभिषग्वराभ्याम् ॥ ३ ॥ इति वीरसिंहावलोकाद्भार्गीहरीतक्यवलेहः। पक्त्वा पञ्च तुलागुडामलशिखिच्छिन्नादशाढ्यम्भसा पथ्यापात्रवतीकृताशिखिशिवाव्योषं चतुर्जातकात्। क्षौद्राच्च त्रिपलाञ्जलीढ्रिकुडवैः क्षाराच्च शुण्ठ्या युतां शोफार्शःक्षयकुष्ठपीनसकृमिश्वासास्रे-

१ (क० ङ० छ०) णन्य। २ (च०) व्योषात्। ३ (ङ० च०) युक्त्या। ४ (च०) युतः। ५ (च०) श्वासान्त।

गुल्मान्तकृत् ॥ १ ॥ इति चित्रकहरीतक्यवलेहः । बोपदेवशतात् । द्राक्षां हरीतकीं मुस्तां कर्कटाख्यां दुरालभाम् । सर्पिर्मधुभ्यां विलिहञ्श्वासान्हन्ति सुदारुणान् ॥ १ ॥ भलिह्यान्मधुसर्पिभ्यां भार्गीमधुकसंयुताम् । पथ्यां तिक्ताकणाव्योषयुक्तां वा श्वासनाशिनीम् ॥ २ ॥ गुडदाडिममृद्वीकापिप्पलीविश्वभेषजैः । मातुलुङ्गरसं क्षौद्रं लीढं श्वासनिबर्हणम् ॥ ३ ॥ इति द्राक्षाहरीतक्याद्यवलेहो वृन्दात् ॥

॥ अथ रसाः ॥

रसं गन्धं विषं चैव टङ्कणं च मनःशिला । एतानि टङ्कमात्राणि मरिचं चाष्टटङ्कम् ॥ १ ॥ एकैकं मरिचं दत्वा खल्वे सूक्ष्मं विमर्दयेत् । त्रिकटुं टङ्कमात्रं च दत्वा पश्चाद्विचूर्णयेत् ॥ २ ॥ सर्वमेकत्र संयोज्य काचकूप्यां विनिक्षिपेत् । कासे श्वासे च मन्दाग्नौ वातश्लेष्मामयेषु च ॥ ३ ॥ गुञ्जामात्रं प्रदातव्यं पर्णखण्डेन धीमता । सन्निपाते च मूर्च्छायामपस्मारे तथा पुनः ॥ ४ ॥ अतिमोहत्वमापन्ने नस्यं दत्वा विचक्षणः । रसः श्वासकुठारोऽयं सर्वश्वासविकारहा ॥ ५ ॥ इति श्वासकुठारः ॥

॥ अथ पथ्यापथ्यम् ॥

विरेचनस्वेदनधूमपानप्रच्छर्दनानि स्वपनं दिवा च । पुरातनाः षष्टिकरक्तशालिकुलत्थगोधूमयवाः प्रशस्ताः ॥ १ ॥ शशाहिभुक्तित्तिरलावदक्षशुकादयो धन्वमृगा द्विजाश्च । पुरातनं सर्पिरजाप्रभूतं पयो घृतं चापि सुरा मधूनि ॥ २ ॥ पटोलवार्ताकरसोनबिम्बीजम्बीरतण्डुलियवास्तुकं च । द्राक्षा त्रुटिः पौष्करमुष्णवारि निदिग्धिका श्वासिनि पथ्यवर्गः ॥ ३ ॥ रक्तस्रावः पूर्ववातान्नपानं मेषीसर्पिर्दुग्धमम्भोऽपि दुष्टम् । मत्स्याः कन्दाः सर्षपाश्चान्नपानं रूक्षं शीतं गुर्वपि श्वासिवर्ज्यम् ॥ ४ ॥ इति पथ्यापथ्यम् । इति श्वासरोगचिकित्सा ॥

॥ अथ स्वरभेदनिदानं व्याख्यास्यामः ॥

॥ अथ स्वरभेदाः ॥

अत्युच्चभाषणविषाध्ययनाभिघातसन्दूषणैः प्रकुपिताः पवनादयश्च । स्रोतस्सु ते स्वरवहेषु गताः प्रदुष्टिं हन्युः स्वरं भवति चापि हि षड्विधः सः ॥ १ ॥

॥ अथ वातिकमाह ॥

वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्वदति गर्दभवत्स्वरं च ॥ १ ॥

॥ अथ पैत्तिकमाह ॥

पित्तेन पीतनयनाननमूत्रवर्चा ब्रूयाद्गलेन स विदाहसमन्वितेन ॥ १ ॥

---

१ (च०) प्रतिघाम् ।

॥ अथ कफजमाह ॥

ब्रूयात् कफेन सततं कफरुद्धकण्ठः स्वल्पं शनैर्वदति चापि दिवा विशेषात्॥ १ ॥

॥ अथ संनिपातजमाह ॥

सर्वात्मके भवति सर्वविकारलिङ्गं तं चाप्यसाध्यमृषयः स्वरभेदमाहुः ॥ १ ॥

॥ अथ क्षयजमाह ॥

धूम्येत वाक् क्षयकृते क्षयमाप्नुयाच्च वाक्येषु चापि हतवाक् परिवर्जनीयः ॥१॥

॥ अथ मेदोजमाह ॥

अन्तर्गतस्वरमलक्षपदं चिरेण मेदोऽन्वयाद्वदति दिग्धगलस्तृषालुः ॥ १ ॥

॥ अथासाध्यमाह ॥

क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः । मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति ॥ १ ॥ इति स्वरभेदनिदानम् ।

॥ अथ तच्चिकित्सा ॥

वातस्वरभेदः । स्वरोपघातेऽनिलजे भुक्तोपरि घृतं पिबेत् । मरीचचूर्णसहितं मरुत्स्वरहतिप्रणुत् ॥ १ ॥ कासमर्दरसं दत्वा भार्गीकल्कं शनैः शनैः । सिद्धं सर्पिर्हितं पीतं स्वरभेदं मरुद्भवम् ॥ २ ॥ इति कासमर्दघृतम् । आद्ये कोष्णजलं पेयं जग्ध्वा घृतगुडौदनम् । पीतं घृतं हन्त्यनिलं सिद्धं मार्कवजे रसे ॥ १ ॥

॥ अथ पित्तस्वरभेदः ॥

पैत्तिके तु विरेकः स्यात्पयश्च मधुरैः शृतम् । लिह्यान्मधुरवस्तूनां चूर्णं मधुसमन्वितम् ॥ १ ॥ अश्नीयाच्च ससर्पिष्कं यष्टीमधुकपायकम् । शर्करामधुमिश्राणि शृतानि मधुरैः सह ॥ २ ॥ पिबेत्पयांसि यस्योच्चैर्वदतोऽपि हतः स्वरः । शतावरीचूर्णयोगं बलाचूर्णमथापि वा ॥ लाजाशतावरीचूर्णं लिह्यान्मधुसमायुतम् ॥ ३ ॥

॥ अथ शुण्ठीघृतम् ॥

शुण्ठीत्वचो दुग्धवतां द्रुमाणां सम्पिष्य दुग्धे विपचेत्तु तेन। कल्केन यष्टीमधुकस्य सर्पिः सशर्करं पित्तरुजामयघ्नम् ॥ १ ॥ इति पित्तस्वरभेदः ॥

॥ अथ कफस्वरभेदः ॥

पिप्पली पिप्पलीमूलं मरीचं विश्वभेषजम् । पिबेन्मूत्रेण मतिमान्कफजे स्वरसंक्षये ॥ १ ॥ इति पिप्पल्यादिचूर्णम् ।

---

१ (च०) सम्पत् ।

॥ अथ सन्निपातस्वरभेदः ॥

अजमोदा निशा धात्री क्षारं वह्निं विचूर्णयेत्। मधुसर्पिर्युतं लीढ्वा त्रिदोषस्वरभङ्गनुत् ॥ १ ॥ फलत्रिकत्र्यूपणयावशूकचूर्णानि हन्युः स्वरभङ्गमाशु। किं वा कुलत्थं वदनान्तरस्थं स्वरामयं हन्त्यथ पौष्करं वा ॥२॥ अथ क्षयभेदःस्वरभङ्गौ। क्षयजे स्वरभेदे तु तत्रोक्तविधिमाचरेत्। कटुतिक्तकषायाद्यैर्मेदःस्वरहार्ति जयेत् ॥ १ ॥ अथ सामान्यविधिः। चव्याम्लवेतसकटुत्रयतिन्तिडीकतालीसजीरकतुगादहनैः समांशैः। चूर्णं गुडप्रमृदितं त्रिसुगन्धयुक्तं वैस्वर्यपीनसकफारुचिषु प्रशस्तम् ॥ १ ॥ इति चव्यादिचूर्णं योगशतात् ॥

॥ अथ व्याघ्रीघृतम् ॥

व्याघ्रीस्वरसविपक्वं रास्नावाट्यालगोक्षुरव्योषैः। सर्पिः स्वरोपघातं हन्यात् कासं च पञ्चविधम् ॥१॥ इति चिकित्सासारात्। बदरीपत्रकल्कं वा घृतभृष्टंससैन्धवम्। स्वरोपघाते कासे च लेहमेनं प्रयोजयेत् ॥ १ ॥ इति कदम्बात्। विहितघुसृणचूर्णान्यारनालेन सार्धं कलितरुफलकृष्णासैन्धवानि प्रलिह्यात्। अभिलषति विजेतुं यः स्वरस्य प्रणाशं स हि पिबतु सदुग्धं चामलक्याः फलं वा ॥ १ ॥ इति सारसङ्ग्रहात्। वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम्। कफे सक्षारकटुकं क्षौद्रं केवलमिष्यते ॥ १ ॥ गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः। तेन निष्क्रमते श्लेष्मा स्वरश्चाशु प्रसीदति ॥ २ ॥ तैलाक्तं स्वरभेदे वा खादिरं धारयेन्मुखे। पथ्यापिप्पलियुक्तं वा संयुक्तं नागरेण वा ॥ ३ ॥ इति वृन्दात् ॥

॥ अथ रसाः ॥

रसभस्मार्कलोहस्य भावितस्य त्रिसप्तधा। क्षुद्राफलरसैर्मुद्गतुल्या कार्या वटी शुभा ॥ १ ॥ मुखस्था हरते सर्वं स्वरभङ्गमसंशयम्। गोरक्षनाथैर्गदिता स्वरामयिकृपालुभिः ॥ २ ॥ इति गोरक्षवटी ॥

॥ अथ पथ्यम् ॥

द्राक्षा पथ्या मातुलुङ्गं लशुनं लवणार्द्रकम्। ताम्बूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनाम् ॥ १ ॥ इति स्वरभेदचिकित्सा ॥

॥ अथातोऽरोचकनिदानं व्याख्यास्यामः ॥

पृथग्दोषैः समस्तैर्वा तथाप्यागन्तवो हि ये। भवन्त्यरोचकाः पञ्च तेषां लक्षणमुच्यते ॥ १ ॥

---

१ (च०) मसृण। २ (ङ० च० छ०) श्वासः।

॥ अथ वातिकमाह ॥

वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः । अरोचकाः स्युः परिहृष्टदन्तकषायवक्त्रश्च मतोऽनिलेन ॥ १ ॥

॥ अथ पित्तजमाह ॥

कट्वम्लमुष्णं विरसं च पूति पित्तेन विद्याल्लवणं च वक्त्रम् ॥ १ ॥

॥ अथ कफजमाह ॥

माधुर्यपैच्छिल्यगुरुत्वशैत्यस्निग्धत्वदौर्गन्ध्ययुतं कफेन ॥ १ ॥

॥ अथ शोकजन्यमाह ॥

अरोचके शोकभयातिलोभक्रोधाद्यहृद्याशुचिगन्धजे स्यात् ॥ १ ॥

॥ अथ त्रिदोषजमाह ॥

स्वाभाविकं चास्यमथारुचिश्च त्रिदोषजेऽनेकरसं भवेत्तु ॥ १ ॥

॥ अथ विकृतिमाह ॥

हृच्छूलपीडनयुतं पवनेन पित्तात्तृड्दाहशोषबहुलं सकफप्रसेकम् । श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्याद्वैगुण्यमोहजडताभिरथापरं च ॥ १ ॥ प्रतिक्षिप्तमुखे चान्नं जन्तुर्नास्वादते मुहुः । अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु ॥ २ ॥ चिंतयित्वा तु मनसा दृष्ट्वा श्रुत्वा तु भोजनम् । द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ ३ ॥ इत्यरोचकनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

बस्तिः समीरणे पित्ते विरेको वमनं कफे । सर्वजे सर्वकामार्थं हर्षणं स्यादरोचके ॥ १ ॥ अरुचौ कवलग्राहो धूमः मुखस्य धावनः । मनोज्ञमन्नपानं वा हर्षणाश्वासनानि च ॥ २ ॥ सात्म्यान्स्वदेशरचितान्विविधांश्च भक्ष्यान्पानानि मूलफलखाण्डवरागलेहान् । सेवेद्रसांश्च विविधान्विविधैः प्रयोगैर्भुञ्जीत चापि लघुरूक्षमनःसुखानि ॥ ३ ॥

॥ अथ मुखधावनम् ॥

अजाजी मरिचं कुष्ठं बिडं सौवर्चलं तथा । मधुकं शर्करा तैलं वातिके मुखधावनम् ॥ करञ्जदन्तकाष्ठं च विधेयमरुचौ सदा ॥ १ ॥ त्रिरूषणानि त्रिफलारजनीद्वयं च चूर्णीकृतानि यवशूकविमिश्रितानि । क्षौद्रान्वितानि वितरेन्मुखधावनार्थमन्यानि तिक्तकटुकानि च भेषजानि ॥ २ ॥

---

१ (च०) विषद्रसम्यक—२ (च०) चोषबहुलम् । ३ (च०) मुखमुधावनः ।

॥ अथ गण्डूषः ॥

किञ्चिल्लवणसंयुक्तमारनालं विपाचयेत् । तेन गण्डूषमात्रेण आस्यवैरस्यशान्तये ॥ १ ॥

॥ अथ पानककवलग्रहौ ॥

अम्लिकामुद्गतोयं च त्वगेलामरिचान्वितम् । अभक्तच्छन्दरोगेषु शस्तं कवलधारणे ॥ १ ॥ इत्यम्लिकापानकम् । भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् । लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥ १ ॥ निम्बूरसभवं पानमत्यम्लं वातनाशनम् । वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥ २ ॥ इति निम्बूपानकम् । कुष्ठसौवर्चलाजाजीशर्करामरिचं विडम् । धान्यैलापत्रकोशीरपिप्पलीचन्दनोत्पलम् ॥ १ ॥ लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजम् । आर्द्रदाडिमनिर्यासश्चाजाजीशर्करायुतः ॥ २ ॥ सतैलमाक्षिकाश्चैते चत्वारः कवलग्रहाः । चतुरोऽरोचकान्हन्युर्वाताद्येकजसर्वजान् ॥ ३ ॥ इति कुष्ठाद्याश्चत्वारः कवलग्रहाः । विडङ्गचूर्णं कर्षैकं क्षौद्रं कर्षचतुर्मितम् । असाध्यमपि संहन्यादरुचिं वक्त्रधारणात् ॥ १ ॥

॥ अथ गुटिका ॥

कारव्यजाजीमरिचं द्राक्षा वृक्षाम्लदाडिमम् । सौवर्चलं गुडः क्षौद्रमेषां कार्या वटी शुभा ॥ बदरास्थिमिता सास्ये धार्यारोचकनाशिनी ॥ १ ॥ इति कारव्यादिगुटिका । सिताव्योषकपित्थानां चूर्णं क्षौद्रकृतां वटीम् । सर्वारोचकशान्त्यर्थं धारयेद्वदनाम्बुजे ॥ १ ॥

॥ अथ चूर्णानि ॥

यवानीतित्तिडीकं च नागरं चाम्लवेतसम् । दाडिमं बदरं साम्लं कार्षिकाण्युपकल्पयेत् ॥ १ ॥ धान्यसौवर्चलाजाजीवराङ्गं चार्धकार्षिकम् । पिप्पलीनां शतं चैकं द्वे शते मरिचस्य च ॥ २ ॥ शर्करायाश्च चत्वारि पलान्येकत्र चूर्णयेत् । यवानीखाण्डवाख्यं तु चूर्णमेतदरोचकम् ॥ ३ ॥ हन्त्येव प्रातरेतत्तु स्थापितं च मुखे मुहुः । जिह्वाविशोधनं हृद्यं दीपनं भक्तरोचकम् ॥ ४ ॥ हृत्पीडापार्श्वशूलघ्नं विबन्धानाहनाशनम् । कासश्वासहरं ग्राहि ग्रहण्यर्शोविकारनुत् ॥ ५ ॥ इति यवानीखाण्डवचूर्णम् ॥

॥ अथ खाण्डवचूर्णम् ॥

तुल्यं तालीसचव्योषणलवणगजद्विप्कणाग्रन्थ्यजाजीवृक्षाम्लाम्रित्वचं त्रिर्घनबदरधनैलाजमोदाम्लविश्वम् । सार्धश्वेताङ्घ्रिसारोऽतिसृतिकृमिवमौ खाण्डवोऽरुच्यजीर्णे गुल्माध्मात्पानलास्योद्रवणगदमरुद्धृद्गदश्वासकासे ॥१॥ इति खाण्डवचूर्णम् बोपदेवशतात् ॥

---

१ (क० ख०) मूलघ्नम् ।

॥ अथामलक्यादिचूर्णम् ॥

आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा। चूर्णितोऽयं गणो ज्ञेयः सर्वज्वरविनाशनः। भेदी रुचिकरः श्लेष्मजेता दीपनपाचनः ॥ १ ॥ इति शार्ङ्गधरात् ॥

॥ अथ कर्पूराद्यं चूर्णम् ॥

कर्पूरचोचकक्कोलजातीफलदलाः समाः। लवङ्गनागमरिचकृष्णाशुण्ठीविवर्धिताः ॥ १ ॥ चूर्णं सितासमं ग्राह्यं रोचनं क्षयकासजित्। वैस्वर्यश्वासगुल्मार्शश्छर्दिकण्ठामयापहम् ॥ प्रयुक्तं चान्नपानेषु भिषजा रोगिणां हितम् ॥२॥ इति शार्ङ्गधरात्॥

॥ अथ तालीसाद्यं चूर्णम् ॥

तालीसं मरिचं शुण्ठी पिप्पली वंशलोचना। एकद्वित्रिचतुष्पञ्चकर्षैर्भागान्प्रकल्पयेत् ॥ १ ॥ एलात्वचोस्तु कर्षार्धे प्रत्येकं भागमावहेत्। द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः ॥ २ ॥ तालीसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतम्। कासश्वासज्वरहरं छर्द्यतीसारनाशनम् ॥ ३ ॥ शोषाध्मानहरं प्लीहग्रहणीपाण्डुरोगजित्। पक्त्वा वा शर्कराचूर्णं क्षिपेत्सा गुटिका तथा ॥ ४ ॥ इति शार्ङ्गधरात् ॥

॥ अथावलेहः ॥

शार्ङ्गधरात्। आर्द्रकमातुलुङ्गावलेहः। आर्द्रकस्वरसं प्रस्थं तदर्धांशं गुडं क्षिपेत्। कुडवं बीजपूराम्लं गालयित्वा विचक्षणः ॥१॥ सर्वं मन्दाग्निना पक्त्वा तत्रेमानि विनिक्षिपेत्। त्रिजातकं त्रिकटुकं त्रिफलायाःसमेव च ॥ २ ॥ चित्रकं ग्रन्थिकं धान्यं जीरकद्वयमेव च। कर्षांशं श्लक्ष्णचूर्णं तु मेलयित्वा तु भक्षयेत् ॥ ३ ॥ अरोचकक्षयहरमग्निदीप्तिकरं परम्। कामलापाण्डुशोफघ्नं श्वासकासहरं परम् ॥ आध्मानोदरगुल्मानि प्लीहशूले च नाशयेत् ॥ ४ ॥

॥ अथ खण्डार्द्रकयोगः ॥

योगसारात्। आर्द्रकस्य सितायाश्च द्विगुणाष्टपलानि च। निष्कद्वादशकं तीक्ष्णमष्टनिष्का च मागधी ॥१॥ अष्टनिष्कं च तन्मूलं पञ्चनिष्कं च नागरम्। जातीफलैलादहनं वंशायाः पञ्चनिष्ककाः ॥२॥ सर्वाण्येतानि शुष्काणि चूर्णं कृत्वा पृथक्पृथक्। आर्द्रकं खण्डशः कृत्वा गोघृतेऽष्टपले पचेत् ॥ ३ ॥ शर्करापूर्वचूर्णं च चार्द्रकं सह मेलयेत्। मण्डलं सेवयेन्नित्यं महापित्तविनाशनम् ॥ ४ ॥ आम्लपित्तं निहन्त्याशु सर्वपित्तविकारजित्। सर्वारुचिं वातरोगं मन्दाग्निं च नियच्छति ॥ ५ ॥ इति खण्डार्द्रकयोगः ॥

॥ अथार्द्रकयोगः ॥

मदनपालात् ॥ धौतं खण्डितमार्द्रकं च सलिलैः क्षिप्तं सुतप्ते घृते सिन्धूत्थं मरिचं सुजीरयुगुलं चूर्णीकृतं प्रक्षिपेत्। चूर्णं भृष्टयवोद्भवं च वितुषं हिङ्ग्वाज्यधूमे दहेदित्थं दोषविहीनमार्द्रकवरं सुस्वादु सञ्जायते ॥ १ ॥

॥ अथ मातुलुङ्गादियोगः ॥

मातुलुङ्गफलकेसरोद्धृतः सिन्धुजन्ममरिचान्वितो मुखे। हन्ति वातकफरोगमास्यगं शोषमास्यजडतामरोचकम् ॥ १ ॥

॥ अथ मातुलुङ्गकेसरगुणाः ॥

केसरं मातुलुङ्गस्य सैन्धवं मधुनापि वा। आस्यवैरस्यशमनं भक्षयेत्कर्षसम्मितम् ॥ १ ॥ शमयति केसरमरुचिं सलवणघृतमाशु मातुलुङ्गस्य। दाडिमचर्वणमथवा चरको रुचिकारि सूचयामास ॥ २ ॥ इति चिकित्सासारात् ॥

॥ अथ शर्करादियोगः ॥

शर्करा दाडिमं चाथ द्राक्षा खर्जूरमेव च ॥ १ ॥ अथार्द्रकदाडिमयोगद्वयम् । जिह्वाकण्ठविशोधनं तदनु च स्याच्छृङ्गवेरान्वितं सिन्धूत्थं हितमत्र चाथ मधुना शस्तो रसो दाडिमः। अग्न्युद्बोधकराण्यजीर्णशमनान्याहुस्तथा भेषजान्यत्रारोचकरुद्द्रयोगमसकृत्तेत्तत्प्रदेयानि च ॥ १ ॥ इति लघुयोगतः ॥

॥ अथ सारसङ्ग्रहाज्जीरकाद्यं घृतम् ॥

पिष्टाजाजीं सधान्याकं घृतप्रस्थं विपाचयेत्। कफपित्तारुचिहरं मन्दानलवमीं जयेत् ॥ १ ॥ इति जीरकाद्यं घृतम् ॥

॥ अथ रसाः ॥

॥ अथ सूतादिगुटिका ॥

सूतगन्धाभ्रमगधाम्लिकामरिचसैन्धवैः। गुटिकारोचकहरी जिह्वावदनशुद्धिकृत् ॥ १ ॥ योगतरङ्गिण्याः ॥ गर्दानिग्रहाल्लघुचुक्रसन्धानम्। गुडक्षौद्रारनालानि समस्तानि यथोत्तरम्। शंसन्ति द्विगुणान्भागान्सम्यक् चुक्रस्य सिद्धये ॥१॥ यन्मस्त्वादि शुचौ भाण्डे सक्षौद्रगुडकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥ २ ॥

॥ अथ पथ्यापथ्यम् ॥

गोधूममुद्गारुणशालिषष्टिका मांसं वराहाजशशैणसम्भवम्। वेगोझपाण्डं मधुरालिकं लिशः प्रोष्ठी खलेशः कवरी च रोहितः ॥ १ ॥ कर्कारुवेत्राग्रनवीनमूलकं वार्ताकसौभाञ्जनमोचदाडिमम्। भव्यं पटोलं रुचकं पयो घृतं बालानि तालानि रसोनसूरणम् ॥ २ ॥ द्राक्षारसालं नलदाम्बु काञ्जिकं कोलं रसालां दधि तक्रमार्द्रकम्। स्वाद्वम्लतिक्तानि च देहमार्जनं वर्गोऽयमुक्तोऽरुचिरोगिणां हितः ॥३॥ तृष्णोद्गारक्षुधानेत्रवारिवेगविधारणम्। अहृद्यान्नमसृङ्मोक्षं क्रोधं लोभं भयं शुचम् ॥ दुर्ग-

---

१ (च०) प्रयोगसमये तानि। २ (च०) मूलानि।

न्धानुपसेवां च न कुर्यादरुचौ नरः ॥ ४ ॥ इति पथ्यापथ्यम् । इत्यरोचकचिकित्सा ॥

॥ अथातश्छर्दिनिदानं व्याख्यास्यामः ॥

दुष्टैर्दोषैः पृथक् सर्वैर्बीभत्सालोकनादिभिः । छर्दयः पञ्च विज्ञेयास्तासां लक्षणमुच्यते ॥ १ ॥

॥ तासां सम्प्राप्तिमाह ॥

अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि । अकाले चातिमात्रैश्च तथा सात्म्यैश्च भोजनैः ॥ १ ॥ श्रमाद्भयात्तथोद्वेगादजीर्णात्क्रिमिदोषतः । नार्याश्चापन्नसत्त्वायास्तथातिद्रुतमश्नतः ॥ २ ॥ बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् । छादयत्याननं वेगैरर्दयन्त्यङ्गभञ्जनैः ॥ निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावति ॥ ३ ॥

॥ अथ तस्याः पूर्वरूपमाह ॥

हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः । द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् ॥ १ ॥

॥ अथ वातजामाह ॥

हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्तिकासस्वरभेदतोदैः । उद्गारशब्दं प्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायम् ॥१॥ कृच्छ्रेण चाल्पं महता च वेगेनार्तोऽनिलाच्छर्दयतीह दुःखम् ॥ २ ॥

॥ अथ पित्तजामाह ॥

मूर्च्छापिपासामुखशोषमूर्धताल्वक्षिसन्तापतमोभ्रमार्तः । पीतं भृशोष्णं हरितं च तिक्तं धूम्रं च पित्तेन वमेत्सदाहम् ॥ १ ॥

॥ अथ कफजामाह ॥

तन्द्रास्यमाधुर्यकफप्रसेकसन्तोषनिद्रारुचिगौरवार्तः । स्निग्धं घनं स्वादु कफाद्विशुद्धं सरोमहर्षोऽल्परुजं वमेत्तु ॥ १ ॥

॥ अथ त्रिदोषजामाह ॥

शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबलप्रसक्तम् । छर्दिस्त्रिदोषाल्लवणाम्लनीलसान्द्रोष्णरक्तं वमतां नृणां स्यात् ॥ १ ॥ असाध्यामाह । विट्स्वेदमूत्राम्बुवहानि वायुः स्रोतांसि संरुध्य यदोर्ध्वमेति । उत्पन्नदोषस्य समाचितं तं दोषं समु-

---

* उत्क्लिश्यान्नं न निर्गच्छेत्प्रसेकष्ठीवनैस्ततः । हृदयं पीड्यते चास्य तमुत्क्लेशं विनिर्दिशेत् ॥ १ ॥

१ (च०) लवणास्यता । २ (च०) उरस्तन ।

मूय नरस्य कोष्ठात् ॥ १ ॥ विण्मूत्रयोस्तत्समगन्धवर्णं वृट्श्वासकासार्तियुतं प्रसक्तम् । प्रच्छर्दयेदुष्टमिहातिवेगात्तयार्दितश्चाशु विनाशमेति ॥ २ ॥

॥ अथागन्तुजामाह ॥

बीभत्सजा दौर्हृदजामजा वा ह्यसात्म्यजा वा कृमिजा च या स्यात् । सा पञ्चमी तां च विभावयेच्च दोषान्वयेनैव यथोक्तमादौ ॥ १ ॥

॥ अथ कृमिजाया विशेषलक्षणमाह ॥

शूलहृल्लासबहुला कृमिजा च विशेषतः । कृमिहृद्रोगतुल्येन लक्षणेन च लक्षिता ॥ १ ॥

॥ अथ साध्यामसाध्यां चाह ॥

क्षीणस्य या छर्दिरतिप्रसक्ता सोपद्रवा शोणितपूययुक्ता । सचन्द्रकां तां प्रवदेदसाध्यां साध्यां चिकित्सेन्निरुपद्रवां च ॥ १ ॥

॥ अथ तस्या उपद्रवानाह ॥

कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेव च । हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥ १ ॥ इति छर्दिनिदानम् ॥

॥ अथ छर्दिचिकित्सां व्याख्यास्यामः ॥

आमाशयोत्क्लेशभवा हि सर्वाः स्युश्छर्दयो लङ्घनमेव तस्मात् । प्राक्कारयेन्मारुतजां विना तु संशोधनं वा कफपित्तहारि ॥ १ ॥

॥ अथ वातच्छर्दिः ॥

॥ योगतरङ्गिण्याः ॥

॥ अथ धान्यकादियोगः ॥

धान्याकविश्वदशमूलकषायसिद्धान्यूषान् रसान्पवनवम्यरुचिप्रशान्त्यै । पीत्वा सुखानि लभते मधुमिश्रितं वा शङ्खाह्वयास्वरसमूषणचूर्णयुक्तम् ॥ १ ॥

॥ अथ लवणादियोगः ॥

लवणत्रयसंयुक्तं संयुक्तं लवणेन वा । हन्यात्क्षीरोदकं पीतं छर्दिं पवनसम्भवाम् ॥ १ ॥

॥ अथ सैन्धवादियोगः ॥

ससैन्धवं पिबेत्सर्पिर्वातच्छर्दिनिवारणम् ॥

॥ अथ पित्तच्छर्दिः । चन्दनपानकम् ॥

चन्दनेनाक्षमात्रेण संयोज्यामलकीरसम् । पिबेन्माक्षिकसंयुक्तं पित्तच्छर्दिनिवृत्तये ॥ १ ॥

---

१ (च०) समुकूय । २ (च०) दोषोच्छ्रयेणैव ।

॥ अथ लाजादियूषः ॥

लाजामसूरयवमुद्गकृता यवागूश्छर्द्यां हिता मधुयुता बहुपित्तजायाम् । यूषः सुगन्धिमधुतिक्तरसप्रयुक्तो मृद्भृष्टलोष्टभवमम्बु हितं तृषायाम् ॥१॥ इति सारसङ्ग्रहात् ॥

॥ अथ चन्दनावलेहः ॥

चन्दनं च मृणालं च वालकं नागरं वृषम् । सतण्डुलोदकक्षौद्रः पीतः कल्को वमीर्जयेत् ॥ १ ॥ इति शार्ङ्गधरात् ॥

॥ अथोदीच्यादिः ॥

सोदीच्यं गैरिकं देयं सेव्यं वा तण्डुलाम्बुना । धात्रीरसेन वा पीता सिता लाजाश्च हन्ति ताम् ॥ १ ॥ इति चिकित्सासारात् ॥

॥ अथ मुद्गकषायः ॥

कषायो भृष्टमुद्गानां सलाजमधुशर्करः । छर्द्यतीसारदाहघ्नो ज्वरघ्नः सम्प्रकाशितः ॥ १ ॥

॥ अथ योगतरङ्गिण्यां पर्पटक्वाथः ॥

क्वाथः पर्पटजः पीतः सक्षौद्रः शिशिरीकृतः । पित्तच्छर्दिं शिरस्तापं चक्षुर्दाहं व्यपोहति ॥ १ ॥

॥ अथ मक्षिकाविडवलेहः ॥

सिताचन्दनमध्वाढ्यं विलिहेन्मक्षिकाशकृत् । सोपद्रवा पित्तभवा छर्दिरेतेन शाम्यति ॥ १ ॥

॥ अथ लाजसक्तववलेहिका ॥

सर्पिःक्षौद्रसितोपेता ल्लाजसक्तू ल्लिहेत्ततः । पित्तच्छर्दिरनेनाशु प्रशाम्यति सुदुस्तरा ॥ १ ॥

॥ अथ गुडूच्यादिक्वाथः ॥

गुडूचीत्रिफलारिष्टपटोलैः क्वथितं जलम् । क्षौद्रयुक्तं निहन्त्याशु च्छर्दिं पित्तसमुद्भवाम् ॥ १ ॥ इति योगसारात् ॥

॥ अथ कफच्छर्दिः ॥

छर्द्यां कफोद्भवायां तु वमनं कारयेद्भिषक् । तोयैः सर्षपसिन्धूत्थराठनिम्बकणायुतैः ॥ १ ॥ शस्यन्ते शालिगोधूमयवमुद्गमकुष्ठकाः । षष्टिकास्तत्र यूषाश्च पटोल्याद्याश्च भोजने ॥ २ ॥

॥ अथ विडङ्गादिचूर्णम् ॥

विडङ्गत्रिफलाव्योषचूर्णं मधुयुतं लिहेत् । शाम्यत्यनेन कफजा छर्दिः सोपद्रवा नृणाम् ॥ १ ॥ इति योगतरङ्गिण्याः ॥

॥ अथ रक्तशाल्यादियोगः ॥

अथ रक्तशालिभक्तं गोदधिशर्करादिमिश्रं च । कुर्याद्भोजनमेतत्कफच्छर्दिच्छिर्दं जन्तोः ॥ १ ॥ इति चिकित्सासारात् ॥

॥ अथ जाम्बवादियोगः ॥

॥ योगसागरात् ॥

सजाम्बवं बादरचूर्णमम्लं मुस्तायुतं कर्कटकः सशृङ्गी । दुरालभा वा मधुना च युक्ता लिह्यात्कफच्छर्दिविनिग्रहार्थम् ॥ १ ॥

॥ अथ त्रिदोषच्छर्दिः ॥

॥ अथ धात्रीफलादिपानकम् ॥

पिष्ट्वा धात्रीफलं द्राक्षां शर्करां च पलोन्मिताम् । दत्वा मधुपलं चैव कुडवं सलिलस्य च ॥ वाससा गालितं पीतं हन्ति च्छर्दिं त्रिदोषजाम् ॥१॥ अथ मसूरसक्तुः । मसूरसक्तवः क्षौद्रमर्दिता दाडिमाम्भसा । पीता निवारयन्त्याशु च्छर्दिं दोषत्रयोद्भवाम् ॥ १ ॥

॥ अथैलादिचूर्णम् ॥

एलालवङ्गगजकेशरकोलमज्जालाजप्रियङ्गुघनचन्दनपिप्पलीनाम् । चूर्णं सितामधुयुतं मनुजो विलिह्य च्छर्दिं निहन्ति कफमारुतपित्तजाताम् ॥१॥ योगरत्नावलितः ॥

॥ अथ शार्ङ्गधराद्बिल्वादिः ॥

बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः । जयेत्त्रिदोषजां छर्दिं पर्पटः पित्तजां तथा ॥ १ ॥

॥ अथ सामान्यच्छर्दिः ॥

कोलामलकमज्जानौ मक्षिकाविट् सिता मधु । सकृष्णा तण्डुलो लेहश्छर्दिमाशु व्यपोहति ॥ १ ॥ इति कोलाद्यवलेहः ॥

॥ अथ मनःशिलादियोगः ॥

योगशतात् । मनःशिलामागधिकोषणानां चूर्णं कपित्थाम्लरसेन युक्तम् । लाजैः समांशैर्मधुनावलीढं छर्दिं प्रसक्तामसकृन्निहन्ति ॥ १ ॥

॥ अथ योगसारादश्वत्थवल्कलादिः ॥

अश्वत्थवल्कलं शुष्कं दग्धं निर्वापितं जले । तज्जलं पानमात्रेण च्छर्दिं जयति दुर्जयाम् ॥ १ ॥ योगतरङ्गिण्याः ॥

॥अथ लाजादियोगत्रयम् ॥

लाजाकपित्थमधुमागधिकोषणानां क्षौद्राभयात्रिकटुधान्यकजीरकाणाम् । पथ्यामृतामरिचमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यरुचिप्रशान्त्यै ॥ १ ॥ अथ योगतरङ्गिण्या आम्रास्थिक्वाथः । आम्रास्थिबिल्वनिर्यूहः पीतः समधुशर्करः । निहन्ति च्छर्द्यतीसारं वैश्वानर इवाहुतिम् ॥ १ ॥

॥ अथ योग० जम्बूपल्लवादिः ॥

जम्ब्वाम्रपल्लवशृतं क्षौद्रं दत्वा सुशीतलं तोयम् । लाजैरवचूर्ण्य पिबेच्छर्द्यतिसारे परं सिद्धम् ॥ १ ॥

॥ अथ योगतः पद्मकाद्यं घृतम् ॥

पद्मकामृतनिम्बानां धान्यचन्दनयोः पचेत् । कल्के काथे च हविषः प्रस्थं छर्दिनिवारणम् ॥ १ ॥

॥ अथ मयूरपक्षभस्मावलेहः ॥

योगतरङ्गिण्याः । मयूरपक्षं निर्दह्य तद्भस्म मधुमिश्रितम् । लीढ्वा निवारयत्याशु च्छर्दिं सोपद्रवामपि ॥ १ ॥

॥ अथ सारसंग्रहात् गोण्याद्यम् ॥

पुराणगोणिभस्माम्भो मधुयुक्तं निपीय तु । छर्दिं छिनत्ति मनुजस्तृणानीव हुताशनः ॥ १ ॥ अथ चिकित्सासारात् जातीपत्रादिः । जातीपत्ररसं कृष्णा मरिचं शर्करान्वितम् । एतानि मधुयुक्तानि घ्नन्ति च्छर्दिं चिरोद्भवाम् ॥ १ ॥

॥ अथ कोलमज्जादिः ॥

चिकित्सासारात् । कोलमज्जा कणा बर्हिपक्षभस्म सशर्करम् । मधुना लेहयेच्छर्दिहिक्काकोपस्य शान्तये ॥ १ ॥

॥ अथ शार्ङ्गधराद्वीजपूरादिः ॥

बीजपूराम्रजम्बूनां पल्लवानि जटाः पृथक् । विपचेत्पुटपाकेन क्षौद्रयुक्तश्च तद्रसः ॥ छर्दिं निवारयेद्घोरां सर्वदोषसमुद्भवाम् ॥ १ ॥

॥ अथ चिकित्सासाराज्जम्ब्वाम्रपल्लवादिः ॥

जम्ब्वाम्रपल्लवोशीरवटशृङ्गावरोहजः । क्वाथः क्षौद्रयुतः पीतः शीतो वा विनियच्छति ॥ छर्दिं ज्वरमतीसारं मूर्च्छां तृष्णां च दुर्जयाम् ॥ १ ॥

॥ अथ पटोलाद्यं घृतम् ॥

पटोलशुण्ठ्योः कल्काभ्यां केवलं कुलकेन वा । घृतप्रस्थं विपक्तव्यं कफपित्तवमीहरेत् ॥ १ ॥

॥ अथ हिङ्ग्वादिः ॥

हिङ्गुना सारिवामूलं सर्ववान्तिहरं परम् । रम्भा कन्दरसो वापि मधुना छर्दिनाशकृत् ॥ १ ॥

॥ अथ दध्युत्थरसादिः ॥

दध्युत्थरससंयुक्तं पिप्पलीमाक्षिकान्वितम् । मुहुर्मुहुर्नरो लिह्याच्छर्दिभ्यः प्रतिमुच्यते ॥ १ ॥ इति सुश्रुतात् ॥

॥ अथ करञ्जादिः ॥

कोमलकरञ्जपत्रं सलवणमम्लेन संयुक्तम् । यः खादति दीनवदनश्छर्दिकफौ तस्य कुत्रेह ॥ १ ॥ इति सारसंग्रहात् ।

॥ अथ करञ्जबीजादिः ॥

ईषद्भृष्टं करञ्जस्य बीजं खण्डीकृतं पुनः । मुहुर्मुहुर्नरो भुक्त्वा छर्दिं जयति दुस्तराम् ॥ १ ॥

॥ अथ शङ्खपुष्पीरसादिः ॥

शङ्खपुष्पीरसं टङ्कद्वयं समरिचं मुहुः । स क्षौद्रं मनुजः पीत्वा छर्दिभ्यः किल मुच्यते ॥ १ ॥ इति लघुयोगतः ।

॥ अथ हरीतक्यवलेहः ॥

हरीतकीनां चूर्णं तु लिह्यान्माक्षिकसंयुतम् । अधोभागे कृते दोषे छर्दिस्तेनैव शाम्यति ॥ १ ॥

॥ अथ योगसाराज्जीरकाद्यो धूपः ॥

जीरान्वितं पट्टवस्त्रं वर्तिं कृत्वाथ धूपयेत् । आघ्राणाद्विलयं याति सर्वा छर्दिस्त्रिरोद्भवा ॥ १ ॥ इति सामान्यविधिः ।

॥ अथ बीभत्सादिपञ्चवमिषु ॥

बीभत्सजामबीभत्सैर्हेतुभिः संहरेद्वमिम् । दौर्हृदस्थां वमिं हृद्यैः काङ्क्षितैर्वस्तुभिर्जयेत् ॥ १ ॥ लङ्घनैर्वमनैर्वापि सात्म्यैर्वासात्म्यसम्भवाम् । कृमिहृद्रोगवच्चापि साधयेत्कृमिजां वमिम् ॥ २ ॥ यथादोषं च वितरेच्छस्तं विधिमनन्तरम् । पवनघ्नी चिरोत्थासु प्रयोज्या छर्दिषु क्रिया ॥ ३ ॥

॥ अथ रसाः ॥

॥ अथ पारदादिचूर्णम् ॥

रसरत्नदीपात्। रसबलिघनसारकोलमज्जामरकुसुमाम्बुधरपिप्पलीलाजाः। मलयजमगधात्वगेलपत्रं दलितमिदं परिभाव्य चन्दनाद्भिः॥ मधुमरिचयुतं रजोऽस्य माषं जयति वमिं प्रबलां विलिह्य मर्त्यः॥ १॥

॥ अथ योगरत्नावल्याः ॥

॥ जीरकादिरसः ॥

अजाजिधान्यपथ्याभिः सक्षौद्रैः सकटुत्रिकैः। एतैः सार्धं सूतभस्म सद्यो वान्तिं विनाशयेत्॥ १॥

॥ अथ योगसाराद्वमनामृतयोगः ॥

गन्धकः कमलाक्षश्च यष्टी मधु शिलाजतु। रुद्राक्षष्टङ्कणश्चैव सारङ्गस्य च शृङ्गकम्॥ १॥ चन्दनं च तवक्षीरी गोरोचनमिदं समम्। बिल्वमूलकषायेण मर्दयेद्याममात्रकम्॥ २॥ मात्रां चैव प्रकुर्वीत वल्लस्यैव प्रमाणतः। नानाविधानुपानेन च्छर्दिं हन्ति त्रिदोषजाम्॥ वमनामृतयोगोऽयं कमलाकरभाषितः॥ ३॥

॥ अथ द्वितीयो वान्तिहृद्रसः ॥

अयः शङ्खो बलिसूतः खल्वे तुल्यं विमर्दयेत्। कन्याकनकचाङ्गेरीरसैर्गोलं विधाय च॥ १॥ सप्तमृत्कर्पटैर्लिप्त्वा पुटितो वान्तिहृद्रसः। द्विवल्लः कृमिरोगेऽपि साजमोदः सवेल्लकः॥ २॥ वान्तिहारेण मुनिना प्रोक्तोऽयं मधुना युतः। पिप्पलक्षारपानीयं पाययेद्वान्तिहृद्भिषक्॥ ३॥

॥ अथ छर्द्यन्तकरसः ॥

रसभस्म पलांशं स्यात्तत्पादः स्वर्णभस्म च। ताम्रं भुजङ्गवङ्गे च मौक्तिकं तत्समांशकम्॥ १॥ तेषां सममयश्चूर्णमभ्रकं तत्समं भवेत्। तत्समं गन्धकं दत्वा बीजपूरार्द्रकाम्बुना॥ २॥ सर्वं खल्वे विनिक्षिप्य मर्दयेत्रिदिनावधि। तत्कल्कं भावयेत्सप्त दिनान्यामलकद्रवैः॥ ३॥ पश्चात्तन्मूलमूषायां रुद्ध्वा भाण्डे विनिक्षिपेत्। पांसुभिः परिपूर्याथ क्रमवृद्धेन वह्निना॥ ४॥ पचेद्यामत्रयं चुल्ल्यां स्वाङ्गशीतलमुद्धरेत्। ततः सर्वं समाकृष्य चूर्णयेत्पट्टगालितम्॥ ५॥ अजाजी दीप्यकं व्योषं त्रिफला कृष्णजीरकम्। कृमिशत्रु वरालं च प्रत्येकं निष्कमानकम्॥ ६॥ ततः सर्वं चूर्णयित्वा योजयेत्पूर्वभस्मना। इत्थं पञ्चरसेनेन प्रोक्तश्छर्द्यन्तको रसः॥ ७॥ तत्तद्रोगहरैर्द्रव्यैर्दद्याद्वल्लप्रमाणतः। अम्लपित्तमसृक्पित्तं छर्दिं गुल्ममरोचकम्॥ ८॥

---

१ (च०) द्रव्यैः।

आमवातं च दुःसाध्यं प्रसेकच्छर्दिहृद्रुजम् । सर्वलक्षणसम्पूर्णं विनिहन्ति क्षयामयम् ॥ स्वस्थचित्ते हितकरः सर्वेषाममृतोपमः ॥ ९ ॥ इति रसाः ॥

॥ अथ पथ्यापथ्यम् ॥

कलाययवगोधूममुद्गषष्टिकशालयः । शशतित्तिरलावाद्या मृगजाङ्गलसंज्ञिताः ॥ १ ॥ रागखाण्डववेत्राग्रकोलद्राक्षाफलानि च । वमिरोगेषु पथ्यानि मुनिभिः कथितानि तु ॥ २ ॥ लंवा बिम्बीकोशवत्यौ मधूकं चित्रामेलां सर्षपं देवदालीम् । व्यायामं वा सात्म्यदुष्टान्नपानं छर्द्यां सद्यो वर्जयेदप्रमत्तः ॥ ३ ॥ इति पथ्यापथ्यविधिः ॥ इति छर्दिचिकित्सा ॥

॥ अथ तृष्णानिदानं व्याख्यास्यामः ॥

भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्ध्वं चितं पित्तविवर्धनैश्च । पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासाम् ॥ १ ॥ सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति । पुनः काङ्क्षति तोयं च तं तृष्णार्दितमादिशेत् ॥ २ ॥

॥ अथ कफजानां संप्राप्तिमाह ॥

स्रोतःस्वपां वाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः । तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा च ॥ १ ॥ भुक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशश्च । ताल्वोष्ठकण्ठस्य वितोददाहसन्तापमोहभ्रमविप्रलापाः ॥ पूर्वाणि रूपाणि भवन्ति तासामुत्पत्तिकालेषु विशेषतो हि ॥ २ ॥

॥ अथ वातजां तृष्णामाह ॥

शुष्कास्यता मारुतसम्भवायां तोदस्तथा शङ्खशिरःसु चापि । स्रोतोनिरोधो विरसं च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥ १ ॥

॥ अथ पित्तजामाह ॥

मूर्च्छान्नविद्वेषविलापदाहा रक्तेक्षणत्वं प्रततश्च शोषः । शीताभिनन्दो मुखतिक्तता च पित्तात्मिकायां परिधूपनं च ॥ १ ॥

॥ अथ श्लेष्मजामाह ॥

बाष्पावरोधात्कफसंवृतेऽग्नौ तृष्णा बलासेन भवेन्नरस्य । निद्रा गुरुत्वं मधुरास्यता च तृष्णार्दितः शुष्यति चातिमात्रम् ॥ कण्ठोपलेपो मुखपिच्छिलत्वं शीतज्वरच्छर्दिररोचकाश्च ॥ १ ॥ कफात्मिकायां गुरुगात्रता च शाखासु शोषस्त्वविपाक एव । एतानि रूपाणि भवन्ति तस्यां तयार्दितः काङ्क्षति नातिचाम्भः ॥ २ ॥

॥ अथ क्षतजामाह ॥

क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा भवेत्सा ॥ १ ॥

---

१ (च०) स्वस्थोचितो ।

॥ अथ क्षयजामाह ॥

रसक्षयाद्या क्षयसम्भवा सा तयाभिभूतस्तु निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः ॥ १ ॥

॥ अथामजामाह ॥

रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्येत्। त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री ॥ १ ॥

॥ अथ भुक्तोद्भवामाह ॥

स्निग्धं तथाम्लं लवणं च भुक्तं गुर्वन्नमेवाशु तृषां करोति ॥ १ ॥ दीनस्वरः प्रताम्यन् दीनाननशुष्कहृदयगलतालुः। भवति खलु सोपसर्गा तृष्णा सा शोषणी मता कष्टा ॥ २ ॥

॥ अथोपसर्गानाह ॥

ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानाम्। सर्वास्त्वतिप्रसक्ता रोगकृशानां वमिप्रसक्तानाम् ॥ १ ॥

॥ अथासाध्यामाह ॥

ताल्वोष्ठकण्ठस्य तु तोददाहाः सन्तापमोहभ्रमविप्रलापाः। सर्वाणि रूपाणि भवन्ति तासां मृत्युर्विकाले तु विशेषतो हि ॥ १ ॥ घोरोपद्रवयुक्ता सा तृष्णा मरणाय विज्ञेया ॥ क्षीणं विभिन्नं बधिरं तृषार्तं विवर्जयेन्निर्गतजिह्वमाशु ॥ २ ॥ ज्वरो मोहः क्षयः कासः श्वासो बाधिर्यमेव च। बहिर्निर्गतजिह्वत्वं सप्तैते तृडुपद्रवाः ॥ ३ ॥ सन्ततं यः पिबेत्तोयं न तृप्तिमधिगच्छति। पुनः काङ्क्षति तोयं च तं तृष्णार्दितमादिशेत् ॥ ४ ॥ इति तृष्णानिदानम् ॥

॥ अथ तृष्णाचिकित्सां व्याख्यास्यामः ॥

॥ अथ वाततृष्णा ॥

वातघ्नमन्नपानं मिष्टं शीतं च वाततृष्णायाः। स्याज्जीवनीयसिद्धं क्षीरघृतं वातजे तर्षे ॥ १ ॥ इति वृन्दात् ॥

॥ अथ पित्ततृष्णा ॥

पित्तजायां सितायुक्तः पक्कोदुम्बरजो रसः। प्रपिबेत्ससितं मन्थं पयः कोलजसक्तुभिः ॥ १ ॥

॥ अथ काश्मर्यादि ॥

काश्मर्यशर्करायुक्तं चन्दनोशीरपद्मकम्। द्राक्षामधुकसंयुक्तं पित्ततर्षे जलं पिबेत् ॥ १ ॥ इति चिकित्सासारात् ॥

॥ अथ कफतृष्णा ॥

यथोक्तं कफतृष्णायां छर्द्यां तथैव कार्यं स्यात् । स्तम्भारुच्यविपाकालस्यच्छर्दिषु कफानुगां तृष्णाम् ॥ १ ॥ ज्ञात्वा मधुदधितर्पणलवणेन जलैर्वमनमभीक्ष्णम् । दाडिममम्लफलं वाप्यन्यत्सकषायमवलेह्यम् ॥ २ ॥ पयसाथ वा मदयाद्रजनीमधुशर्करायुक्तम् ॥ ३ ॥ इति वृन्दात् ॥

॥ अथ सामान्यविधिः ॥

तृष्णातिवृद्धावुदरे च पूर्णे सत्त्वच्छर्दयेन्मागधिकोदकेन । विलोमसञ्चाररहितं विधेयं स्याद्दाडिमाम्रातकमातुलिङ्गैः ॥ १ ॥ सुवर्णरौप्यादिभिरग्नितप्तैर्लोष्टैः कृतं वा सिकतोपलैर्वा । जलं सुखोष्णं शमयेच्च तृष्णां सशर्करं क्षौद्रयुतं हिमं वा ॥ २ ॥ कसेरुशृङ्गाटकपद्मबीजविसेक्षुसिद्धं ससितं सवारि । तृष्णां क्षतोत्थामपि पित्तजातां निहन्ति पित्तं शिशिरीकृतं च ॥ ३ ॥ इति सारसङ्ग्रहात् । तुलसीमञ्जरीशुण्ठीकणाद्राक्षालवङ्गकैः । नागवल्लीपर्णवृन्तत्वक्खर्जूरैश्चकार्षिकैः ॥ १ ॥ कर्षार्धलोध्रसंयुक्तैर्विहितोऽयं कषायकः । तृष्णादाहग्लानिहरस्त्रिदोषशमनः परः ॥ २ ॥ मधुयुक्तं जलं शीतं पिबेदाकण्ठमातुरः । पश्चाद्वमेदशेषं तत्तृष्णा तेन प्रशाम्यति॥३॥ इति योगतरङ्गिण्याः । मधुरैः सुजीवनीयैः शीतैश्च सतिक्तकं शृतं क्षीरम् । पानाभ्यञ्जनसेके त्विष्टं मधुशर्करायुक्तम् ॥ १ ॥ तज्जं वा घृतमिष्टं पानाभ्यङ्गेषु नस्यमपि किञ्चित् । जम्ब्वाम्रातकबदर्यम्लवेतसवल्कलपञ्चाम्लैः ॥ हृन्मुखशिरःप्रदेहाः सघृता मूर्च्छार्तिभ्रमतृषाघ्नाः ॥ २ ॥ इति वृन्दात् । सर्जीरकाण्यार्द्रकशृङ्गवेरसौवर्चलान्यर्थपरिप्लुतानि । मद्यानि हृद्यानि च गन्धवन्ति पीतानि सद्यः शमयन्ति तृष्णां ॥ १ ॥ आम्रजम्बूकषायं वा पिबेन्माक्षिकसंयुतम् । सर्वां छर्दिं प्रणुदति तृष्णां चैवापकर्षति ॥ २ ॥ गोस्तनीक्षुरसक्षीरयष्टीमधुमधूत्पलैः । नियतं वाम्यतो पीतैस्तृष्णा शाम्यति तत्क्षणात् ॥ ३ ॥ जीरकुस्तुम्बरीद्राक्षाचन्दनोत्पलशीतलम् । शीतलेन समं दद्यात्तृष्णां हन्त्यतिशीलितम् ॥ ४ ॥ निर्वापितं तप्तलोष्टं कपालसिकतादिभिः । तृष्णायां वमनोत्थायां सगुडं दधि शस्यते ॥ ५ ॥ इति चिकित्सासारात् ॥

॥ अथ लघुमधूकादिफाण्टः ॥

शार्ङ्गधरात् । मधूकपुष्पगम्भारीचन्दनोशीरधान्यकैः । द्राक्षया च कृतः फाण्टः शीतः शर्करयायुतः ॥ तृष्णापित्तहरः प्रोक्तो दाहमूर्च्छाभ्रमाञ्जयेत् ॥ १ ॥

॥ अथ गण्डूषः ॥

सक्षौद्रमाम्रजम्बूत्थं पिबेत्क्वाथं सुपाचितम् । सतृष्णो मधुना कुर्याद्गण्डूषान् शिशिरस्थितः ॥१॥ इति रसरत्नप्रदीपात् । क्षीरेक्षुरसमृद्वीकाक्षौद्रसिन्धुगुडोदकैः । सह वृक्षाम्लगण्डूषस्तालुशोषतृडन्तकृत् ॥ १ ॥ इति योगतरङ्गिण्याः ॥

॥ अथ लेपाः ॥

दाडिमकपित्थलोध्रैः सविदारीबीजपूरकैः शिरसः । लेपो गौरामलकैः घृतारनालयुतैः सहितैः ॥ १ ॥ इति वृन्दात् । अरुणचन्दनचन्दनवालकैर्नलदपद्मकतुल्यकृतांशकैः । शिरसि लेपनमाचरतां नृणां तृडुपयात्युपशान्तिमसंशयम् ॥ १ ॥ इति कदम्बात् । दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् । पिष्ट्वा लेपः शिरस्येषां पिपासादाहनाशनः ॥ १ ॥ इति योगतरङ्गिण्याः ॥ इति लेपाः ॥

॥ अथ गुटिका ॥

नीलाम्बुजाब्दमधुलाजवटावरोहैः श्लक्ष्णीकृतैर्विरचिता गुटिका मुखस्था । तृष्णां निवारयति तत्क्षणमेव तीव्रां मृत्योः स्पृहामिव यतेः परमार्थचिन्ता ॥ १ ॥ इति राजमार्तण्डात् । वटप्ररोहं मधुकुष्ठमुत्पलं सलाजचूर्णं गुटिका प्रकल्प्या । सुसंहिता सा वदने च धारिता तृष्णां सुवृद्धामपि हन्ति सज्वराम् ॥ १ ॥ इति योगशतात् । रुग्लाजाब्दवटप्ररोहमधुकैर्मध्वन्वितैः कल्पिताप्युग्रामाशु तृषं भृशं प्रशमयेदास्यान्तरस्था गुटी । एलालाजलवङ्गनागचपलाश्रीकोलमज्जाम्बुदश्रीखण्डं मधुयुक् प्रिये प्रशमयेद्वान्तिं त्रिदोषोद्भवाम् ॥ १ ॥ इति वैद्यजीवनात् । रोगोपसर्गजातायां धान्याम्बुससिता मधु । वटप्ररोहयष्ट्याह्वकणामधुकृता वटी ॥ मुखस्था चिरकालोत्था तृष्णां हन्यात्सुदुस्तराम् ॥१॥ इति चिकित्सासारात् । इति सामान्यविधिः । क्षतोद्भवां रुग्विनिवारणेन जयेद्रसानाममृजश्च पानैः । क्षयोत्थितां क्षीरजलं निहन्यान्मांसोदकं वा मधुकोदकं वा॥१॥ आमोद्भवां बिल्ववचायुतानां जयेत्कषायैरपि दीपनानाम् । उल्लेखनैर्गुर्वशनप्रजातां जयेत्क्षयोत्थां तु विना पिपासाम् ॥ २ ॥ स्निग्धेऽन्ने भुक्ते या तृष्णा स्यात्तां गुडाम्बुना शमयेत् । अतिरूक्षदुर्बलानां तृष्णां शमयेन्नृणामिहाशु पयः ॥ ३॥ छागमांसरसं साज्यं शीतं समधुशर्करम् । पीत्वा जयति दुर्दाहमूर्च्छाछर्दिमदात्ययान् ॥ ४ ॥ सात्म्यान्नपानभैषज्यैस्तृष्णार्त्तस्य जयेत्तृषाम् । तस्यां जितायामन्योऽपि व्याधिः शक्यश्चिकित्सितुम् ॥ ५ ॥ तृषितो मोहमायाति मोहात्प्राणान्विमुञ्चति । तस्मात्सर्वास्ववस्थासु न क्वचिद्वारि वार्यते ॥ ६ ॥ अन्नेनापि विना जन्तुः प्राणान्सन्धारयेच्चिरम् । तोयाभावे पिपासार्तः क्षणात्प्राणान् विमुञ्चति ॥ ७ ॥

॥ अथ रसाः ॥

॥ अथ रसादिगुटिका ॥

रसरजतगुटीं पटीयसीं यो वदनसरोरुहमध्यगां दधाति । स जयति तृषितस्तृषां मनुष्यां भृशमघपुञ्जमिव त्रिमार्गगाम्भः ॥ १ ॥

॥ अथ रसादिचूर्णम् ॥

रसगन्धककर्पूरैः शैलेशीरमरीचकैः । ससितैः क्रमवृद्धैश्च सूक्ष्मं कृत्वा त्वहर्मुखे

॥ १ ॥ त्रिगुणाग्रमितं क्वाथेत्पिबेत्पर्युषिताम्बु च । घ्नंती तृषां निहन्त्येवमश्विभ्यां च प्रकाशितम् ॥ २ ॥ इति सारसङ्ग्रहात् ॥ इति रसाः ॥

॥ अथ पथ्यापथ्यम् ॥

षष्टिकाः शालयः पेया विलेपी लाजसक्तवः । अन्नमण्डो धान्यरसः शर्करारागखाण्डवौ ॥ १ ॥ भृष्टैर्मुद्गैर्मसूरैर्वा चणकैर्वा कृतो रसः । रम्भापुष्पं तक्रकूर्ची कूष्माण्डकसुपोदिका ॥ २ ॥ खर्जूरं दाडिमं धात्री बीजपूरं गवां पयः । जम्बीरं करमर्दश्च पथ्यमेतत्तृषातुरे ॥३॥ गुर्वन्नमम्लं लवणं कषायं कटुत्रयं दुष्टजलानि तीक्ष्णम् । एतानि सर्वाणि हिताभिलाषी तृषातुरो नैव भजेत्कदाचित् ॥४॥ इति तृष्णाचिकित्सा ॥

॥ अथ मूर्च्छानिदानम् ॥

क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः । वेगाघातादभीघाताद्धीनसत्त्वस्य वा पुनः ॥ १ ॥ करणायतनेषूग्रा बाह्येष्वाभ्यन्तरेषु च । निवसन्ति यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥ २ ॥ संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः । तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ३ ॥ सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् । मोहो मूर्च्छेति तामाहुः षड्विधा सा प्रकीर्तिता ॥ ४ ॥ वातादिभिः शोणितेन मद्येन च विषेण च । षट्स्वप्येतासु पित्तं च प्रभुत्वेनावतिष्ठति ॥ ५ ॥

॥ अथ तस्याः पूर्वरूपमाह ॥

हृत्पीडा जृम्भणं ग्लानिः संज्ञादौर्बल्यमेव च । सर्वासां पूर्वरूपाणि यथास्वं च विभावयेत् ॥ १ ॥

॥ अथ वातजामाह ॥

नीलं वा यदि वा कृष्णमाकाशमथ वारुणम् । पश्यंस्तमः प्रविशति शीघ्रं च प्रतिबुध्यते ॥ १ ॥ वेपथुश्चाङ्गमर्दश्च प्रपीडा हृदयस्य च । कार्श्यं श्यावारुणच्छाया मूर्च्छा सा वातसम्भवा ॥ २ ॥

॥ अथ पित्तजामाह ॥

रक्तं हरितवर्णं वा वियत्पीतमथापि वा । पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते ॥ १ ॥ सपिपासःससन्तापो रक्तपित्ताकुलेक्षणः । जातमात्रे च पतति शीघ्रं च प्रतिबुध्यते ॥ सम्भिन्नवर्चाः पीताभो मूर्च्छा सा पित्तसम्भवा ॥ २ ॥

॥ अथ श्लेष्मजामाह ॥

मेघसङ्काशमाकाशमाच्छन्नं वा तमोघनैः । पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते ॥ १ ॥ गुरुभिः प्रावृतैरङ्गैर्यथा वार्द्रेण चर्मणा । सप्रसेकः सहृल्लासो मूर्च्छा सा कफसम्भवा ॥ २ ॥

---

१ (च०) क्रियत् । २ (च०) ससन्तोषो ।

॥ अथ सन्निपातजामाह ॥

सर्वाकृतिः सन्निपातादपस्मार इवागता । सा जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः ॥ १ ॥

॥ अथ रक्तगन्धजमूर्च्छामाह ॥

पृथिव्यम्भस्तमोरूपं रक्तगन्धश्च तन्मयः । तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः ॥ द्रव्यस्वभाव इत्येके दृष्ट्वा यदभिमुह्यति ॥ १ ॥

॥ अथ विषमद्यजे आह ॥

गुणास्तीव्रतरत्वेन स्थिताश्च विषमद्ययोः । त एव तस्मात्ताभ्यां तु मोहौ स्यातां यथेरितौ ॥ स्तब्धाङ्गदृष्टिस्त्वसृजा गूढोच्छ्वासश्च मूर्च्छितः ॥ १ ॥

॥ अथ मद्यजामाह ॥

मद्येन विलपन् शेते नष्टविभ्रान्तमानसः । गात्राणि विक्षिपन् भूमौ पक्तिं यावन्न याति तत् ॥ १ ॥

॥ अथ विषजामाह ॥

वेपथुस्वप्नतृष्णाः स्युः स्तम्भश्च विषमूर्च्छितः । वेदितव्यं तीव्रतरं यथास्वं विषलक्षणैः ॥ १ ॥

॥ अथ संज्ञानाशसाधर्म्यान्मूर्च्छाया भेदानाह ॥

मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः । तमोवातकफात्तन्द्रा निद्रा श्लेष्मतमोभवा ॥ १ ॥ इन्द्रियार्थेष्वसम्प्राप्तिर्गौरवं जृम्भणं क्लमः । निद्रार्तस्येव यस्यैते तस्य तन्द्रां विनिर्दिशेत् ॥ २ ॥ उत्क्लिश्यं न च निर्गच्छेत्प्रसेकष्ठीवनेरितः । हृदयोद्वेष्टनं चास्य तमुत्क्लेदं विनिर्दिशेत् ॥३॥ आर्द्रचर्मावनद्धं च यो गात्रं मन्यते सदा । तथा गुरु शिरो नित्यं गौरवं तद्विनिर्दिशेत् ॥ ४ ॥ योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेय इन्द्रियार्थप्रबोधकः ॥ ५ ॥

॥ अथ सन्यासस्य मूर्च्छादिभ्यो भेदमाह ॥

दोषेषु मदमूर्च्छाया गतवेगेषु देहिनाम् । स्वयमेवोपशाम्यन्ति सन्यासो नौषधैर्विना ॥ १ ॥ वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः । सन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥ २ ॥ स ना सन्याससंन्यस्तः काष्ठीभूतो मृतोपमः । प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यः फलक्रियाम् ॥ ३ ॥ वादित्रगीतानुनयैरपूर्वैर्विस्मापनैर्गुप्तफलावघर्षैः । आभिः क्रियाभिश्च न लब्धसंज्ञो सानाहलालश्च नरश्च वर्ज्यः ॥ ४ ॥

॥ अथ तच्चिकित्सा ॥

मूर्च्छा मोहो द्विधा स प्रभवति सहजागन्तुभेदेन भिन्नस्तत्रागन्तुस्त्रिधा स्या-

---

१ (च०) इवापरः । २ (च०) जराम् । ३ (च०) तमश्च ।

रुधिरविषसुराजन्यभेदाद्विभिन्नः । प्रत्येकं दोषभेदाद्भवति च सहजः स त्रिधा षट्सु पित्तं प्राधान्येनेह तिष्ठेदभिदधति च तां द्वन्द्वजां सन्निपाते ॥ १ ॥ सेकावगाहा मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च । शीतानि पानानि च गन्धवन्ति सर्वासु मूर्च्छास्वनिवारितानि ॥ २ ॥ कोलमज्जोषणोशीरकेसरं शीतवारिणा । पीतं मूर्च्छां जयेल्लीढा कृष्णा वा मधुसंयुता ॥ ३ ॥ इति वृन्दात् ॥ महौषधामृताद्राक्षापुष्करग्रन्थिकोद्भवम् । पिबेत्कणायुतं क्वाथं मूर्च्छायां च मदेषु च ॥ १ ॥ इति वृन्दात् ॥ नारीकेलाम्बुना पीताः सक्तवः समशर्कराः । पित्तत्दृत्कफतृण्मूर्च्छाभ्रमादीन् घ्नन्ति दारुणान् ॥ १ ॥ इति चिकित्सासारात् ॥ दुरालभाकषायस्य घृतयुक्तस्य सेवनात् । भ्रमः शाम्यति गोविन्दस्मरणादिव पातकम् ॥ १ ॥ इति वैद्यजीवनात् ॥ मधुना हन्त्युपयुक्ता त्रिफला रात्रौ गुडार्द्रकं प्रातः । सप्ताहात् पथ्यभुजो मदमूर्च्छाकामलोन्मादान् ॥ १ ॥ इति चिकित्सासारात् ॥ स्विन्नमामलकं पिष्ट्वा द्राक्षया सह संसृजेत् । विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥ तेनास्य शाम्यते मूर्च्छा कासः श्वासस्तथैव च ॥ १ ॥ इति वृन्दात् ॥

॥ अथ योगतरङ्गिण्यां घृतम् ॥

पथ्याक्वाथेन संसिद्धं घृतं धात्रीरसेन वा । सर्पिः कल्याणकं वापि मदमूर्च्छापहं पिबेत् ॥ १ ॥ रक्तजायां तु मूर्च्छायां हितः शीतक्रियाविधिः । मद्यजायां पिबेन्मद्यं निद्रां सेवेद्यथासुखम् ॥ २ ॥ विषजायां विषघ्नानि भेषजानि प्रदापयेत् । अञ्जनान्यवपीडांश्च धूमान् प्रधमनानि च ॥ ३ ॥ सूचिभिस्तोदनं शस्तं दाहपीडा नखान्तरे । लुञ्चनं नखलोम्नां च दन्तैर्दशनमेव च ॥ ४ ॥ आत्मगुप्तावघर्षश्च हितस्तस्यावबोधने । अण्डयोर्घर्षणं चापि हितमेतैर्विबोधनम् ॥ ५ ॥ नासावदनरोधेन नस्यैर्मरिचनिर्मितैः । नरं जागरयेद्भूमौ मूर्च्छितं मन्दमारुतैः ॥ ६ ॥

॥ अथ रसाः ॥

कणामधुयुतं सूतं मूर्च्छायामनुशीलयेत् । शीतसेकावगाहादि सर्वं वा पीडनं हितम् ॥ १ ॥ इति रसरत्नप्रदीपात् ॥

॥ अथ पथ्यम् ॥

जीर्णा यवा लोहितशालयश्च कौम्भं हविर्मुद्गसतीनयूषः । धन्वोद्भवा मांसरसाश्च रागसखाण्डवा गव्यपयः सिता च ॥ १ ॥ पुराणकूष्माण्डपटोलमोचहरीतकीदाडिमनारिकेलम् । मधूकपुष्पाणि च तण्डुलीयमुपोदिकान्नानि लघूनि चापि ॥ २ ॥ अत्युच्चशब्दोऽद्भुतदर्शनं च गीतानि वाद्यान्यपि चोत्कटानि । श्रमः श्रुतिश्चिन्तनमात्मबोधो धैर्यं च मूर्च्छास्विति पथ्यवर्गः ॥ ३ ॥ नासामुखद्वारमरुन्निरोधो विरेचनं छर्दनलङ्घनानि । छायानभोऽम्भः शतधौतसर्पिर्मधूनि तीक्ष्णानि च लाजमण्डः ॥ ४ ॥

॥ अथापथ्यम् ॥

ताम्बूलं पत्रशाकानि दन्तघर्षणमातपम् । विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटुम् ॥ विण्मूत्रवेगरोधं च तक्रं मूर्च्छामयी त्यजेत् ॥ १ ॥ इति मूर्च्छाचिकित्सा ॥

॥ अथ पानात्ययपरमदपानाजीर्णपानविभ्रमनिदानचिकित्से ॥

ये विषस्य गुणाः प्रोक्तास्ते च मद्ये प्रकीर्तिताः । तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः ॥ १ ॥ किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् । अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥ २ ॥ शुद्धकायः पिबेत्प्रातः सोपदंशं पलद्वयम् । मध्याह्ने द्विगुणं तच्च स्निग्धाहारेण पाययेत् ॥ ३ ॥ मदोपेऽष्टपलं तद्वन्मात्रा मद्यरसायने । आरोग्यं धातुसाम्यं च वह्निकान्तिबलप्रदम् ॥४॥ अनेन विधिना सेव्यं मद्यं नित्यमतन्द्रितैः । बुद्ध्यादयो गुणा यावदुल्लसन्ति निरत्ययाः ॥ मात्रा या विहिता मद्यपाने रोगाय चापरा ॥५॥ लघुतीक्ष्णोष्णसूक्ष्माम्लव्यवाय्याशुगमेव च । रूक्षं विकाशि विशदं मद्यं दशगुणं स्मृतम् ॥ ६ ॥ मद्यस्याम्लस्वभावस्य चत्वारस्तु रसाः स्मृताः । मधुरश्च कषायश्च कटुकस्तिक्त एव च ॥ ७ ॥ मद्यं प्राणहरं तद्वद्युक्तियुक्तं रसायनम् । प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून् ॥ ८ ॥ मद्यमुष्णं तथा तीक्ष्णं सूक्ष्मं विशदमेव च । रूक्षमाशुकरं चैव व्यवायि च विकाशि च ॥९॥ औष्ण्याच्छीतोपचारं च तैक्ष्ण्याद्धन्ति मनोगतिम् । विशत्यवयवान्सौक्ष्म्याद्वैशद्यात्कफशुक्रनुत् ॥ १० ॥ मारुतं कोपयेद्रौक्ष्यादाशुत्वादाशुकारि च । हर्षदं च व्यवायित्वाद्विकाशित्वाद्विसर्पति ॥ ११ ॥ तदम्लं रसतः प्रोक्तं लघुदीपनपाचनम् । केचिल्लवणवर्ज्यांस्तु रसांस्तत्रादिशन्ति हि ॥ १२ ॥

॥ अथ विधिनोपयुक्तस्य फलमाह ॥

विधिना मात्रया काले हितैरन्नैर्यथाबलम् । प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥ १ ॥ स्निग्धैस्तदन्नैर्मांसैश्च भक्ष्यैश्च सह सेवितम् । भवेदायुष्प्रकर्षाय बलायोपचयाय च ॥ २ ॥ काम्यता मनसस्तुष्टिस्तेजो विक्रम एव च । विधिवत्सेव्यमाने तु मद्ये सन्निहिता गुणाः ॥ ३ ॥

॥ अथ सलक्षणतन्मदानाह ॥

तत्र प्रथमः । बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्धनश्च । सम्पाठगीतस्वरवर्धनश्च प्रोक्तोऽतिरम्यः प्रथमो मदो हि ॥ १ ॥

॥ अथ मध्यममदमाह ॥

अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः । आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन ॥ १ ॥

॥ अथ तृतीयमदमाह ॥

गच्छेदगम्यां न गुरूं च मन्येत्खादेदभक्ष्याणि च नष्टसंज्ञः । ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्वतन्त्रः ॥ १ ॥

॥ अथ सुश्रुतोक्तं चतुर्थमदमाह ॥

चतुर्थे तु मदे मूढो भग्नदार्विव निष्क्रियः । कार्याकार्यविभागाज्ञो मृतादप्यपरो मृतः ॥ १ ॥ को मदं तादृशं गच्छेदुन्मादमिव चापरम् । बहुदोषमिवामूढः कान्तारं स्ववशः कृती ॥ २ ॥ श्लैष्मिकानिलपीतांश्च स्निग्धमात्रोपसेविनः । पानं न बाधतेऽत्यर्थं विपरीतं तु बाधते ॥ ३ ॥

॥ अथाविधिमद्यपानस्य विकारकारणत्वमाह ॥

निर्भक्तमेकान्तत एव मद्यं निषेव्यमाणं मनुजेन नित्यम् । आपादयेत्कष्टतरान्विकारानापादयेच्चापि शरीरभेदम् ॥ १ ॥

॥ अथ क्रुद्धादिकारणत्वेन विविधान् विकारानाह ॥

क्रुद्धेन भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन । व्यायामभाराध्वपरिक्षतेन वेगावरोधाभिहतेन वापि ॥ १ ॥ अत्यम्लभक्षावततोदरेण साजीर्णभुक्तेन तथा बलेन । उष्णाभितप्तेन च सेव्यमानं करोति मद्यं विविधान्विकारान् ॥ २ ॥

॥ अथ तानेव विकारान् विवृणोति ॥

पानात्ययं परमदं पानाजीर्णमथापि वा । पानविभ्रममुग्रं च तेषां वक्ष्यामि लक्षणम् ॥ १ ॥

॥ अथ तत्र वातिकमदात्ययमाह ॥

हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः । विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥ १ ॥

॥ अथ पैत्तिकमाह ॥

तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः । विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥१॥ ज्ञेयानि तत्र भिषजा सुविनिश्चितानि पित्तप्रकोपजनितानि च लक्षणानि ॥२॥

॥ अथ श्लैष्मिकमाह ॥

छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः । विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥ १ ॥

॥ अथ त्रिदोषद्विदोषजमाह ॥

ज्ञेयस्त्रिदोषजश्चापि सर्वलिङ्गैर्मदात्ययः । द्विदोषसम्भवैर्लिङ्गैर्विज्ञेयस्तु द्विदोषजः ॥ १ ॥

॥ अथ परमदमाह ॥

श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च । लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञास्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः॥१॥

॥ अथ पानाजीर्णपानभ्रमावाह ॥

आध्मानमुग्रमथ चोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्षणानि । हृद्गात्रभेदकफसंस्रवकण्ठधूममूर्च्छावमिज्वरशिरोरुजनप्रदेहाः ॥ द्वेषः सुरान्नविकृतेष्वपि तेषु तेषु तं पानविभ्रममुशन्त्यखिलेन धीराः ॥ १ ॥

॥ अथासाध्यलक्षणमाह ॥

हीनोत्तरोष्ठमतिशीतममन्ददाहं तैलप्रभास्यमतिपानहतं त्यजेत्तम् । जिह्वौष्ठदन्तमसितं त्वथ वापि नीलं पीते च यस्य नयने रुधिरप्रभे च ॥ १ ॥

॥ अथ तस्योपद्रवमाह ॥

हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः कासभ्रमावपि च पानहतं त्यजेत्तम् ॥ १ ॥

॥ अथ तच्चिकित्सा ॥

मद्यं सौवर्चलं व्योषं युक्तं किञ्चिज्जलान्वितम् । जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥ १ ॥ शुक्तं सौवर्चलं शृङ्गीत्र्यूषणार्द्रकदीपकैः । मद्यं पीत्वा जयत्युग्रं पवनोत्थं मदात्ययम् ॥ २ ॥

॥ अथ पित्तपानात्ययचिकित्सा ॥

पित्तपानात्यये पेयं वटशृङ्गं हिमाम्बुना । सशर्करं पुनर्मद्यं पिबेत्किञ्चिज्जलान्वितम् ॥ १ ॥ क्षुद्रामलकखर्जूरपरूषकहिमं पिबेत् । सिताविमिश्रितं पीतं पानात्ययविकारनुत् ॥ २ ॥

॥ अथ कफपानात्ययचिकित्सा ॥

पानात्यये कफोत्थे तु तत्पीत्वोल्लेखनं चरेत् । यथाबलं लङ्घनं च दीपनीयौषधानि च ॥१॥ अथाष्टाङ्गलवणम् । सौवर्चलमजाजी च वृक्षाम्लं साम्लवेतसम् । त्वगेलामरिचार्धांशं शर्कराभागयोजितम् ॥ १ ॥ एतल्लवणमष्टाङ्गमग्निसन्दीपनं परम् । मदात्यये कफोत्थे तु दद्यात्स्रोतोविशोधनम् ॥ २ ॥ इति कफपानात्ययचिकित्सा ॥ सर्वजे सर्वमेवेदं प्रयोक्तव्यं चिकित्सितम् । आभिः क्रियाभिः सिद्धाभिः शान्तिं याति मदात्ययः ॥ १ ॥

॥ अथ सामान्यप्रतीकारः ॥

मधुना हन्त्युपयुक्ता त्रिफला रात्रौ गुडार्द्रकं प्रातः । सप्ताहात्पथ्यभुजो मदमूर्च्छा-

---

१ (च०) मधुरास्यता ।

कामलोन्मादान् ॥ १ ॥ दुःस्पर्शेन समुस्तेन मुस्तपर्पटकेन वा । जलमुस्तैः शृतं वापि दद्याद्दोषविपाचनम् ॥ २ ॥ एतदेव च पानीयं सर्वत्रापि मदात्यये । निरत्ययं पीयमानं पिपासाज्वरनाशनम् ॥३॥ इति वृन्दात् । चव्यं सौवर्चलं हिङ्गु पूरकं विश्वभेषजम् । चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥ १ ॥ इति चिकित्सासारात् । मन्थः खर्जूरमृद्वीकावृक्षाम्लाम्लिकदाडिमैः । परूषकैः सामलकैर्युक्तो मद्यविकारनुत् ॥ १ ॥ इति वृन्दात् । मथितं गोदधिसहितं तैलं कर्पूरसंमिश्रम् । आस्वाद्य पीतमाशु क्षपयति पानात्ययं रोगम् ॥ १ ॥ इति लघुयोगतः ॥ शतावरीरसक्षीरयष्टीकल्कैः शृतं घृतम् । पुनर्नवाक्काथयुतं पानात्ययमपोहति ॥ १ ॥ इति शतावरीपुनर्नवासर्पिः । कट्फलमुस्तगुडूचीमाषैः क्रमविवर्धितैश्च तत्सर्वम् । घृतमुदितं माषघृतं हन्याद्द्वन्द्वं सुराभवं सपदि ॥१॥ इति माषघृतम् ॥ मद्यं पीत्वा यदि वा तत्क्षणमवलिह्य शर्करां सघृताम् । मदयति न जातु मद्यं मनागपि प्रथितवीर्यमपि ॥ १ ॥ इति सामान्यप्रतीकारः ॥ अहानि सप्त चाष्टौ वा नृणां पानात्ययः स्मृतः । पानं हि मज्जतेऽजीर्णमत ऊर्ध्वं त्रिमार्गगम् ॥ पानाजीर्णविनाशाय कुर्यात्कफहरं विधिम् ॥ १ ॥

॥ अथ पूगमदप्रतीकारः ॥

पूगान्मदं प्रशमयत्यचिरेण जन्तोराघ्राय शङ्खरजसः प्रबलस्य गन्धम् । पानेन वा शिशिरपुष्करिणीजलस्य संसेवितैरतिहितैर्व्यजनानिलैश्च ॥ १ ॥ इति वृन्दात् ॥

॥ अथ कोद्रवधत्तूरप्रतीकारः ॥

कूष्माण्डरसः सगुडः शमयति मदमाशु कोद्रवजम् । धत्तूरजं च दुग्धं सशर्करं पानयोगेन ॥ १ ॥

॥ अथ कज्जली ॥

धात्री स्वरसनिपीता रसगन्धककज्जली सितासहिता । हरति मदात्ययरोगान् गरुत्मानिवोरगान्सहसा ॥ १ ॥

॥ अथ पथ्यम् ॥

गोधूमयवमुद्गाश्च माषषष्टिकशालयः । तण्डुलीयं पटोलं च दक्षबर्हिशशामिषम् ॥ शीताम्बु चन्दनं स्नानं सेव्यमेतन्मदात्यये ॥ १ ॥ इति पानात्ययचिकित्सा ॥

॥ अथ दाहनिदानम् ॥

तीक्ष्णमुष्णं पिबन्मद्यं दाहं प्राप्नोति मानवः । दाहः सप्तविधः प्रोक्तो वैद्यशास्त्रप्रकल्पितः ॥१॥ अथ मद्यज माह । त्वचं प्राप्तस्तु पानोष्मा पित्तरक्ताभिमूर्च्छितः । दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम् ॥१॥ अथ रक्तजमाह । कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति

१ (क०) पयः ।

ध्रुवम् । संशुष्यते चोष्यते वा ताम्रामस्ताम्रलोचनः ॥ १ ॥ अथ तिक्तजमाह ॥ लोहगन्धाङ्गवदनो वह्निनेवावकीर्यते ॥ १ ॥ अथ पित्तजमाह । पित्तज्वरसमः पित्तात्स चास्यापि विधिः स्मृतः ॥१॥ अथ तृष्णानिरोधजमाह । तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्धतम् । सबाह्याभ्यन्तरं देहं प्रदहेन्मन्दचेतसः ॥ संशुष्कगलताल्वोष्ठो जिह्वां निष्कृष्य वेपते ॥ १ ॥ अथ कोष्ठजमाह । असृजा पूर्णकोष्ठस्य दाहोऽन्यः स्यात्सुदुस्तरः ॥ १ ॥ अथ धातुक्षयजमाह । धातुक्षयोत्थो यो दाहस्तेन मूर्छा-तृषान्वितः । क्षामस्वरः क्रियाहीनः स सीदेद्भृशपीडितः ॥ १ ॥ अथ क्षतजमाह । क्षतजेनाश्नितश्चान्यः शोचतो वाप्यनेकधा । तेनाङ्गं दह्यतेऽत्यर्थं तृष्णामूर्छा-प्रलापवान् ॥ १ ॥ अथ मर्माभिघातजमाह । मर्माभिघातजोऽप्यस्ति सोऽसाध्यः सप्तमो मतः । सर्व एव विवर्ज्याः स्युः शीतगात्रेषु देहिषु ॥१॥ इति दाहनिदानम् ॥

॥ अथ दाहचिकित्सा ॥

दाहेऽतिशिशिरं तोयं क्रिया कार्या सुशीतला । सर्वाङ्गे चन्दनालेपश्चन्द्रकस्तूरि-कायुतः ॥ १ ॥ शीतनीरजलेपो वा धारागारनिवेशनम् । सहजस्नेहसोत्साहमुग्ध-मञ्जुलभाषिनाम् ॥ २ ॥ बालकानां समाश्लेषस्तापं निर्वापयेज्जवात् । उशीरागार-शयनं तालवृन्तानुवर्तनम् ॥ ३ ॥ साहित्यसरसा वाणी कवीनां तापहृद्भयम् । उत्तुङ्गकुचसंसर्गी वीणानां हरिणीदृशाम् ॥ ४ ॥ गायनं सुकुमारीणां दाहमुत्साद-येद्द्रुतम् । रसौषधसमुद्भूते तापेऽपि सकले हितम् ॥ ५ ॥ पानीयामलकं द्राक्षानालिकेरेक्षुशर्कराः । सेवनाय हितास्तापे कोमलं मूत्रलं फलम् ॥ ६ ॥ तण्डुलीयकमूलानि धान्यजीरकजं पयः । तुलसीस्वरसं टङ्कं तापे पिबे रसे हितम् ॥ ७ ॥ फलिनीलोध्रसेव्याम्बुहेमपत्रं कुटं नटम् । कालीयकरसोपेतं दाहे शस्तं प्रलेपनम् ॥ ८ ॥ ह्रीवेरपद्मकोशीरचन्दनक्षोदवारिणा । सम्पूर्णामवगाहेत द्रोणीं दा-हार्दितो नरः ॥ ९ ॥ प्रातःपर्युषितं धान्यसलिलं सितया युतम् । अन्तर्दाहं हरेत्पीतं दुःखं दुर्गार्चनं यथा ॥ १० ॥ सशर्करं सेन्दुशैलं शीतमम्भः पिबेन्नरः । तृष्णानि-रोधजं दाहं हन्ति तोयमिवानलम् ॥ ११ ॥

॥ अथ शार्ङ्गधराद्धान्यकादिहिमः ॥

धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः । रक्तपित्तं ज्वरं दाहं तृष्णां शोषं च नाशयेत् ॥ १ ॥ पीत्वा वेणुत्वचः क्वाथं सक्षौद्रं शिशिरं नरः । रक्तसंपूर्णकोष्ठोत्थं दाहं जयति दुस्तरम् ॥ २ ॥

॥ अथ शार्ङ्गधरात्सक्तुमन्थः ॥

पाचितैः शीतनीरेण सघृतैर्यवसक्तुभिः । नातिसान्द्रद्रवैर्मन्थस्तृष्णादाहार्ति-पित्तहा ॥ १ ॥

---

१ (च०) समुष्यते । २ (च०) तृष्यते । ३ (च०) तापेऽपि रसजे ।

॥ अथ दशसारचूर्णम् ॥

यष्टीधात्रीफलं द्राक्षा एलाचन्दनवालकम् । मधूकपुष्पं खर्जूरं दाडिमं पेषयेत्समम् ॥ १ ॥ सर्वतुल्या सिता योज्या पलार्धं भक्षयेत्सदा । दशसारमिदं ख्यातं सर्वपित्तविकारनुत् ॥ २ ॥

॥ अथ मृतसञ्जीवनी वटिका ॥

यष्टी मधु लवङ्गं च शिलावल्कं त्रुटिस्तथा । सहस्रभावनाः कार्या नवतण्डुलवारिणा ॥ १ ॥ याममात्रं दृढं मर्द्यं वटिका कोलसंमिता । कृष्णकार्पासनीरेण तृष्णादाहज्वराञ्जयेत् ॥२॥ मूर्च्छाभ्रमोग्ररोगं च वान्तिं पित्तं च नाशयेत् । मृतसञ्जीवनी प्रोक्ता पूज्यपादैरुदीरिता ॥ ३ ॥

॥ अथ चन्दनादिचूर्णम् ॥

चन्दनोशीरकुष्ठाब्दधात्रीचोरकमुत्पलम् । मधुकं मधुपुष्पं च द्राक्षाखर्जूरकं तथा ॥ १ ॥ चूर्णं कृतं समसितं प्रातः शीताम्बुना पिबेत् । रक्तपित्तं तथा श्वासं पैत्त्यं गुल्मं समुद्धरेत् ॥ २ ॥ अङ्गदाहं शिरोदाहं शिरोविभ्रममेव च । कामलां च प्रमेहांश्च पित्तज्वरविनाशनम् ॥ चन्दनाद्यमिदं चूर्णं पूज्यपादेन भाषितम् ॥ ३ ॥

॥ अथ खर्जूरादिचूर्णम् ॥

खर्जूरामलबीजानि पिप्पली च शिलाजतु । एलामधुकपाषाणचन्दनोर्वारुबीजकम् ॥ १ ॥ धान्याकं शर्करायुक्तं पातव्यं ज्येष्ठवारिणा । अङ्गदाहं लिङ्गदाहं गुदवङ्क्षणशुक्रजम् ॥ २ ॥ शर्कराश्मरिशूलघ्नं वृष्यं बलकरं परम् । नाशयेन्मूत्ररोगांश्च तथा शुक्रभवानपि ॥ शर्करासहितं यष्टीकषायं प्रपिबेत्तदा ॥ ३ ॥ ॥ अथ वैद्यजीवनात् ॥ अयि नितम्बिनि खेलनलालसे मधुरवाणि निकाममदालसे । वपुषि दाहवतां विहितं हितं हिमहिमांशुजलैरनुलेपनम् ॥ १ ॥ सहस्रधौतेन घृतेन दिग्धदेहस्य दाहः कृशतां बिभर्ति । अन्याङ्गनासङ्गमसादरस्य स्वीयेषु दारेषु यथाभिलाषः ॥ २ ॥ तृड्दाहमोहाः प्रशमं प्रयान्ति निम्बप्रवालोत्थितफेनलेपात् । यथा नराणां धनिनां धनानि समागमाद्वारविलासिनीनाम् ॥ ३ ॥

॥ अथ कुशाद्यतैलघृते ॥

कुशादिशालिपर्णीयजीवकर्षभसाधितम् । तैलं घृतं वा दाहघ्नं वातपित्तविनाशनम् ॥ १ ॥ शाखाश्रयां यथान्यायं रोहिणीं व्यधयेच्छिराम् । रक्तजातस्ततो दाहः प्रशाम्यति न संशयः ॥ २ ॥ धातुक्षयोत्थदाहं तु जयेदिष्टार्थसाधनैः । क्षीरमांसरसाहारैर्विधिनोक्तेन तत्र च ॥ ३ ॥ पित्तज्वरहरः सर्वः पित्तदाहे विधिर्मतः । औदुम्बरस्य निर्यासः सितया दाहनाशनः । छिन्नासारः सितायुक्तः पित्तज्वरनिषूदनः ॥ ४ ॥

॥ अथ रसाः ॥

रसरत्नप्रदीपाद्रसादिगुटिका । रसबलिघनसारचन्दनानां सनलदसेव्यपयोदजी-

चनानाम् । अपहरति गुटी मुखस्थितेयं सकलसमुत्थितदाहमभ्रमेण ॥ १ ॥ अथ रसमञ्जर्यांश्चन्द्रकलारसः ॥ गगनदरदयुक्तं शुद्धसूतं च गन्धं प्रहरम-धुसुपिष्टं वल्लयुग्मं नरोऽद्यात् । ज्वरहरगजसिंहः शृङ्गबेरोदकेन प्रथमजनितदाहे तक्रभक्तं च भोज्यम् ॥ १ ॥ मुस्तादाडिमदूर्वोत्थैः केतकीस्तनजद्रवैः । सह देव्याः कुमार्याश्च पर्पटस्यापि वारिणा ॥ २ ॥ रामशीतलिकातोयैः शतावर्या रसेन च । भावयित्वा प्रयत्नेन दिवसे दिवसे पृथक् ॥ ३ ॥ तिक्तागुडू-चिकासत्त्वं पर्पटोशीरमाधवी । श्रीगन्धं सारिवा चैषां समानं सूक्ष्मचूर्णितम् ॥ ४ ॥ द्राक्षाधिककषायेण सप्तधा परिभावयेत् । ततो धान्याश्रयं कृत्वा वट्यः कार्याश्च-णोपमाः ॥ ५ ॥ अयं चन्द्रकलानाम्ना रसेन्द्रः परिकीर्तितः । सर्वपित्तगदध्वंसी वातपित्तगदापहः ॥ ६ ॥ अन्तर्बाह्यमहादाहविध्वंसनमहाघनः । ग्रीष्मकाले शर-त्काले विशेषेण प्रशस्यते ॥ ७ ॥ कुरुते नाग्निमान्द्यं च महातापज्वरं हरेत् । भ्रम-मूर्च्छाहरश्चाशु स्त्रीणां रक्तं महास्रवम् ॥ ८ ॥ ऊर्ध्वाऽधो रक्तपित्तं च रक्तवान्ति विशेषतः । मूत्रकृच्छ्राणि सर्वाणि नाशयेन्नात्र संशयः ॥ ९ ॥ इति रसाः ॥

॥ अथ पथ्यापथ्यम् ॥

शालयः षष्टिका मुद्गा मसूराश्चणका यवाः । धन्वमांसं रसा लाजा मण्डो वै सक्त-वस्तथा ॥ १ ॥ शतधौतघृतं दुग्धं नवनीतं पयोभवम् । कूष्माण्डं कर्कटीमोचं पनसं स्वादुदाडिमम् ॥ २ ॥ पटोलं खर्जुरं तुम्बी बिम्बी द्राक्षा कसेरुकम् । इति दाहवतां नृणां पथ्यवर्ग उदाहृतः ॥ ३ ॥ व्यायाममातपं तक्रं ताम्बूलं मधु रामठम् । व्य-वायं कटुतिक्तोष्णं दाहवान् परिवर्जयेत् ॥ ४ ॥ इति दाहचिकित्सा ॥

॥ अथोन्मादनिदानं चिकित्सा च ॥

मदयन्त्युद्धता दोषा यस्मादुन्मार्गमास्थिताः । मानसोऽयमतो व्याधिरुन्माद इ-ति कीर्तितः ॥ १ ॥ एकैकशः सर्वशश्च दोषैरुन्मार्गगामिभिः । मानसेन च दुःखेन स पञ्चविध उच्यते ॥ २ ॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजम् । स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्ति च ॥ ३ ॥ भयोद्वेगौ तमः शोषो गात्राणामपकर्षणम् । मृत्युत्सा-होऽरुचिश्चान्ने स्वप्नेष्वम्बुषु मज्जनम् ॥ ४ ॥ वायुनोन्मादनं चैव भ्रमक्लमगतस्य च । यस्य स्यादचिरेणैवमुन्मादं सोऽपि गच्छति ॥ ५ ॥ विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानाम् । उन्मादहेतुर्भयहर्षपूर्वो मनोऽभिघातो विषमाश्च चेष्टाः ॥ ६ ॥ तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य । स्रोतांस्यधिष्ठाय मनोवहानि प्र-मोहयन्त्याशु नरस्य चेतः ॥ ७ ॥

॥ अथ साधारणोन्मादलक्षणम् ॥

धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च । अबद्धवाक्यं हृदयं च शून्यं सामान्यमुन्माददस्य लिङ्गम् ॥ १ ॥

---

१ (च०) सिता । २ (च०) रत्यर्थमुच्छ्रितैः ।

॥ अथ वातोन्मादलक्षणम् ॥

रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलः प्रवृद्धः । चिन्तादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहन्ति शीघ्रम् ॥१॥ अस्थानहासस्मितनृत्यगीतवाचाङ्गविक्षेपणरोदनानि । पारुष्यकार्श्यारुणवर्णतश्च जीर्णे बलं चानिलजस्य रूपम् ॥ २ ॥

॥ अथ पित्तोन्मादलक्षणम् ॥

अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगम् । उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात् ॥१॥ अमर्षसंरम्भविनग्नभावाः सन्तर्जनाभिद्रवणौष्ण्यरोषाः । प्रच्छायशीतान्नजलाभिलाषाः पीता च भा पित्तकृतस्य लिङ्गम् ॥ २ ॥

॥ अथ कफोन्मादलक्षणम् ॥

सम्पूरणैर्मन्दविचेष्टितस्य सोष्मा कफो मर्मणि सम्प्रवृद्धः । बुद्धिं स्मृतिं चाप्युपहन्ति चित्तं प्रमोहयन्सञ्जनयेद्विकारम् ॥ १ ॥ वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियता च निद्रा । छर्दिश्च लाला च बलं च भुंक्ते नखादिशौक्ल्यं च कफात्मके स्यात् ॥ २ ॥

॥ अथ सान्निपातिकमाह ॥

यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैरपि हेतुभिः स्यात् । सर्वाणि रूपाणि बिभर्ति तादृग् विरुद्धभैषज्यविधिर्विवर्ज्यः ॥ १ ॥

॥ अथ मनोदुःखजमाह ॥

चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यैर्वित्रासितस्य धनबान्धवसंक्षयाद्वा । गाढं क्षते मनसि च प्रियया रिरंसोर्जायेत चोत्कटतरो मनसो विकारः ॥ १ ॥

॥ अथ तस्य रूपमाह ॥

चित्रं ब्रवीति च मनोऽनुगतं विसंज्ञो गायत्यथो हसति रोदिति चातिमूढः ॥१॥

॥ अथ विषजमाह ॥

रक्तेक्षणो हतबलेन्द्रियभाः सुदीनः श्यावाननो विषकृतेन भवेद्विसंज्ञः ॥ १ ॥

॥ अथासाध्यलक्षणमाह ॥

अवाङ्मुखश्चोन्मुखो वा क्षीणमांसबलो नरः । जागरूको ह्यसन्देहमुन्मादेन विनश्यति ॥ १ ॥ इत्युन्मादनिदानम् ॥

॥ अथोन्मादचिकित्सा ॥

आश्वासयेत्सुहृद्वाक्यैर्भ्रूयादिष्टविनाशनम् । दर्शयेदद्भुतं कर्म ताडयेच्च कशादिभिः

---

१ (च०) वागङ्ग । २ (च०) भुङ्क्ते ।

॥१॥ सुबद्धं विजने गेहे त्रासयेदहिभिर्धिया । बद्धं सर्षपतैलाक्तं न्यसेदुत्तानमातपे ॥ २ ॥ कपिकच्छ्वाथ वा तप्तलोहतैलजलैः स्पृशेत् । वक्त्राभिधाने कूपे वा सततं च निवेशयेत् ॥३॥ सततं धूपयेच्चैनं गोमांसैश्च सपूतिभिः । कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान् ॥ ४ ॥ परस्परमतिद्वन्द्वैरेभिरेव शमं नयेत् । जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा ॥ ५ ॥ रक्षेदुन्मादिनं चैव सद्यः प्राणहरं हि यत् । यच्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम् ॥ ६ ॥ उन्मादे तच्च कर्तव्यं सामान्याद्दोषदुष्ययोः । स्नेहादिना क्रमेणादावुन्मादिनमुपाचरेत् ॥ ७ ॥ बस्तिभिः स्नेहकल्कैश्च निरूहैः स्वेदनाञ्जनैः । वातिके स्नेहपानं प्राग्विरेकः पित्तसम्भवे ॥ कफजे वमनं कार्यं परो बस्त्यादिकः क्रमः ॥ ८ ॥

॥ अथ शार्ङ्गधराद्ब्राह्म्यादिस्वरसः ॥

ब्राह्मीकूष्माण्डषड्ग्रन्थाशङ्खिनीस्वरसाः पृथक् । मधुकुष्ठयुताः पीताः सर्वोन्मादापहारिणः ॥ १ ॥

॥ अथ ब्राह्म्यादिकल्को वीरसिंहावलोकतः ॥

ब्राह्मीरसः स्यात्सवचः सकुष्ठः सशङ्खपुष्पः ससुवर्णचूर्णः । उन्मादिनामुन्मदमानसानामपस्मृतेर्भूतहतात्मनां हि ॥ नस्येऽञ्जने पानविधौ च शस्तो ब्राह्मीरसोऽयं सवचादिचूर्णः ॥ १ ॥

॥ अथ त्र्यूषणादिवर्तिः ॥

त्र्यूषणं हिङ्गुलवणं वचा कटुकरोहिणी । शिरीषनक्तमालानां बीजं श्वेताश्च सर्षपाः ॥ १ ॥ गोमूत्रपिष्टैरेतैस्तु वर्तिर्नेत्राञ्जने हिता । चातुर्थिकमपस्मारमुन्मादं च नियच्छति ॥ २ ॥

॥ अथ शिरीषादिः ॥

शिरीषं लशुनं हिङ्गु नागरं मधुकं वचा । कुष्ठं च बस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम् ॥ १ ॥ तद्वद्व्योषं हरिद्रे द्वे मञ्जिष्ठा गौरसर्षपाः । शिरीषबीजमुन्मादग्रहापस्मारनाशनम् ॥ २ ॥ इति वृन्दात् ॥

॥ अथ चिकित्सासारात् सिद्धार्थकादियोगः ॥

सिद्धार्थकवचाहिङ्गु करञ्जो देवदारु च । मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक्कटुत्रयम् ॥ १ ॥ समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम् । बस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम् ॥२॥ नस्यमालेपनं चैव स्नानमुद्वर्तनं तथा । अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहः ॥ ३ ॥ भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते । सर्पिरेतेन सिद्धं वा सगोमूत्रं तदर्थकृत् ॥ ४ ॥

---

१ (च०) पानभोजने ।

॥ अथ योगतरङ्गिण्याः सितकुसुमबलादियोगः ॥

सितकुसुमबलायाः सार्धकर्षत्रयं यः शिखरिचरणकेन क्षीरपाकेन पक्वम्। पिबति तदनु नित्यं प्रातरुत्थाय शीतं जयति झटिति घोरं व्याधिमुन्मादसंज्ञम्॥ १॥

॥ अथ योगतरङ्गिण्या दशमूलादियोगः ॥

दशमूलाम्बु सघृतं युक्तं मांसरसेन वा। ससिद्धार्थकचूर्णं वा केवलं वा नवं घृतम् ॥ १॥ उन्मादशान्तये पेयो रसो वा कालशाकजः। प्रयोज्यं सार्षपं तैलं नस्याभ्यञ्जनयोः सदा॥ २॥

॥ अथ घृतानि ॥

अथ हिङ्ग्वादिघृतम् वृन्दात्। हिङ्गुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकम्। चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनम्॥ १॥ अथ कल्याणघृतम् ॥ योगतरङ्गिण्याः। विशाला त्रिफला कौन्ती देवदार्वेलवालुकम्। स्थिरानन्ता हरिद्रे द्वे सारिवे द्वे प्रियङ्गुका॥ १॥ नीलोत्पलैलामञ्जिष्ठादन्तीदाडिमवल्कलम्। विडङ्गं पृश्नीपर्णी च कुष्ठचन्दनपद्मकैः॥ २॥ तालीसपत्रं बृहती मालत्याः कुसुमं नवम्। एतैः कर्षसमैः कल्कैर्विंशत्यष्टाभिरेव च॥ ३॥ चतुर्गुणं जलं दत्त्वा घृतप्रस्थं विपाचयेत्। अपस्मारे ज्वरे शोषे कासे मन्दानले क्षये॥ ४॥ वातरक्ते प्रतिश्याये तृतीयकचतुर्थके। वाताऽर्शोमूत्रकृच्छ्रेषु विसर्पोपहतेषु च॥ ५॥ कण्डूपाण्ड्वामयोन्मादविषमेहगदेषु च। भूतोपहतचित्तानां गद्गदानामचेतसाम्॥ ६॥ शस्तं स्त्रीणां च वन्ध्यानां धन्यमायुर्बलप्रदम्। अलक्ष्मीपापरक्षोघ्नं सर्वग्रहनिवारणम्॥ कल्याणकमिदं सर्पिः श्रेष्ठं पुंस्त्वप्रदं नृणाम्॥ ७॥ पञ्चमूली च काश्मर्यो रास्नैरण्डत्रिवृद्बला। मूर्वा शतावरी चेति क्वाथैर्द्विपलिकैः शुभैः॥ ८॥ कल्याणकस्य चाङ्गेन चैतसं नाम तद्घृतम्। सर्वचेतोविकाराणां शमनं परमं मतम्॥ ९॥ कार्यः कषायो द्विगुणः क्वाथान्मस्तुकलागुणम्। कल्याणकोक्तकल्केन पादांशेन घृतं पचेत्॥ १०॥ इति योगतरङ्गिण्यां चैतसघृतम्॥

॥ अथ रसरत्नप्रदीपादुन्मादगजकेसरी रसः ॥

सूतं गन्धं शिलातुल्यं स्वर्णबीजं विचूर्ण्य च। भावयेदुग्रगन्धायाः क्वाथे मुनिदिनैः पृथक्॥ १॥ रास्नाक्वाथेन सप्तैव भावयित्वा विचूर्णयेत्। रसः सञ्जायते नूनमुन्मादगजकेसरी॥ २॥ अस्य माषः ससर्पिष्को लीढो हन्ति हठाद्गदम्। उन्मादाख्यमपस्मारं भूतोन्मादमपि ज्वरम्॥ ३॥ इत्युन्मादगजकेसरी रसः॥ प्रसादश्चेन्द्रियार्थानां बुद्ध्यात्ममनसामपि। धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्॥ १॥

॥ अथ पथ्यापथ्यम् ॥

गोधूममुद्गारुणशालयश्च धारोष्णदुग्धं शतधौतसर्पिः। घृतं नवीनं च पुरातनं च

१ (घ० ङ०) केसरम्। २ (च०) दन्तादाना—।

कूर्मामिषं धन्वरसा रसाला ॥ १ ॥ पुराणकूष्माण्डफलं पटोलं ब्राह्मीदलं वास्तुकतण्डुलीयम् । द्राक्षा कपित्थं पनसं च वैद्यैर्विधेयमुन्मादगदेषु पथ्यम् ॥ २ ॥ मद्यं विरुद्धाशनमुष्णभोजनं निद्राक्षुधातृड्कृतवेगधारणम् । तिक्तानि तीक्ष्णानि भिषक् समादिशेदुन्मादरोगापहतेषु गर्हितम् ॥ ३ ॥ इत्युन्मादचिकित्सा ॥

॥ अथ भूतोन्मादनिदानमाह ॥

अमर्त्यवाग्विक्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादिभिर्यः । उन्मादकालो नियतश्च यस्य भूतोत्थमुन्मादमुदाहरन्ति ॥ १ ॥

॥ अथ देवजुष्टमाह ॥

सन्तुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्तन्द्रोऽत्यवितथसंस्कृताभिभाषी । तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति च देवभूतजुष्टः ॥ १ ॥

॥ अथासुरजुष्टमाह ॥

संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः । सन्तुष्टो न भवति चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः ॥ १ ॥

॥ अथ गन्धर्वजुष्टमाह ॥

हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः । नृत्यन्वै प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः ॥ १ ॥

॥ अथ यक्षग्रहजुष्टमाह ॥

ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो[1] द्रुतगतिरल्पवाक् सहिष्णुः । तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः ॥ १ ॥

॥ अथ पितृग्रहजुष्टमाह ॥

प्रेतानां स दिशति संस्तरेषु पिण्डान् शान्तात्मा[2] जलमपि चापसव्यहस्तः । मांसेष्सुस्तिलगुडपायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिजुष्टः ॥ १ ॥

॥ अथ सर्पग्रहजुष्टमाह ॥

यस्तूर्व्यां प्रसरति सर्पवत्कदाचित्सृक्किण्यौ विलिहति जिह्वया तथैव । क्रोधालुर्गुडमधुदुग्धपायसेप्सुर्विज्ञेयो भवति भुजङ्गमेन जुष्टः ॥ १ ॥

॥ अथ राक्षसजुष्टमाह ॥

मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः[3] । क्रोधान्धो विपुलबलो निशाविहारी शौचद्विट् स भवति राक्षसाभिजुष्टः ॥ १ ॥

---

१ (च०) गम्भीराद्भुत—२ (च०) भ्रान्तात्मा । ३ (च०) वस्त्रः ।

॥ अथ पिशाचजुष्टमाह ॥

उद्धस्तः कृशपरुषश्चिरप्रलापी दुर्गन्धो भृशमशुचिस्तथापि लोलः। बह्वाशी विजनवनान्तरोपसेवी व्याचेष्टन्भ्रमति रुदन्पिशाचजुष्टः ॥ १ ॥

॥ अथ तस्यासाध्यलक्षणमाह ॥

स्थूलाक्षो द्रुतमटनः स फेनवामी निद्रालुः पतति च कम्पते च योऽति। यश्चाद्रिद्विरदनगादिविच्युतः स्यात्सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे ॥ १ ॥

॥ अथ देवग्रहाणां ग्रहणकालमाह ॥

देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि। गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ ॥ १ ॥ पितरः कृष्णपक्षे स्युः पञ्चम्यामपि चोरगाः। रक्षांसि रात्रौ पैशाचाश्चतुर्दश्यां विशन्ति हि ॥ २ ॥ दर्पणादौ यथा छाया शीतोष्णं प्राणिनो यथा। स्वमणिं भास्करार्चिश्च तथा देहं च देहधृक् ॥ ३ ॥ प्रविशन्ति न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम्। प्रविश्याशु शरीरे हि पीडां कुर्वन्ति दुःसहाम् ॥ ४ ॥ तपांसि तीव्राणि तथैव दानं व्रतानि धर्मा नियमाश्च सत्यम्। गुणास्तथाष्टावपि तेषु नित्यं व्यस्ताः समस्ताश्च यथा प्रभावः ॥ ५ ॥ अष्टौ ग्रहास्तत्परिचारकाश्च ते तुल्यसत्त्वेषु वसन्ति दुष्टाः। त्रयोदशाब्दे च भवन्त्यसाध्या यथास्वभावं परिवर्तयन्ति ॥ ६ ॥ इति भूतोन्मादनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

बुद्ध्वा दोषं वयः सात्म्यं देशकालं बलाबलम्। चिकित्सितमिदं कुर्यादुन्मादे दोषभूतजे॥१॥देवर्षिपितृगन्धर्वैरुन्मत्तेषु च बुद्धिमान्। त्यजेन्नस्याञ्जनादीनि तीक्ष्णानि क्रूरकर्म च। सर्पिष्पानादिगायत्रीहोममन्त्रादिरिष्यते ॥ २ ॥ पूजाबल्युपहारशान्तिविषयो होमेष्टिमन्त्रक्रिया दानं स्वस्त्ययनं व्रतादिनियमः सत्यं जपो मङ्गलम्। प्रायश्चित्तविधानमञ्जलिरथो रत्नौषधीधारणं भूतानामधिपस्य विष्टपपतेर्गौरीपतेरर्चनम् ॥ ये च स्युर्भुवि गुह्यकाश्च प्रमथास्तेषां समाराधनं देवब्राह्मणपूजनं च शमयेदुन्मादमागन्तुकम् ॥३॥ शिरीषनक्तमालानां बीजानि मधुसर्पिषा। भक्ष्याश्च सर्वे सर्वेषां सामान्यो विधिरुच्यते ॥ ४ ॥ ऋक्षजम्बूकरोमाणि शल्लकीलशुनं तथा। हिङ्गु मूत्रं च बस्तस्य धूपमस्य प्रयोजयेत् ॥ ५ ॥ धूपेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः। शिरीषपुष्पं लशुनं शुण्ठी सिद्धार्थकं वचा ॥ ६ ॥ मञ्जिष्ठा रजनी कृष्णा बस्तमूत्रेण पेषयेत्। वटी छायाविशुष्का स्यात् सा हिता नावनाञ्जने॥७॥इति वृन्दात्। अथ माहेश्वरधूपो योगशतात्। कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिण्डीतकत्वङ्मांसीवृषदंश-

---

१ (च०) उद्धस्तः। २ (च०) परुषोऽचिरप्रलापी। ३ (च०) फेनलेही। ४ (च०) मन्त्रा।
५ (च०) शल्लकीलसमम्।

विण्नखवचाकेशाहिनिर्मोचनैः । नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैस्तुल्यैस्तु धूपः कृतः स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः ॥ १ ॥

॥ अथ महापैशाचघृतम् । योगतरङ्गिण्याः ॥

जटिला पूतना केशी मर्कटी चारटी वचा । त्रायमाणा जया वीरा चोरकं कटुरोहिणी॥१॥कायस्था शूकरी छत्रा सातिच्छत्रा पलङ्कषा । महापुरुषदन्ता च वयस्था नाकुलीद्वयम् ॥ २ ॥ कटम्भरा वृश्चिकाली स्थिरा चैतैर्घृतं पचेत् । तत्तु चातुर्थिकोन्मादग्रहापस्मारनाशनम् ॥ ३ ॥ महापैशाचकं नाम घृतमेतद्यथामृतम् । बुद्धिमेधास्मृतिकरं बालानां चाङ्गवर्धनम् ॥ ४ ॥ इति महापैशाचघृतम् ॥ कल्याणकं प्रयुञ्जीत महद्वा चैतसं घृतम् । तैलं नारायणं वापि महानारायणं तथा ॥ १ ॥अथ रसरत्नप्रदीपाद्भूतभैरवरसः ॥ रसः सतालः सशिलः सलोहः स्रोतोऽञ्जनं सार्कमिदं हि गन्धम् । पिष्टं नृमूत्रेण समं समन्ताद्देयो· द्विभागोऽथ बलिः पचेच्च ॥ १ ॥ लीढे क्षणं हन्ति घृतेन माषोऽपस्मारमप्युन्मदमानसत्वम् । पिबेदनुत्र्यूषणहिङ्गुयुक्तं सर्पिर्नृमूत्रं रुचकेन सार्धम् ॥ २ ॥ भूतोन्मादेषु सर्वेषु रसोऽयं भूतभैरवः । स्वर्णजैः पञ्चभिर्बीजैर्देयः सर्पिर्विमिश्रितः ॥ ३ ॥ इति भूतभैरवः । इति भूतोन्मादचिकित्सा ॥

॥ अथापस्मारनिदानमाह ॥

चिन्ताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः । कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते ॥ १ ॥

॥ अथ सामान्येन तल्लक्षणमाह ॥

तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतिः । अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः[1] ॥ वातपित्तकफैः सर्वैर्दोषैः स स्याच्चतुर्विधः ॥ १ ॥

॥ अथ तस्य पूर्वरूपमाह ॥

हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता । निद्रानाशश्च तस्मिंस्तु भविष्यति भवन्त्यथ ॥ १ ॥

॥ अथ वातिकमाह ॥

कम्पते प्रदशेद्दन्तान्फेनोद्वामी श्वसित्यपि । परुषारुणकृष्णानि पश्येद्रूपाणि चानिलात् ॥ १ ॥

॥ अथ पैत्तिकमाह ॥

पीतफेनाङ्गवक्त्राक्षः पीतासृग्रूपदर्शनः । स तृष्णोष्णानिलव्याप्त[2]लोकदर्शी च पैत्तिकः ॥

---

१ (ख०) हेतुचतुष्टयात् । २ (क०) व्याप्तम् ।

॥ अथ श्लैष्मिकमाह ॥

शुक्लफेनाङ्गवक्त्राक्षः शीतो हृष्टाङ्गजो गुरुः । पश्येद्रूपाणि शुक्लानि श्लैष्मिको मुच्यते चिरात् ॥ १ ॥

॥ अथ सान्निपातिकमाह ॥

सर्वैरेभिः समस्तैश्च लिङ्गैर्ज्ञेयस्त्रिदोषजः । अपस्मारः स चासाध्यो यः क्षीणश्चानवश्च यः ॥ १ ॥

॥ अथासाध्यमाह ॥

प्रस्फुरन्तं स बहुशः क्षीणं प्रचलितभ्रुवम् । नेत्राभ्यां च विकुर्वाणमपस्मारो विनाशयेत् ॥ १ ॥

॥ अथ कालनियममाह ॥

पक्षाद्वापि दशाहाद्वा मासाद्वा कुपिता मलाः । अपस्माराय कुर्वन्ति वेगं किञ्चिदथोत्तरम् ॥ १ ॥ देवे वर्षत्यपि यथा भूमौ बीजानि कानि चित् । शरदि प्रविरोहन्ति तथा रोगसमुद्भवः ॥ २ ॥ इत्यपस्मारनिदानम् ॥

॥ अथापस्मारचिकित्सा ॥

पूर्वं युञ्ज्यादपस्मारे छर्दनादीनि बुद्धिमान् । वातिकं बस्तिभिः प्रायः पैत्तिकं च विरेचनैः ॥ कफजं वमनप्रायैरपस्मारमुपाचरेत् ॥ १ ॥

॥ अथ करञ्जादियोगः ॥

करञ्जदारुसिद्धार्थकटभीरामठं वचा । समङ्गा त्रिफला व्योषं प्रियङ्गुश्च समांशकः ॥ १ ॥ बस्तमूत्रेण सम्पिष्य नस्यपानाञ्जनादिषु । योज्यो योगोऽयमुन्मादेऽपस्मारे भूतरोगिषु ॥ २ ॥

॥ अथ योगतो निर्गुण्ड्यादिनावनम् ॥

निर्गुण्डीभववन्दाकनावनस्योपयोगतः । उपैति सहसा नाशमपस्मारो न संशयः ॥ १ ॥

॥ अथ यष्ट्याह्वादिनावनाञ्जने चिकित्सासारात् ॥

यष्टीहिङ्गुवचावज्रीशिरीषलशुनामयैः । साजमूत्रैरपस्मारे सोन्मादे नावनाञ्जने ॥ १ ॥

॥ अथ चिकित्सारादञ्जनधूपने ॥

पुष्पोद्धृतं शुनः पित्तमपस्मारघ्नमञ्जनम् । तदेव सर्पिषा युक्तं धूपनं परमं हितम् ॥ १ ॥ अथ मनोह्वाद्यञ्जनम् ॥ मनोह्वातार्क्ष्यकं चैव शकृत्पारावतस्य च । अञ्जनं हन्त्यपस्मारमुन्मादं च विशेषतः ॥ १ ॥ अथ श्वशृगालादि । वृन्दात् ।

---

१ (च०) क्षीणस्या- । २ (च०) पुष्योद्धृतम् ।

श्वशृगालविडालानां कपिलानां गवामपि । पित्तानि नस्यतो हन्युरपस्मारं पृथक् पृथक् ॥ १ ॥ अथ त्रपुसीनस्यम् ॥ अरण्यत्रपुसीचूर्णं नस्येनापस्मृतिं जयेत् ॥ १ ॥

॥ अथ मधुवचायोगः ॥

यः खादेत्क्षीरभक्ताशी माक्षिकेण वचारजः । अपस्मारं महाघोरं सुचिरोत्थं जयेद्ध्रुवम् ॥ १ ॥

॥ अथ मुस्तकमूलयोगः ॥

उत्तरदिग्गतमुस्तकमूलं बुद्ध्वा समुद्धृतं पुष्ये । पीतं पयसा हन्यादपस्मृतिं गोः सवर्णवत्सायाः ॥ १ ॥

॥ अथ योगतः कूष्माण्डादिः ॥

कूष्माण्डकगिरोत्थेन रसेन परिपेषितम् । अपस्मारविनाशाय यष्ट्याह्वं स पिबेत्र्यहम् ॥ १ ॥

॥ अथ घृतानि ॥

अथ चिकित्सासाराद्रसायनभैरवः ॥ वचामृतत्र्योषमधूकसाररुद्राक्षसिन्धूद्भवबार्हतानि । फलं समुद्रस्य रसोनकल्कं ध्मातं हि नासापुटमध्यदेशे ॥ १ ॥ अपस्मृतिश्लेष्ममरुच्छिरोरुक्प्रलापतन्द्राभ्रमजाड्यमोहान् । स संनिपातं श्रुतिकाक्षिभङ्गान् सपीनसं हन्ति हलीमकं च ॥ २ ॥ रसायनं भैरवनामधेयं ज्ञातं विचारात् कविविठ्ठलेन ॥ ३ ॥ अथ ब्राह्मीघृतम् ॥ ब्राह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेव च । पक्वं पुरातनं सर्पिरपस्मारहरं ध्रुवम् ॥ १ ॥ अथ सैन्धवाद्यं घृतम् ॥ घृतसैन्धवहिङ्गुभ्यः कर्षैर्वा तच्चतुर्गुणैः । मूत्रैः सिद्धमपस्मारहृद्ग्रहग्रामनाशनम् ॥ १ ॥ अथ स्वल्पपञ्चगव्यघृतम् ॥ गोशकृद्रसदध्यम्लक्षीरमूत्रैः समं घृतम् । सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ॥ १ ॥ अथ वृन्दात् कूष्माण्डादि घृतम् ॥ कूष्माण्डकरसे सर्पिरष्टादशगुणे पचेत् । यष्ट्याह्वकल्के तत्सिद्धमपस्मारहरं परम् ॥ १ ॥

॥ अथ तैलचूर्णानि ॥

अथ योगत० कटभ्यादितैलम् ॥ कटभीनिम्बकट्वङ्गमधुशिग्रुत्वचारसे । सिद्धं मूत्रयुतं तैलं लेपाद्धन्यादपस्मृतिम् ॥१॥ अथ वृन्दात् सार्षपं तैलम् ॥ अभ्यङ्गे सार्षपं तैलं बस्तमूत्रे चतुर्गुणे । सिद्धं स्याद्गोशकृन्मूत्रे स्नानाच्छादनमेव च ॥ १ ॥ अथ धूपनम् । नकुलोलूकमार्जारगृध्रकीटाहिकाकजैः । तुण्डैः पक्षैः पुरीषैश्च धूपनं कारयेद्भिषक् ॥१॥ दुश्चिकित्स्यो ह्यपस्मारश्चिरकारी महागदः । तस्माद्रसायनैरेतैः प्रायशः समुपाचरेत् ॥ २ ॥ हृत्कम्पोऽक्षिरुजा यस्य स्वेदो हस्तादिशीतता । दशमूलीजलं तस्य कल्याणाज्यं च योजयेत् ॥ ३ ॥ अथ कल्याणकं चूर्णम् ॥ पञ्चकोलं समरिचं

१ (च०) बुद्ध्या । २ (च०) स्नानोद्वर्तनमेव च ।

त्रिफला बिडसैन्धवम् । कृष्णाविडङ्गपूतीकयवानीधान्यजीरकम् ॥ १ ॥ पीतमुष्णाम्बुना चूर्णं वातश्लेष्मामयापहम् । अपस्मारे तथोन्मादे दुर्नामग्रहणीगदे । एतत्कल्याणकं चूर्णं नष्टस्याग्नेश्च दीपनम् ॥ २ ॥ इति कल्याणकं चूर्णम् ॥

॥ अथ जलमृतलक्षणम् ॥

विष्टब्धपायुमूर्धाक्षं शीतपादकरोदरम् । विद्याज्जलमृतं जन्तुं शूनपक्वाभिमेहनम् ॥ १ ॥

॥ अथ रसरत्नप्रदीपात्स्मृतिसागररसः ॥

रसगन्धकतालानां सशिलाताम्रभस्मनाम् । शुद्धानां मूर्च्छितानां च चूर्णं भाव्यं वचाशृतैः ॥ १ ॥ एकविंशतिधा पश्चाद्ब्राह्मी वारा तथैव च । कटभीबीजतैलेन भावयेदेकवारकम् ॥ २ ॥ स्मृतिसागरनामायं रसोऽपस्मारनाशनः । सर्पिषा माषमात्रोऽयं भुक्तो हन्यादपस्मृतिम् ॥ ३ ॥ इति स्मृतिसागररसः । उन्मादोक्तो विधिः सर्वो ह्यपस्मारे प्रयुज्यते ॥ ४ ॥

॥ अथ पथ्यापथ्यम् ॥

लोहिताः शालयो मुद्गा गोधूमाः प्रतंतं[1] हविः । कूर्मामिषं धन्वरसा दुग्धं ब्राह्मीदलं वचा ॥ १ ॥ पटोलं वृद्धकूष्माण्डं वास्तुकं स्वादु दाडिमम् । सौभाञ्जनं पयः पेटी द्राक्षा धात्री परूषकम् । अपस्मारगदे नृणां पथ्यमेतदुदीरितम् ॥ २ ॥ मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णं गुरुभोजनम् । अतिव्यवायमायासं पूज्यपूजाव्यतिक्रमम् ॥ ३ ॥ पत्रशाकानि सर्वाणि त्रिम्बीमाषाढकं फलम् । तृषानिद्राक्षुधावेगानपस्मारी नरस्त्यजेत् ॥ ४ ॥ इत्यपस्मारचिकित्सा ।

॥ अथ वातरोगनिदानं व्याख्यास्यामः ॥

पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥ १ ॥

॥ अथ सम्प्राप्तिपूर्वकनिदानमाह ॥

शक्त्यानुप्रासशक्त्याथ ज्वरादौ प्रतिपद्यते । सर्वव्याधिनिदानं वा वातव्याधिनिरूपणम् ॥ १ ॥ रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः । विषमादुपचाराच्च दोषासृक्स्रावणादपि ॥ २ ॥ लङ्घनप्लवनात्यध्वव्यायामातिविचेष्टितैः । धातूनां संक्षयाच्चिन्ताशोकरोगातिकर्षणात् ॥ ३ ॥ वेगसन्धारणादामादभिघातादभोजनात् । मर्मघाताद्गजोष्ट्राश्वशीघ्रयानापसर्पणात् ॥ ४ ॥ एतैः कारणैर्व्याधीन् करोतीत्याह ॥ देहे स्रोतांसि रिक्तानि[2] पूरयित्वानिलो बली । करोति विविधान्व्याधीन्सर्वाङ्गैकाङ्गसंश्रयान् ॥ अव्यक्तं लक्षणं तेषां पूर्वरूपमिदं स्मृतम् ॥ ५ ॥

---

१ (च०) प्रतनम् । २ (च०) रक्तानि ।

॥ अथ तदेव व्यक्तरूपमाह ॥

आत्मरूपं तु तद्व्यक्तमपाये लघुता पुनः। सङ्कोचः पर्वणां स्तम्भो भङ्गोऽस्थ्नां पर्वणामपि ॥ लोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः ॥ १ ॥ खाञ्ज्यं पाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रता। गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता॥ २॥ शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम्। भेदस्तोदार्तिराक्षेपो मोहश्चायास एव च॥ ३ ॥ एवंविधानि रूपाणि करोति कुपितोऽनिलः। हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत् ॥ ४ ॥

॥ अथ स्थानविशेषमाह ॥

वायुरामाशये क्रुद्धश्छर्द्यादीन् कुरुते सदा। तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः ॥ वर्ध्मत्दद्रोगगुल्मार्शः पार्श्वशूलं च मारुते ॥ १ ॥

॥ अथ सर्वाङ्गकुपितलक्षणमाह ॥

सर्वाङ्गकुपिते वाते गात्रस्फुरणभञ्जनम्। वेदनाभिः परीतस्य स्फुटन्तीवास्य सन्धयः ॥ १ ॥

॥ अथ पक्वाशयकुपितस्य लक्षणमाह ॥

ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः। जङ्घोरुत्रिकपार्श्वेषु रुक् शोफश्च गुदस्थिते ॥ १ ॥

॥ अथामाशयकुपितमाह ॥

रुक् पार्श्वोदरहृन्नाभी तृष्णोद्गारविषूचिकाः। कासः कण्ठास्यशोषश्च छर्दिश्चामाशये स्थिते ॥ १ ॥

॥ अथ पक्वाशयगतलक्षणमाह ॥

पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च। कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम् ॥ १ ॥

॥ अथ श्रोत्रादिगतलक्षणमाह ॥

श्रोत्रादिष्विन्द्रियवधं कुर्यात्क्रुद्धः समीरणः ॥ १ ॥ अथ धातुकुपितलक्षणम्। तत्र रसकुपितलक्षणमाह ॥ त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते। आतन्यते सरागा च पर्वरुक् त्वग्गतेऽनिले ॥ १ ॥ अश्रद्धा गौरवालस्यं ज्वरो रसगतेऽनिले। रुजस्तीव्राः ससन्तापा वैवर्ण्यं कृशतारुचिः ॥ गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले ॥३॥ अथ मांसमेदोगतमाह ॥ सर्वाङ्गं तुद्यते दण्डस्तब्धमुष्टिहतं तथा। सरुक् स्तिमितमत्यर्थं मांसमेदोगते ऽनिले ॥ १ ॥ अथ मज्जाकुपितमाह ॥ भेदोऽ-

---

१ (च०) जृम्भणम्। २ (च०) हृत्पृष्ठ। ३ (च०) श्वास। ४ (च०) स्तब्धं दण्डमुष्टिहतं यथा।

स्थिपर्वणां सन्धिशूलं मांसबलक्षयः। अस्वप्नः सतता रुक्च मज्जास्थिकुपितेऽनिले ॥ १ ॥ अथ शुक्रगतमाह ॥ क्षिप्रं मुञ्चति बध्नाति गर्भं शुक्रमथापि वा। विकृतिं जनयेद्वापि शुक्रस्थः कुपितोऽनिलः ॥ १ ॥ अथ शिरागतमाह ॥ कुर्याच्छिरागतः शूलं शिराकुञ्चनपूरणम्। बाह्याभ्यन्तरमायामं खल्लीं कुब्जत्वमेव च ॥ १ ॥ अथ स्नायुगतमाह ॥ सर्वाङ्गैकाङ्गरोगांश्च कुर्यात्स्नायुगतोऽनिलः ॥ १ ॥ अथ सन्धिगतमाह ॥ हन्ति सन्धिगतः सन्धीञ्छूलशोफौ करोति च। प्राणोदानौ समानश्च व्यानश्चापान एव च ॥ १ ॥ स्थानस्था मारुताः पञ्च व्यापयन्ति शरीरिणाम्। हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ॥ २ ॥ उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः। प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते ॥ ३ ॥ दौर्बल्यं सदनं तन्द्रा वैरस्यं च कफावृते। उदाने पित्तयुक्ते तु दाहो मूर्च्छा भ्रमः क्लमः ॥ ४ ॥ अस्वेदहर्षौ मन्दाग्निः शीतता च कफावृते। स्वेददाहौष्ण्यमूर्च्छाः स्युः समाने पित्तसंयुते ॥ ५ ॥ कफेन सङ्गो विण्मूत्रे गात्रहर्षश्च जायते। अपाने पित्तसंयुक्ते दाहौष्ण्यं रक्तमूत्रता ॥ ६ ॥ अधः काये गुरुत्वं च शीतता च कफावृते। व्याने पित्तावृते दाहो गात्रविक्षेपणं क्लमः ॥ ७ ॥ स्तम्भनो दण्डकश्चापि शोफशूलौ कफावृते। गुरूणि सर्वगात्राणि स्तम्भनं चास्थिपर्वणाम् ॥ लिङ्गं कफावृते व्याने चेष्टास्तम्भस्तथैव च ॥ ८ ॥

॥ अथाक्षेपकादिरोगलक्षणान्याह ॥

यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः। तदा क्षिपत्याशुमुहुर्मुहुर्देहं बहिश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः ॥ १ ॥ क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं मपद्यते। पीडयन्हृदयं गत्वा शिरः शङ्खौ च पीडयेत् ॥ २ ॥ धनुर्वन्नामयेद् गात्राण्याक्षिपेन्मोहयेत्ततः। अथास्यैवावस्थाविशेषावपतन्त्रकापतानकावाह। स कृच्छ्राद्रुच्छ्वसित्युच्चैः स्तब्धाक्षोऽथ निमीलकः। कपोत इव कूजेच्च विसंज्ञः सोऽपतन्त्रकः ॥ १ ॥ दृष्टिं संस्तभ्य संज्ञां च हत्वा कण्ठेन कूजति। हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ॥२॥ मर्माश्रितं व्रणं प्राप्य वायुवत्सर्वदेहगः। तेन गौरो भवेद्देहः प्राणघ्नमपि तं त्यजेत् ॥ वायुना दारुणं प्राहुरेके तमपतानकम् ॥३॥ अथ तेषां लक्षणमाह। तत्र दण्डापतानकमाह। कफान्वितो भृशं वायुस्तास्वेव यदि तिष्ठति। दण्डवत् स्तम्भयेद्देहं स तु दण्डापतानकः ॥ १ ॥ धनुस्तुल्यं नमेद्यस्तु स धनुस्तम्भसंज्ञकः। विवर्णबद्धवदनः स्रस्ताङ्गो नष्टचेतनः ॥ प्रस्विद्यंश्च धनुस्तम्भी दशरात्रं न जीवति ॥२॥ अथाभ्यन्तरायामस्य साधारणं रूपमाह ॥ अङ्गुलीगुल्फजठरहृद्वक्षोगलसंश्रितः। स्नायुप्रतानमनिलो यदा क्षिपति वेगवान् ॥ १ ॥ विष्टब्धाक्षः स्तब्धहनुर्भग्नपार्श्वः कफं वमन्। अभ्यन्तरं धनुरिव यदा नमति मानवः ॥ तदा सोऽभ्यन्तरायामं कुरुते मारुतो बली ॥२॥ अथ बहिरायामलक्षणम् ॥ बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च। तमसाध्यं बुधाः प्राहुर्वक्षःकट्यूरुभञ्जनम् ॥ १ ॥ अथ

निमित्तभेदेन चतुर्थाक्षेपमाह॥ कफपित्तान्वितो वायुर्वायुरेव च केवलः। कुर्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम् ॥ १ ॥ अथासाध्यमाह । गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः। अभिघातनिमित्तश्च न सिध्यत्यपतानकः ॥ १ ॥ अथ पक्षवधमाह॥ गृहीत्वार्धं तनोर्वायुः शिरः स्नायूर्विशोष्य च। पक्षमन्यतरं हन्ति सन्धिबन्धान् विमोक्षयन् ॥ १ ॥ कृत्स्नोऽर्धकायस्तस्य स्यादकर्मण्यो विचेतनः। एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः ॥ २ ॥ अथ तस्यैव सर्वाङ्गवधमाह॥ सर्वाङ्गरोगं तद्वच्च सर्वकायाश्रितेऽनिले। दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ॥ १ ॥ शैत्यशोफगुरुत्वानि तस्मिन्नेव कफावृते। शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ॥ २ ॥ साध्यमन्येनसंयुक्तमसाध्यं क्षयहेतुकम् । गुर्विणीसूतिकाबालवृद्धक्षीणेष्वसृक्क्षयात् ॥ पक्षाघातं परिहरेद्वेदनारहितं च यत् ॥ ३ ॥ अथार्दितलक्षणमाह॥ उच्चैर्व्याहरतोऽत्यर्थं खादतः कठिनानि च । हसतो जृम्भतो भाराद्विषमाच्छयनासनात् ॥१॥ शिरोनासौष्ठचुबुकललाटेक्षणसन्धिषु। अर्दयत्यनिलो वक्त्रमर्दितं जनयेत्ततः ॥२॥ अभिघातादिवास्वापाज्जिह्वानिर्लेखनात्पुनः । व्रणपाकात्कराघश्च शिराव्यधनतस्तथा ॥ ३ ॥ मर्मसंछेदनान्नेत्रकर्णनासाविकर्षणात् । तीक्ष्णमद्यासवापानाद्धारणाद्वेगनिग्रहात् ॥४॥ वर्तमानोऽनिलस्तेषु वक्त्रं मर्दयति ध्रुवम् । वक्रीभवति वक्त्रार्धं ग्रीवा चाप्यपवर्धते ॥५॥ शिरश्चलति वाक्सङ्गो नेत्रादीनां च वैकृतम्। ग्रीवाचुबुकदन्तानां तस्मिन्पार्श्वे च वेदना ॥६॥ तस्याग्रजो रोमहर्षो वेपथुर्नेत्रमाविलम्। वायुरूर्ध्वं त्वचि स्वप्नं तोदं मन्याहनुग्रहौ ॥७॥ तमर्दितमिति प्राहुर्व्याधिं व्याधिविशारदाः। वातात्पित्तात्कफाच्चैव त्रिधा स स्यात्समासतः ॥८॥ लालातिप्रस्रवः कम्पः स्फुरणं हनुसङ्ग्रहः। ओष्ठयोः श्वयथुः शूलमर्दिते वातजे भवेत् ॥९॥ पीतमास्यं ज्वरस्तृष्णा पित्ते मूर्च्छा च धूपनम्। गण्डे शिरसि मन्यायां शोफः स्तम्भः कफोद्भवे ॥ १० ॥ अथ तस्यासाध्यलक्षणमाह॥ क्षीणस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः । न सिध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य च ॥ गते वेगे भवेत्स्वास्थ्यं सर्वेष्वाक्षेपकादिषु ॥ १ ॥ अथ हनुस्तम्भमाह॥ जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः । कुपितो हनुमूलस्थः स स्रंसित्वानिलो हनुम् ॥ १ ॥ करोति विवृतास्यत्वमथवा संवृतास्यताम्। हनुग्रहः स तेन स्यात्कृच्छ्राच्चर्वणभाषणम् । हनुग्रहे पूर्वरूपं हनुस्तम्भश्च वेपथुः ॥२॥ अथ मन्यास्तम्भमाह॥ दिवास्वप्नासनस्थानविकृतोऽपनिरीक्षणैः। मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणा वृतः ॥ १ ॥ अथ जिह्वास्तम्भमाह ॥ वाग्वाहिनीशिरासंस्थो जिह्वां स्तम्भयतेऽनिलः। जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता ॥१॥ हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् । क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत् ॥ २ ॥ अथ शिराग्रहमाह। रक्तमाश्रित्य पवनः कुर्यान्मूर्धधराः शिराः। रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः ॥१॥ अथ गृध्रसीमाह॥ स्फिक्पूर्वं कटिपृष्ठोरुजानुजङ्घापदं क्रमात्। गृध्रसीस्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः ॥ १ ॥ वाताद्वातकफाभ्यां वा विज्ञेया सा द्विधा पुनः। वातजायां भवेत्तोदो देहस्यापि प्रवक्रता ॥ २ ॥ जानुकट्यूरुसन्धीनां

स्फुरणं सुप्तता भृशम्। वातश्लेष्मोद्भवायां तु स्तैमित्यं वह्निमार्दवम् ॥ ३ ॥ तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च। वाताद्वातकफात्तन्द्रा गौरवारोचकान्विता ॥ ४ ॥ ॥ अथ विश्वाचीमाह ॥ तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः। बाह्वोः कर्मक्षयकरी विश्वाचीति हि सोच्यते ॥ १ ॥ अथ क्रोष्टुशीर्षमाह ॥ वातशोणितजः शोथो जानुमध्ये महारुजः। ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत् ॥१॥ अथ खञ्जपङ्ग्वोर्लक्षणमाह ॥ वायुः सक्थ्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा। खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥ १ ॥ अथ कलायखञ्जमाह ॥ प्रक्रामन्वेपते यस्तु खञ्जन्निव च गच्छति। कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् ॥ १ ॥ अथ वातकण्टकमाह ॥ रुक्पादे विषमे न्यस्ते श्रमाद्वा जायते यदा। वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम् ॥ १ ॥ न्यस्ते तु विषमे पादे रुजः कुर्यात्समीरणः। पादकण्टक इत्येष विज्ञेयस्तलकाश्रितः ॥ २ ॥ अथ पाददाहमाह ॥ पादयोः कुरुते दाहं पित्तासृक्सहितोऽनिलः। विशेषतश्चङ्क्रमणात्पाददाहं तमादिशेत् ॥ १ ॥ अथ पादहर्षमाह ॥ हृष्यतश्चरणौ यस्य भवतस्तु प्रसुप्तवत्। पादहर्षः स विज्ञेयः कफवातप्रकोपजः ॥ १ ॥ अथांसशोषमाह ॥ अंसदेशे स्थितो वायुः शोषयित्वांसबन्धनम् ॥ अथावबाहुकमाह ॥ शिराश्चाकुञ्च्य तत्रस्थो जनयत्यवबाहुकम् ॥ १ ॥ अथ मूकमिम्मिनगद्गदानाह ॥ आवृत्य सकफो वायुर्धमनीः शब्दवाहिनीः। नरान्करोत्यक्रियकान्मूकमिम्मिनगद्गदान् ॥ १ ॥ अथोर्ध्ववातमाह ॥ अधः प्रतिहतो वायुः श्लेष्मणा मारुतेन वा। करोति भृशमुद्गारमूर्ध्ववातः स उच्यते ॥ १ ॥ अथ तूनीलक्षणमाह ॥ अधो या वेदना याति वर्चोमूत्राशयोत्थिता। भिनत्तीव गुदोपस्थं सा तूनी नाम नामतः ॥१॥ अथ प्रतूनीमाह ॥ गुदोपस्थस्थिता सैव प्रतिलोमं प्रधावति। वेगैः पक्वाशये याति प्रतूनीति हि सोच्यते ॥ १ ॥ अथ बाधिर्यमाह ॥ यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति। शुद्धः श्लेष्मान्वितो वापि बाधिर्यं तेन जायते ॥१॥ अथाध्मानलक्षणमाह ॥ साटोपमत्युग्ररुजमाध्मातमुदरं भृशम्। आध्मानमिति जानीयाद् घोरं वातनिरोधजम् ॥ १ ॥ अथामाशयसम्भवात्प्रत्याध्मानमाह। विमुक्तपार्श्वहृदयं तदेवामाशये स्थितम्। प्रत्याध्मानं विजानीयात् कफव्याकुलितानिलम् ॥ २ ॥ अथाष्ठीलामाह ॥ नाभेरधस्तात्संजातः संचारी यदि वाचलः। अष्ठीलावद्घनो ग्रन्थिरूर्ध्वमायत उन्नतः ॥ १ ॥ अथ वाताष्ठीलामाह ॥ विण्मूत्रानिलसङ्गश्च तत्राध्मानं च जायते। वाताष्ठीलां विजानीयाद्बहिर्मार्गनिरोधिनीम् ॥ १ ॥ अथ प्रत्यष्ठीलामाह ॥ एतामेव रुजोपेतां वातविण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थिताम् ॥ १ ॥ अथ वातविकृतिं मूत्ररोधिनीमाह ॥ मारुतेऽनुगुणे बस्तौ मूत्रं सम्यक्प्रवर्तते। विकारा विविधाश्चापि प्रतिलोमे भवन्ति हि ॥ १ ॥ अथ सर्वाङ्गकम्पवातमाह ॥ सर्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः ॥ १ ॥ अथ खल्लीमाह ॥ खल्ली तु पादजङ्घोरुकरमूलावमोटिनी ॥ १ ॥

॥ अथानुक्तवातरोगसङ्ग्रहार्थमाह ॥

स्थानानामनुरूपैश्च लिङ्गैः शेषान्विनिर्दिशेत् । सर्वेषु तेषु संसर्गं पित्ताद्यैरुपलक्षयेत् ॥ १ ॥ हिमन्तीव च गात्राणि रोमाञ्चाद्दूधुरितानि च । शिरोऽक्षिवेदनालस्यं शीतवातस्य लक्षणम् ॥ २ ॥ अङ्गेषु तोदनं प्रायो दाहः स्पर्शं न विन्दति । मण्डलानि च दृश्यन्ते स्पर्शवातस्य लक्षणम् ॥ ३ ॥ पादयोश्च भवेद्दाहः त्वक्स्फोटः श्वयथुः क्लमः । रक्तस्रावः स्पन्दनं च रक्तवातस्य लक्षणम् ॥ ४ ॥ हनुशङ्खशिरोग्रीवं यो भिनत्ति तु चानिलः । कर्णयोः कुरुते शूलं कर्णशूलः स उच्यते ॥ ५ ॥

॥ अथ साध्यासाध्यमाह ॥

हनुस्तम्भार्दिताक्षेपपक्षाघातापतानकाः । कालेन महता वाता यत्नात्सिध्यन्ति वा न वा ॥ १ ॥ नवान्बलवतश्चैतान्साधयेन्निरुपद्रवान् । विसर्पदाहरुक्सङ्गमूर्च्छारुच्यग्निमार्दवैः ॥ क्षीणमांसबलं वाताः घ्नन्ति पक्षवधादयः॥२॥शूनं सुप्तत्वचं भुग्नं कम्पाध्मानिपीडितम् । नरं रुजार्तिमन्तं च वातव्याधिर्विनाशयेत् ॥३॥ अव्याहतगतिर्यस्य स्थानस्थः प्रकृतौ स्थितः । वायुः स्यात्सोऽधिकं जीवेद्वीतरोगः समाः शतम् ॥ ४ ॥ इति वातव्याधिनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

अभ्यङ्गं स्वेदनं बस्तिर्नस्यं स्नेहविरेचनम् । स्निग्धाम्ललवणं स्वादु वृष्यं वातामयापहम् ॥ १ ॥ स्वाद्वम्ललवणैः स्निग्धैराहारैर्वातरोगिणः । अभ्यङ्गस्नेहबस्त्याद्यैः सर्वानेवोपपादयेत् ॥ २ ॥ पित्तस्यावरणे वातरोगे शीतोष्णभेषजम् । कफस्यावरणे वायौ रूक्षोष्णं भक्ष्यभेषजम् ॥ ३ ॥ केवले पवनव्याधौ स्निग्धोष्णं भक्ष्यभेषजम् । स्निग्धोष्णशीतरूक्षाद्यैर्वातजो यो न शाम्यति ॥ विकारस्तत्र विज्ञेयो दुष्टशोणितसम्भवः ॥ ४ ॥ अथ वस्तिगते वाते ॥ कार्यो वस्तिगते वाते विधिर्बस्तिविशोधनः । विशेषतस्तु कोष्ठस्थे वाते क्षीरं पिबेन्नरः ॥ १ ॥ व्योषसौवर्चलाजाजीपथ्यालवणपञ्चकम् । सारिवाबृहतीपाठाकलिङ्गाग्नियवाग्रजम् ॥ २ ॥ चूर्णीकृतं दधिसुरातन्मण्डोष्णाम्बुकाञ्जिकैः । पिबेदग्निविवृद्ध्यर्थं कोष्ठवातहरं परम् ॥ ३ ॥ अथ गुदाश्रिते ॥ दशमूलीकषायेण मातुलिङ्गरसेन वा । पिबेदैरण्डतैलं च बस्तिकुक्षिगुदाश्रिते ॥ १ ॥ अथामाशयगते ॥ आमाशयगते वाते छर्दिस्वापौ यथाक्रमम् । देयः षड्‍धरणो योगः सप्तरात्रं तथाम्बुना ॥ १ ॥ चित्रकेन्द्रयवापाठाकटुकातिविषाभयाः । महाव्याधिप्रशमनो योगः षड्‍धरणः स्मृतः ॥ २ ॥ अन्यच्च । पूतीकपथ्याशटिपुष्कराणि बिल्वं गुडूची सुरदारु शुण्ठी । विडङ्गपाठातिविषा कणा च क्वाथास्त्रयः सामसमीरणघ्नाः ॥ १ ॥ कार्पासास्थिकुलत्थिकातिलयवैरेरण्डमाषातसीवर्षाभूशणबीजकाञ्जिकयुतैरेकीकृतैर्वा पृथक् । स्वेदः स्यादिति कूर्परोदरहनुस्फिक्पाणिपादाङ्गुलीगुल्फस्तम्भकटीरुजो विजयते सामः समीरोद्भवः ॥ २ ॥ अथ पक्वाशये ॥ पक्वाश-

१ (च०) भग्नम् ।

यगते वाते हितं स्नेहैर्विरेचनम् । बस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ॥ १ ॥ ॥ अथ श्रोत्रादिषु ॥ श्रोत्रादिषु प्रकुपिते कार्यो वातहरः क्रमः । स्नेहाभ्यङ्गोपनाहांश्च मर्दनालेपनानि च ॥ १ ॥ अथ त्वङ्मांसासृक्शिरागते ॥ त्वङ्मांसासृक्शिराप्राप्ते कुर्याद्रक्तविमोक्षणम् । स्नेहोपनाहाग्निकर्मबन्धनोन्मर्दनानि च ॥ १ ॥ अथ मांसमेदोमज्जास्थिकुपिते ॥ विरेको मांसमेदःस्थे निरूहः शमनानि च । बाह्याभ्यन्तरगस्नेहैरस्थिमज्जागतं जयेत् ॥ १ ॥ अथ स्नायुसन्ध्यस्थिगते ॥ स्नायुसन्ध्यस्थिसम्प्राप्ते कुर्याद्वाते विचक्षणः । स्वेदोपनाहसंमर्दस्नेहनादिकमादरात् ॥ १ ॥ अथ शुक्रस्थे कुपिते ॥ शुक्रप्राप्तेऽनिले कार्यं शुक्रदोषचिकित्सितम् ॥ १ ॥ अथ वक्षआदिमन्यागते ॥ वक्षस्त्रिकस्कन्धगते वाते मन्यागते तथा । वमनं मर्दनं नस्यं कुशलेन प्रयोजयेत् ॥ १ ॥ अथाशीतिवातजरोगाणां संक्षेपेण चिकित्सा ॥ अथ पक्षाघातस्य ॥ माषात्मगुप्तकैरण्डवाट्यालकशृतं जलम् । हिङ्गुसैन्धवसंयुक्तं पक्षाघातनिवारणम् ॥ १ ॥ इति माषादिक्वाथः ॥ अथ वृन्दात् माषादिसप्तकम् ॥ माषबलाशूकशिम्बीकत्तृणरास्नाश्वगन्धारुबुकाणाम् । क्वाथः प्रातः पीतो रामठलवणान्वितः कोष्णः ॥ १ ॥ अपनयति पक्षघातं मन्यास्तम्भं सकर्णनादरुजम् । दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्यम् ॥ २ ॥ अथ माषतैलम् सारसंग्रहात् । ग्रन्थिकाग्निकणारास्नाकुष्ठनागरसैन्धवम् । माषक्वाथेन तत्तैलं पक्षवातविनाशनम् ॥ १ ॥ अथार्दितस्य चिकित्सा ॥ नवनीतेन संयुक्तां खादेन्माषेण्डरीं नरः । दुर्वारमर्दितं हन्ति सप्तरात्रान्न संशयः ॥ १ ॥ अथ लशुनविधिः ॥ पलमर्धपलं वापि रसोनस्य सुकुट्टितम् । हिङ्गुजीरकसिन्धूत्थसौवर्चलकटुत्रिकैः ॥ १ ॥ चूर्णितैर्माषकोन्मानैरवचूर्ण्यावलोडितम् । यथाग्निभक्षितं प्रातरेरुबुकाथानुपानतः ॥ २ ॥ दिने दिने प्रयोक्तव्यं मासमेकं निरन्तरम् । वातामयं निहन्त्येवमर्दितं चापतन्त्रकम् ॥ ३ ॥ एकाङ्गरोगिणां रोगं तथा सर्वाङ्गरोगिणाम् । ऊरुस्तम्भं गृध्रसीं च शूलं द्वन्द्वकृमीनपि ॥ ४ ॥ कटिपृष्ठामयं हन्याज्जाठरं च समीरणम् । अथावबाहुके ॥ माषतैलरसो नाभ्यां बाह्वोश्च परिमर्दयेत् । दशाङ्घ्रिमाषक्वाथेन जयेद्वैद्योऽवबाहुकम् ॥ १ ॥ इति वृन्दात् ॥ अथ माषाद्यं तैलम् ॥ माषातसीयवकुरण्टककण्टकारीगोकण्टटुण्टुकजटाकपिकच्छुतोयैः । कार्पासकास्थिशणबीजकुलत्थकोलक्वाथेन बस्तपिशितस्य रसेन वापि ॥ १ ॥ शुण्ठ्या च मागधिकया शतपुष्पया च सैरण्डमूलसपुनर्नवया सरेण्वा । रास्नाबलामृतलताकटुकैर्विपक्वं माषाख्यमेतदवबाहुकहारि तैलम् ॥ २ ॥ अर्धाङ्गशोषमपतानकमाढ्यवातमाक्षेपकं सभुजकम्पशिरःप्रकम्पम् । नस्येन बस्तिविधिना परिषेचनेन हन्यात्कटीजघनजानुशिरःसमीरान् ॥ ३ ॥ इति माषाद्यं तैलम् ॥ अथ प्रत्यष्ठीलाष्ठीलकयोगः ॥ प्रत्यष्ठीलाष्ठीलकयोर्गुल्मेऽभ्यन्तरविद्रधौ । क्रिया हिङ्ग्वादि चूर्णं च शस्यतेऽत्र विशेषतः ॥ १ ॥

---

१ (च०) सरण्या ।

॥ अथ हिङ्ग्वादिचूर्णम् ॥

हिङ्ग्वाम्लत्रिपटूग्रषट्कटुशटीवृक्षाम्लदीप्याल्लिकापाठाजाज्यजगन्धमूलहपुषाद्विक्षारसाराभया । हिध्माध्मानविबन्धवध्मकसनश्वासाग्निसादारुचिप्लीहार्शोऽखिलशूलगुल्मगलहृद्रोगाश्मपाण्डुप्रणुत् ॥१॥ इति बोपदेवशतात्॥अथ योगशतात् हिङ्ग्वादि चूर्णम् । हिङ्गूग्रगन्धाविडशुण्ठ्यजाजीहरीतकीचित्रकमूलकुष्ठम् । भागोत्तरं चूर्णितमेतदिष्टं गुल्मोदराष्ठीलविषूचिकासु ॥ १ ॥ अथ नादेयादि ॥ नादेयीकुटजार्कशिग्रुबृहतीस्नुग्बिल्वभल्लातकव्याघ्रीकिंशुकपारिभद्रकरजोऽपामार्गनीपाग्निकान् । वासामुस्तकपाटलान्सलवणान्दग्ध्वा रसं पाचितं हिङ्ग्वादि प्रतिवापमेतदुचितं गुल्मोदराष्ठीलिषु ॥ १ ॥ अथ गदनिग्रहाद्विडङ्गासवः ॥ विडङ्गं पिप्पलीमूलं पाठाधात्र्येलवालुकम् । कुटजत्वक्पलं रास्ना भार्गी पञ्चपलोन्मितान् ॥ १ ॥ अष्टद्रोणेऽम्भसः पक्त्वा द्रोणशेषं तु कारयेत् । पूते शीते क्षिपेत्तस्मिन्माक्षिकस्य शतत्रयम् ॥ २ ॥ धातक्या विंशतिपलं चूर्णं कृत्वा तु दापयेत् । व्योषस्य तु पलान्यष्टौ त्रिजातं द्विपलं तथा ॥ ३ ॥ फलिनी हेमतोयानां सरोधाणां पलं पलम् । घृतभाण्डे समाधाय मासमेकं विधारयेत् ॥ ४ ॥ एष योगो हरत्येव प्रत्यष्ठीलाभगन्दरान् । ऊरुस्तम्भाश्मरीमेहगण्डमालां सविद्रधिम् ॥ आढ्यवातं हनुस्तम्भं विडङ्गाख्यो महासवः ॥ ५ ॥ इति विडङ्गासवः ॥ अथ विश्वाच्याम् ॥ दशमूलीबलामाषकाथं तैलाज्यमिश्रितम् । सायं भुक्त्वा चरेन्नस्यं विश्वाच्यां चाववाहुके ॥ १ ॥ इति दशमूलादिकाथः ॥ ॥ अथ मिम्मिण्याः ॥ दशमूलस्य निर्यूहो हिङ्गुपुष्करचूर्णितः । शमयेत्परिपीतस्तु वातं मिम्मिणसंज्ञितम् ॥ १ ॥ अथ कुब्जे ॥ हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक् । क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत् ॥ १ ॥ वातघ्नैर्दशमूल्या च नवं कुब्जमुपाचरेत् । स्नेहैर्मांसरसैश्चापि प्रवृद्धं तं विवर्जयेत् ॥ २ ॥ अथ तूनीप्रतितून्योः ॥ पिपल्यादिरजस्तूनीप्रतितून्योः सुखाम्बुना । पिबेद्वा स्नेहलवणं सघृतं क्षारहिङ्गु वा ॥ १ ॥ अथाध्माने ॥ आध्माने लेपनं पाणितापश्च फलवर्तयः । दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ॥१॥ अम्लपिष्टैः सुखोष्णैश्च प्रदिह्यादुदरे भिषक् । दीपनं पाचनं चैवाध्मानवस्तिविशोधनम् ॥ २ ॥ इति दारुषट्कम् ॥

॥ अथ प्रत्याध्मानोरुस्तम्भयोः कल्कादि ॥

प्रत्याध्माने तु वमनं लङ्घनं दीपनौषधम् । ऊरुस्तम्भं जयेद्रूक्षस्वेदमर्दनकौशिकैः ॥ १ ॥ पिप्पली पिप्पलीमूलं भल्लातकफलानि च । एतत्कल्कश्च सक्षौद्र ऊरुस्तम्भनिवारणः ॥ २ ॥ इति पिप्पलीकल्कः ॥ पञ्चमूलीकषायं तु सुखोष्णं त्रिवृतायुतम् । गृध्रसीं गुल्मशूलं च सद्यः पीतं नियच्छति ॥ १ ॥ इति पञ्चमूलीकषायः ॥ वाजिगन्धाबलाबिल्वदशमूल्यम्बुसाधितम् । गृध्रस्यां तैलमैरण्डं वस्तौ पाने च शस्यते ॥ १ ॥ इति वाजिगन्धाद्यं तैलम् ॥ द्वे पले सैन्धवात्पञ्च शुण्ठ्या ग्रन्थिकचित्रकात् । द्वे पले भल्लकास्थीनि विंशती द्वे तथाढके ॥ १ ॥ आरनाले पचेत्प्रस्थं तैलस्यैत-

रपत्यदम् । गृध्रस्यूरुग्रहार्शोऽर्त्तै सर्ववातविकारनुत् ॥ २ ॥ इति सैन्धवाद्यं तैलम् ॥ विध्येच्छिरां मेण्ढ्रबस्तेरधस्ताच्चतुरङ्गुले । यदि नोपशमं गच्छेद्दहेत्पादकनिष्ठिकाम् ॥ ३ ॥ इति वृन्दात् ॥ महानिम्बजटाकल्को गृध्रसीनाशनः स्मृतः ॥ ४ ॥ इति शार्ङ्गधरात् ॥

॥ अथ जिह्वास्तम्भे ॥

जिह्वास्तम्भे क्रिया श्रेष्ठा सामान्योक्ता तु यार्दिते ॥ अथ कल्याणकावलेहः ॥ सहरिद्रावचाकुष्ठं पिप्पलीविश्वभेषजम् । अजाजी चाजमोदा च यष्टी मधुयुतं घृतम् ॥ १ ॥ एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः । मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥ जडगद्गदमूकत्वं लेहः कल्याणको जयेत् ॥ २ ॥ इति योगतः ।

॥ अथ गृध्रसीकलायखञ्जपङ्गुषु ॥

विशोध्यैरण्डबीजानि पिष्ट्वा क्षीरे विपाचयेत् । पायसं तत्कटीशूले गृध्रस्यां चौषधं परम् ॥ १ ॥ रास्नायास्तु पलं चैकं कर्षान्पञ्च च गुग्गुलोः । सर्पिषा वटकान्कृत्वा खादेद् गृध्रसिनाशनम् ॥ २ ॥ इति रास्नाद्यो गुग्गुलुः ॥ तैलमेरण्डजं वापि गोमूत्रेण पिबेन्नरः । मासमेकं प्रयोगोऽयं गृध्रस्यूरुग्रहापहः ॥ जयेत्कलायखञ्जं तु हेतुत्यागरसोनतः ॥ १ ॥

॥ अथ कटिशूले ॥

दशमूलीकषायेण पिबेद्वा नागराम्भसा । कटिशूलेषु सर्वेषु तैलमेरण्डसम्भवम् ॥१॥ हह्लाबं खाखसं खाद्यं खर्जूरं मेथिकातिलाः । मिशिद्वयं च भल्लास्थि वातामं बब्बुलं तथा ॥ २ ॥ सारं नैकपलं ग्राह्यं गुडोऽष्टिकुडवस्तथा । घृतं द्विकुडवं चैव लड्डुकान् कारयेद्भिषक् ॥ ३ ॥ द्विकर्षं भक्षयेत्प्रातः कटिवातविनाशनः । धातुस्तम्भं धातुवृद्धिं कुरुते नात्र संशयः ॥ ४ ॥ तैलं घृतं चार्द्रकमातुलुङ्ग्यो रसं सचुक्रं सगुडं पिबेद्वा । कट्यूरुपृष्ठत्रिकगुल्मशूलगृध्रस्युदावर्तहनुग्रहेषु ॥ ५ ॥

॥ अथ क्रोष्टुशीर्षे ॥

गुडूचीत्रिफलाक्काथैर्गुग्गुलुः पिण्डितो वरः । क्रोष्टुशीर्षं निहन्त्युच्चैः सेवितो मासमात्रतः ॥ १ ॥

॥ अथावशिष्टानां प्रतीकारः ॥

हनुग्रहे हनुस्तम्भे मन्यास्तम्भेऽर्दिते पिबेत् । दशमूल्यम्भसा कृष्णा अश्वत्थस्वरसेन वा ॥ १ ॥ बाह्यायामान्तरायामपार्श्वशूलकटिग्रहान् । खल्लीदण्डापतानौ च स्नेहस्वेदपुरैर्जयेत् ॥ २ ॥ वामनत्वाङ्गसङ्कोचभङ्गभेदग्रहव्यथाः । मर्दनैर्बस्तिभिः क्वाथैः स्वेदनैश्च भिषग् जयेत् ॥ ३ ॥ अपतानव्रणायामौ स्नेहैर्व्रणचिकित्सितैः । अङ्गरौक्ष्यस्तम्भकम्पकार्श्यं कपिशतोदने ॥ ४ ॥ दौर्बल्ये स्फुरणे भ्रंशे स्नेहैर्मर्दनमिष्यते ।

शुक्रकार्श्ये शुक्रनाशे शुक्रस्यातिप्रवर्तने ॥ ५ ॥ विड्ग्रहे बद्धविट्के च स्नेहपानं हितं मतम्। प्रलापे भीरुतापे च प्रसुप्तौ चित्तवैकृते ॥ ६ ॥ स्वेदनाशे बलक्षैण्ये कौशिकः सघृतो हितः। शब्दाज्ञतामये चापि लेहः कल्याणको हितः ॥ ७ ॥ शीततां रोमहर्षं च शिरापूरणमेव च। कटुतिक्तैर्जयेद्द्रव्यैः स्नेहस्वेदनमर्दनैः ॥ ८ ॥ वाताप्रवृत्तिमुद्गारमन्त्रकूजनमेव च। निरूहबस्तिनाथाङ्गकाठिन्यं स्नेहगाहनात् ॥ ९ ॥ शिरोग्रहे तु कर्तव्या शिरोगतमरुत्क्रिया। रक्तावसेचनं कुर्यादभीक्ष्णं वातकण्टके। पिबेदैरण्डतैलं वा दहेत्सूचिभिरेव च ॥ १० ॥ इत्यशीतिवातजरोगाणां संक्षेपेण पृथक् पृथक् चिकित्सा ॥

॥ अथ सर्ववातरोगाणां सामान्यप्रतीकारानाह ॥

अथ क्वाथाः ॥ सहचरामरदारुसनागरं क्वथितमम्भसि तैलविमिश्रितम्। पवनपीडितदेहगतिः पिबन्द्रुतविलम्बितगो भवतीच्छया ॥ १ ॥ इति योगतरङ्गिण्याः सहचरादिः। अथ योगसारान्महारास्नादिः ॥ रास्नैरण्डामृतोग्रासहचरचविकारामसेनाब्दभार्गीदीप्यानन्तायवानीवृकिसुरकृमिजिच्छृङ्गिशुण्ठीबलाभिः। मूर्वातिक्तासमङ्गाद्विविषशटिवरापिप्पलीयावशूकै रक्तश्रीखण्डकारग्वधकटुकफलैर्वत्सवृश्चीवयुक्तैः ॥ १ ॥ सर्वैरेतैर्दशाङ्घ्रिप्रयुतसमलवैः साधितोऽष्टावशेषः क्वाथो रास्नादिरादौ महदुपपदवान्कौशिकाक्तो निहन्ति। सर्वाङ्गैकाङ्गवाताञ्श्वसनकसनहृत्स्वेदशैत्यादितन्द्रामूलं तूनीप्रतूनीगलगदनिखिलाङ्गव्यथाकम्पवल्लीः ॥ २ ॥ विश्वाचीश्लीपदामानिलनिखिलमहासूतिकारोगसुप्तिं जिह्वास्तम्भापतानं स्फुटनविमथनक्लीबताक्षेपकौब्जम्। शोफाटोपापतन्त्रार्दितखुडनहनुग्रहसीपादशूलं वायुश्लेष्मोत्थरोगानपि गिरितनयावल्लभेनोपदिष्टः ॥ ३ ॥ इति महारास्नादिः ॥ अथ शार्ङ्गधरान्महारास्नादिः ॥ रास्ना द्विगुणभागा स्यादेकभागास्तथापरे। धन्वयासबलैरण्डदेवदारुशटीवचाः ॥ १ ॥ वासको नागरं पथ्या चव्यं मुस्तं पुनर्नवा। गुडूचीवृद्धदारुश्च शतपुष्पा च गोक्षुरः ॥ २ ॥ अश्वगन्धा प्रतिविषा कृतमालः शतावरी। कृष्णा सहचरश्चैव धान्यकं बृहतीद्वयम् ॥ ३ ॥ एभिः कृतं पिबेत्क्वाथं शुण्ठीचूर्णेन संयुतम्। कृष्णाचूर्णेन वा योगराजगुग्गुलुनाथवा ॥ ४ ॥ आजमोदादिना वापि तैलेनैरण्डजेन वा। सर्वाङ्गकम्पे कुब्जत्वे पक्षाघातेऽवबाहुके ॥ ५ ॥ गृध्रस्यामामवाते च श्लीपदे चापतानके। अन्त्रवृद्धौ तथाध्माने जङ्घाजानुगदेऽर्दिते ॥ ६ ॥ शुक्रामये मेढ्रवाते वन्ध्यायोन्यामयेषु च। महारास्नादिराख्यातो ब्रह्मणा गर्भधारणे ॥ ७ ॥ अथ महाबलाक्वाथः। महाबलामूलमहौषधाभ्यां क्वाथं पिबेन्मिश्रितपिप्पलीकम्। शीतं सकम्पं परिदाहयुक्तं विनाशयेद्द्वित्रिदिनप्रयुक्तः ॥ १ ॥ इति योगसारात् ॥ अथ योगरत्नावलितः पञ्चमूलादिः। पञ्चमूलीकृतः क्वाथो दशमूलीकृतोऽथवा। रूक्षः स्वेदस्तथा नस्यं मन्यास्तम्भे प्रशस्यते ॥ १ ॥ अथैरण्डादिः। एरण्डबिल्वं बृहतीद्वयं च सौ-

१ (च०) शुक्रम्। २ (च०) खुडहनुरुक्।

वर्चलं व्योषसुरामठं च। समातुलुङ्गीलवणोत्तमं च काथो धनुर्वातहरः प्रशस्तः ॥ १ ॥ अथ वाजिगन्धादिः। वाजिगन्धाबलास्तिस्रो दशमूलीमहौषधम्। गृध्रनख्यौ च रास्ना च गणो मारुतनाशनः ॥ १ ॥ अथ समीरदावानलः। भल्लातकानां शकलानि कृत्वा त्रिकोलमानं परिगृह्य वैद्यः। चतुष्पलं तोयसमन्वितोऽयं काथश्चतुर्थांशक एष सम्यक् ॥१॥ सिताघृतं गोपयमिश्रितेन कोलं पलार्धं पलमेकयुक्तम्। क्रमेण पीतः खलु हन्ति वातान् समीरदावानलनामधेयः ॥ २ ॥ इति काथाः

॥ अथ चूर्णानि ॥

रास्नाकुष्ठनतक्रुपटूकटुशटीपाठावचासारिवाभूनिम्बत्रिफलाबलादशजटानिर्गुण्डिकैरण्डकम्। हिङ्ग्वाम्लार्द्रकबस्तगन्धकबरीक्षारौ पटूनां त्रयं चूर्णं पुष्करतैलयुक्तमखिलान्वातानशीतिं जयेत् ॥१॥ अथाभादिचूर्णं वृन्दात् ॥ आभा रास्ना गुडूची च शतावर्यो महौषधम्। शतपुष्पाश्वगन्धा च हपुषा वृद्धदारकः॥१॥यवानी चाजमोदा च समभागानि कारयेत्। सूक्ष्मचूर्णमिदं कृत्वा बिडालपदकं पिबेत् ॥ २ ॥ मद्यैर्मांसरसैर्यूषैस्तक्रैरुष्णोदकेन वा। सर्पिषा वापि लेह्यं तु दधिमण्डेन वा पुनः ॥ ३ ॥ अस्थिसन्धिगतं वायुं स्नायुमज्जाश्रितं च यम्। कटिग्रहं गृध्रसीं च मन्यास्तम्भं हनुग्रहम् ॥ ४ ॥ ये च कोष्ठगता रोगास्तांश्च सर्वान्प्रणाशयेत्। आभाद्यो नाम चूर्णोऽयं सर्वव्याधिनिबर्हणः ॥ ५ ॥ इत्याभाद्यं चूर्णम् ॥ इति चूर्णानि ॥

॥ अथ गुग्गुलवः ॥

अथ त्रयोदशाङ्गगुग्गुलुः॥ आभाश्वगन्धा हपुषा गुडूची शतावरीगोक्षुरकं च रास्ना। श्यामा शटी घोषवती यवानी सनागरा चेति समं विचूर्ण्य ॥ १ ॥ सर्वैः समं गुग्गुलुमत्र दत्वा कुर्यात्ततोऽर्धं प्रणिधाय सर्पिः। अर्धाक्षमात्रा गुटिकास्ततोऽस्य कार्याः पुरस्याथ दिनाननेऽद्यात् ॥ २ ॥ एकां ससर्पिर्मधुना यथा न स्पर्शो भवेद्दन्ततते कथंचित्। ततः कवोष्णं सलिलं सुरां वा गव्यं पयो वाप्यथ मुद्गयूषम् ॥ ३ ॥ किं वा रसैर्मांसभवैर्निपीय लवङ्गमेकं वदने निदध्यात्। कटिग्रहे गृध्रसिबाहुपृष्ठे हनुग्रहे जानुपदग्रहे च ॥ ४ ॥ सन्धिस्थिते चास्थिगते समीरे मज्जाश्रिते स्नायुगतेऽतिदुष्टे। शूलद्वये पार्श्वशिरोरुजायां मन्याग्रहे कण्ठहृदिग्रहे च ॥ ५ ॥ त्रयोदशाङ्गोऽयमतिप्रशस्तो जयेद्गदान्वातकफप्रभूतान् ॥ ६ ॥ इति योगतरङ्गिणीतस्त्रयोदशाङ्गगुग्गुलुः ॥ अथ वीरसिंहावलोकतो द्वात्रिंशको गुग्गुलुः ॥ त्रिकटु त्रिफला मुस्तं विडङ्गं चव्यचित्रकौ। वचैलापिप्पलीमूलं हपुषा सुरदारु च ॥१॥ तुम्बुरुं पौष्करं कुष्ठं विषा च रजनीद्वयम्। बाष्पिका जीरकं शुण्ठी सपत्रा च दुरालभा ॥२॥ सौवर्चलं विडङ्गं च क्षारौ द्विरदपिप्पली। सैन्धवं च समाने तत्तुल्यं दत्वा च गुग्गुलुम् ॥ ३ ॥ साधयित्वा विधानेन कोलमात्रां वटीं चरेत्। घृतेन मधुना वापि[1]भक्षयेत्तामहर्मुखे ॥ ४ ॥ आमं हन्यादुदावर्तमन्त्रवृद्धिं गुदक्रिमीन्। महाज्वरोपसृष्टानां

१ (ख० ग० घ०) गोमय।

भूतोपहतचेतसाम् ॥ ५ ॥ आनाहोन्मादकुष्ठानि पार्श्वशूलहृदामयान् । गृध्रसीं च हनुस्तम्भपक्षाघातापतानकान् ॥ ६ ॥ शोफं प्लीहानमत्युग्रं कामलामपचीं तथा । नाम्ना द्वात्रिंशको ह्येष गुग्गुलुः कथितो महान् ॥ धन्वन्तरिकृतो योगः सर्वरोगनिकृन्तनः ॥ ७ ॥ अथ सारसङ्ग्रहाद् योगराजगुग्गुलुः ॥ चित्रकं पिप्पलीमूलं यवानी कारवी तथा । विडङ्गान्यजमोदा च जीरकं सुरदारु च ॥ १ ॥ चव्यैलासैन्धवं कुष्ठं रास्ना गोक्षुरधान्यकम् । त्रिफला मुस्तकं व्योषं त्वगुशीरं यवाग्रजम् ॥ २ ॥ तालीसपत्रं गोक्षूरं लवङ्गं सर्जिका सटी । दन्ती गुडूची हपुषा वाजिगन्धा शतावरी ॥ ३ ॥ प्रत्येकं कर्षमात्रं स्याच्चतुष्कर्षमथोऽमृतम् । एतानि सुभिषक् पट्टे सूक्ष्मचूर्णानि कारयेत् ॥ ४ ॥ यावन्त्येतानि चूर्णानि तावन्मात्रो हि गुग्गुलुः । संमर्द्य सर्पिषा गाढं स्निग्धभाण्डे निधाय च ॥ ५ ॥ ततो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि । योगराज इति ख्यातो योगोऽयममृतोपमः ॥ ६ ॥ आमवातादिवातादीन् कृमीन् दुष्टव्रणानपि । प्लीहगुल्मोदरानाहंदुर्नामानि विनाशयेत् ॥ ७ ॥ अग्निं च कुरुते दीप्तं रेतोवृद्धिं बलं तथा । वातरोगाञ्जयत्याशु सन्धिमज्जगतानपि ॥८॥ पादग्रहं क्रोष्टुशीर्षं मन्यास्तम्भं हनुग्रहम् । कर्णग्रहं कर्णशूलं शिरःशूलं मरुत्कृतम् ॥ रास्नाक्काथेन हन्त्येष केवलो वा प्रशस्यते ॥ ९ ॥ इति योगराजगुग्गुलुः ॥ अथ षडशीतिगुग्गुलुः॥ सैर्यपासविपादारुव्याघ्रीयुक् चविकावृषम् । कृष्णाब्दोग्राधनाभीरुवाव्यालं मिशिवेल्लरी ॥१॥ पथ्या शुण्ठी छिन्नरुहा शम्यारग्वधगोक्षुरम् । विशाखा मोदकी तिक्ता ग्रन्थिभार्गी विदारिका ॥ २ ॥ अलम्बुषा हस्तिकर्णी बस्तगन्धा विषाणिका । शिवाक्षमुशलीकान्तीकाकोलीदीप्ययुग्मकम् ॥ ३ ॥ त्रिवृद्दन्ती शिखी शृङ्गी कोकिलाक्षो दुरालभा । पञ्चमूलं महद्क्षीरतरुः कुष्ठं च जोङ्गकम् ॥ ४ ॥ जातीपत्रीफलैलं च केशरं त्वक्किरातकम् । कुङ्कुमं देवकुसुमं विशाला निशिसैन्धवम् ॥ ५ ॥ मन्दारमूलं कृमिजिद्धेमदुग्धा रविप्रिया । गजपिप्पल्यपामार्गो वानरी नक्तमूलकः ॥ ६ ॥ एतैः समा रसा चाभा द्विगुणा तैः पुरः समः । सूतगन्धकहिङ्गूलं टङ्कणं लोहभस्मकम् ॥ ७ ॥ शुल्बं वङ्गं सूतभस्म नागं ताप्यमयोरजः । मीलितं पुरपादं च सर्वमेकत्र कारयेत् ॥ ८ ॥ पचेच्चतुर्गुणे क्वाथे पुरं पट्टकटुजे पुरा । तुर्यांशशेषिते क्वाथे पूते चात्र विनिक्षिपेत् ॥ ९ ॥ चूर्णानि पुरमुख्यानि पाचयेन्मृदुवह्निना । यावद्घनतरं तावद् गुटिकाः कारयेत्ततः ॥ १० ॥ स्वर्णप्रमाणाः सेव्यास्ता मधुसर्पिःसमन्विताः । सप्तधातुगतान्वातान् शिरास्नाय्वस्थिसन्धिगान् ॥ ११ ॥ सामान्निरामान्संसृष्टान् श्लेष्मजान्घ्नन्ति केवलान् । यक्ष्माणमग्निमान्द्यं च ज्वरं धातुगतं तथा ॥ १२ ॥ गुल्फजानूरुकट्यूरूदरहृत्कुक्षिकक्षगान् ।अंसमन्याहनुश्रोत्रभ्रूललाटाक्षिशङ्खगान्॥१३॥ प्रमेहं मूत्रकृच्छ्रं च शूलमाध्मानमश्मरीम् । किं पुनर्भेदकान् वातान् प्रत्यङ्गस्थाञ्जयत्यलम् ॥ १४ ॥ गुग्गुलुः षडशीतिर्वै नाम्ना भोजेन कीर्तितः । क्षीयमाणेन शि-

१ (च०) मिसी । २ (च०) मालकः ।

ष्येण प्रार्थितेन पुनः पुनः ॥ १५ ॥ स एष राजयोगोऽयं न देयो यस्य कस्यचि-त् । वत्सरेणास्य योगेन षण्ढोऽपि प्रमदाप्रियः ॥ १६ ॥ वाजीकरणमन्यच्च परं नास्माद्विशेषतः । गुणोऽस्य सेवनान्नित्यं यः स्यात्स स्याद्ब्रवीमि कम् ॥ १७ ॥ एष ते परिहार्यस्तु पानभोजनमैथुनैः ॥ इति षडशीतिगुग्गुलुः ॥ अथ रास्नाद्यो गुग्गु-लुः॥ रास्नामृतैरण्डसुराह्वविश्वं तुल्येन गाढं च पुरेण मर्द्यम् । खादेत्समीरी सशिरोग-दी च नाडीव्रणी चापि भगन्दरी च ॥ १ ॥ इति गुग्गुलवः ॥

॥ अथ तैलानि ॥

अथ लघुविषगर्भतैलम् ॥ तैलाढके समतुपाम्बुहयारिहेमनिर्गुण्डिभास्करशिफा-स्रुतया तु सिद्धम् । धत्तूरकुष्ठफलिनीविषहेमदुग्धारास्नाहयारिकटभीमरिचोपचित्रा॥१॥ मांसीवचादहनसर्षपदेवदारुदार्वीनिशारुबुजतुत्रिफलासमङ्गाः । पिष्ट्वा क्षिपेत्पलमिता विषगर्भमेतत्तैलं समस्तपवनामयनाशनं स्यात् ॥२॥ अथ द्वितीयलघुविषगर्भतैलम् । धत्तूरस्य रसस्य पञ्चकुडवं तैलं तथा काञ्जिकं प्रस्थानां च चतुष्टयं गदवचा त्रिंशत्परं शाणकाः । त्र्यद्धात्रीमरिचात्पृथङ्नवविषात्पट्स्वर्णबीजात्पटोः स्युः सप्ताधिकविंशतिः परिमितं तीव्रानिलध्वंसनम् ॥ १ ॥ पक्षाघातं हनुस्तम्भं मन्या-स्तम्भं कटिग्रहम् । पृष्ठत्रिकशिरःकम्पं सर्वाङ्गग्रहणं तथा ॥ २ ॥ इति द्वितीयम् । अथ महाविषगर्भतैलम् ॥ कनकस्य च निर्गुण्डी तुम्बिनी च पुनर्नवा । वातारिश्चाश्व-गन्धा च मपुस्राटं सचित्रकम् ॥ १ ॥ सौभाञ्जनं काकमाची कलिकारी च निम्बकम् । महानिम्बेश्वरी चैव दशमूलं शतावरी ॥ २ ॥ कारवल्ली सारिवा च श्रावणी च विदारिका । वज्रार्कौ मेषशृङ्गी च करवीरद्वयं वचा ॥ ३ ॥ काकजङ्घा त्वपामार्गो बला चातिबलाद्वयम् । व्याघ्री महाबला वासा सोमवल्ली प्रसारिणी ॥ ४ ॥ पलो-न्मितानि चैतानि द्रोणेऽम्भसि विनिक्षिपेत् । पचेत्पादावशेषेऽस्मिन्कल्कस्य कुडवं क्षिपेत् ॥ ५ ॥ त्रिकटु विषतिन्दुं च रास्ना कुष्ठं विषं घनम् । देवदारुर्वत्सनाभो द्वौ क्षारौ लवणानि च ॥ ६ ॥ तुत्थकं कट्फलं पाठा भार्गी च नवसागरम् । त्रायन्ती धन्वयासं च जीरकं चेन्द्रवारुणी ॥ ७ ॥ तैलप्रस्थं समादाय पाचयेन्मृदुवह्निना । विषगर्भमिदं नाम्ना सर्वान्वातान्व्यपोहति ॥ ८ ॥ वक्षोरुकटिजङ्घानां सन्धानं श्रेष्ठमेव च । गृध्रसीं च महावातान् सर्वाङ्गग्रहणं तथा ॥ ९ ॥ दण्डापतानकं चैव कर्णनादं च शून्यताम् । वनमध्ये यथा सिंहात् पलायन्ते यथा मृगाः ॥ १० ॥ तथाश्वगजभग्नानां नराणां च चतुष्पदाम् । नाशयेन्नात्र सन्देहो विषगर्भ-स्य लेपनात् ॥ ११ ॥ इति महाविषगर्भतैलम् ॥ अथ प्रसारिणीतैलम् ॥ समूलपत्रामुत्पाट्य जातसारां प्रसारिणीम् । कुट्टयित्वा पलशतं कटाहे समधि-श्रयेत् ॥ १ ॥ दध्नस्तत्राढकं दद्याद्द्विगुणं चाम्लकाञ्जिकम् । भेषजानि तु पेष्याणि तत्रेमानि समावपेत् ॥ २ ॥ शुण्ठीपलानि पञ्चैव रास्नायाश्च पलद्वयम् । प्रसारिणी-

१ (ख० ग० घ० ङ० च० छ०) मित्रासपरम् । २ (क०) कवकस्य ।

पले द्वे च द्वे पले मधुकस्य च ॥ ३ ॥ एतत्सर्वं समालोड्य शनैर्मृद्वग्निना पचेत् । एतत्प्रभञ्जने श्रेष्ठं नस्यकर्मणि शस्यते ॥ ४ ॥ एकाङ्गग्रहणं वापि सर्वाङ्गग्रहणं तथा । अपस्मारं तथोन्मादं विद्रधिं मन्दवह्निताम् ॥ ५ ॥ त्वग्गताश्चापि ये वाताः शिरासन्धिगताश्च ये । अस्थिसन्धिगता ये च ये च शुक्रान्तरे स्थिताः ॥६॥ सर्वान्वातामयान्नूनं नाशयत्येव सर्वथा । हयं नरं गजं वापि वातजर्जरितं भृशम् ॥ ७ ॥ सद्यः प्रशमयेत्तैलमेतन्नात्र विचारणा । इन्द्रियस्य प्रजननं वन्ध्यानां च प्रजाकरम् ॥ ८ ॥ वृद्धानां बालकानां च स्त्रीणां राज्ञां हितं परम् । पङ्गुर्वा पीठसर्पी वा पीत्वैतत्सम्प्रधावति ॥ ९ ॥ इति प्रसारणीतैलम् ॥ अथ नारायणतैलम् ॥ बिल्वाग्निमन्थस्योनाकपाटलापारिभद्रकाः । प्रसारिण्यश्वगन्धा च बृहती कण्टकारिका ॥ १ ॥ बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा । एषां दशपलान्भागांश्चतुर्द्रोणाम्भसा पचेत् ॥ २ ॥ पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् । शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ ३ ॥ चन्दनं तगरं कुष्ठमेलापर्णी चतुष्टयम् । रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ॥ ४ ॥ एषां द्विपलिकान्भागान् पेषयित्वा विनिक्षिपेत् । शतावरीरसं चैव तैलतुल्यं प्रदापयेत् ॥ ५ ॥ आजं वा यदि वा गव्यं क्षीरं दत्वा चतुर्गुणम् । पाने बस्तौ तथाभ्यङ्गे भोज्ये नस्ये प्रयोजयेत् ॥ ६ ॥ अश्वो वा वातभग्नो वा गजो वा यदि वा नरः । पङ्गुर्वा भग्नहस्तो वा भग्नपादोऽथवा नरः ॥ ७ ॥ अधोभागे च ये वाताः शिरामध्यगताश्च ये । दन्तशूले हनुस्तम्भे मन्यास्तम्भेऽपतन्त्रके ॥ ८ ॥ एकाङ्गग्रहणे वापि सर्वाङ्गग्रहणे तथा । क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः ॥ ९ ॥ लालाजिह्वाश्च बधिरा विस्वरा मन्दमेधसः । मन्दप्रज्ञा च या नारी या च गर्भं न विन्दति ॥ १० ॥ वातार्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा । एतत्तैलं वरं तेषां नाम्ना नारायणं स्मृतम् ॥ ११ ॥ इति नारायणतैलम् ॥ अथ लघुनारायणं तैलम् ॥ एलाबलानतकुचन्दनदारुसौम्याशैलेयकुष्ठकुटिलावरुणशृतेन । तैलं सदुग्धमिति सिद्धमभीरुकन्दतोयेन तेन तुलितेन समीरणघ्नम् ॥ १ ॥ अथ शतावरीनारायणतैलम् ॥ शतावरी चांशुमती पृश्निपर्णी शटी बला । एरण्डस्य च मूलानि बृहत्यौ पूतिकस्य च ॥ १ ॥ गवेधुकस्य मूलानि तथा सहचरस्य च । एषां दशपलान्भागाञ्जलद्रोणे पचेद्बुधः ॥ २ ॥ पादावशेषे पूते च गर्भं चैतान्संमावपेत् । पुनर्नवा वचा दारु शताह्वा चन्दनोऽगरुः ॥ ३ ॥ शैलेयं तगरं कुष्ठं त्रुटी मांसी स्थिरा बला । अश्वाह्वा सैन्धवं रास्ना मञ्जिष्ठा घनचोरकम् ॥ ४ ॥ कौन्तीप्रियङ्गुस्थौणेयं पलार्धं कल्पयेत्पृथक् । गव्याजपयसोः प्रस्थौ द्वौ वा तत्र प्रयोजयेत् ॥ ५ ॥ शतावरीरसप्रस्थं तैलप्रस्थं भिषक् पचेत् । लवङ्गनखकक्कोलवेल्लकं जातिकोशकम् ॥ ६ ॥[1]त्वक्कटुकं च कर्पूरं तुरुष्कं श्रीनिवासकम् । स्पृक्काकुङ्कुमकस्तूरीर्दद्यादत्रावता-

१ (क० ग०) पीट (ङ०) पिट । २ (ख० ग०) लोल (ङ० च०) ललत् (छ०) ला-छ । ३ (क०) समावपेत् ।

रिते ॥ ७ ॥ अस्य तैलस्य सिद्धस्य शृणु वीर्यमतः परम् । अश्वानां वातरुग्णानां कुञ्जराणां तथा नृणाम् ॥ ८ ॥ तैलमेतत्प्रयोक्तव्यं सर्ववातविकारनुत् । आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत् ॥ ९ ॥ गर्भमश्वतरी विन्द्यात्किं पुनर्मानुषी तथा । हृच्छूलं पार्श्वशूलं च तथैवार्धावभेदकम् ॥ १० ॥ अपचीं गण्डमालां च वातरक्तं हनुग्रहम् । कामलामश्मरीं पाण्डुमुन्मादं विनियच्छति ॥११॥ नारायणेन गदितं तैलमेतत्कृपालुना । नारायणमिति ख्यातं नाम्ना तस्मादिदं भुवि ॥१२॥ इति शतावरीनारायणतैलम् ॥ अथ शतावरीतैलम् ॥ रुग्दारुद्रविडिभिपङ्कुतगरं त्वक्पत्रकौन्तीनखैर्मांसीसर्जरसाम्बुचन्दनवचाशैलेयलामज्जकैः । मञ्जिष्ठासरलागुरुद्विपबलारास्नाश्वगन्धावरीवर्षाभूमिसिसिन्धुभिश्च सकलैरेभिः पचेत्कल्कितैः ॥१॥ तुल्यं गोपयसा वरीरससमं तैलं विपक्वं मृदु स्याद्वातघ्नमिदं नृणामिति वरीतैलं भिषक्पूजितम् ॥ २ ॥ अथ दशमूलादितैलम् ॥ दशमूलकषायविपक्वमथो पयसा च समेन बलाब्दनलैः । त्रुटिचन्दनदारुलतानलदैररुणाजतुकुष्ठवचाकुटिलैः ॥ १ ॥ इति पक्वमिदं तिलजं जयति प्रसभं पवनामयमाशु नृणाम् । बलशुक्रविभारुचिवह्निकरं नृपवृद्धशिशुप्रमदासु हितम् ॥ २ ॥ अथ सुगन्धितैलम् ॥ तगरागुरुकुङ्कुमकुन्दुरुभिः सलवङ्गवराङ्कुरङ्गमदैः । सरलामरदारुदलद्रविडीनखकेसररुड्नलिनीनलदैः ॥१॥ सतुरुष्कहरेणुबलाकथनैरिति तैलमिदं पयसा विपचेत् । नृपतिप्रमदाशिशुभिः स्थविरैरुपयोज्यमिदं पवनामयजित् ॥२॥ अथैलादि ॥ एलामुरासरलशैलजदारुकौन्तीचण्डाशटीनलदचम्पकहेमपुष्पम् । स्थौणेयगन्धरसपूतिदलामृणालश्रीवासकुन्दुरुनखाम्बुलवङ्गकुष्ठम् ॥१॥ कालीयकं जलदकर्कटचन्दनश्रीजात्याः फलं सविकसं सह कुङ्कुमेन । स्पृक्कातुरुष्कलघुलम्भतया विनीय तैलं बलाक्कथनदुग्धदधिप्रपक्वम् ॥२॥ मन्दानले न हितमेतदुदाहरन्ति वातामयेषु बलवर्णहुताशकारि ॥३॥ अथ महालक्ष्मीनारायणतैलम् । सुश्रुतात् ॥ दशशताङ्घ्रिशिवेतरमल्लिका दहननागबलारुबुबाष्पिका । कितवलाङ्गलकीवनमल्लिका कुटजहेदुवृकीखरशृङ्गिका ॥ १ ॥ मधुकबीजकचम्पकमालतीस्नुहिबलाक्रमिहाप्रपुनाटकाः । शतदलाश्ववराहकवासनीरुबुकधन्वनपिप्परिरक्तिका ॥ २ ॥ अतिबलाद्विविषाशकदाडिमीशिखरिशाल्मलिसिन्धुकतुण्डिका । सुषिरपङ्कुलकाशसुमर्कटीवरककुम्भनिकुम्भजयन्तिका ॥ ३ ॥ कुसरिपिच्छलिकाकरमर्दिकाकसनमर्दनकेवणिरूपिका । अतसिवत्सकगृध्रमहीरुहो विदुलकुञ्जरिकाद्वितयोचटाः ॥ ४ ॥ दधिफलस्नुववृक्षमृगादनीमधुरसामगधाजलपत्रिका । रुदतिका पृथगेभ्यजटाः सुधीः समनुगृह्य तथैव दशाङ्घ्रिकम् ॥५॥ बिल्वाग्निमन्थस्योनाककाश्मरीपाटलायुतैः । शालिपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरैः ॥ ६ ॥ मुनितरुमलयतपनापामार्गबीजनक्तमालशृङ्गाटी । प्रपुन्नाटो हेमदुग्धाफलेरुहाणां च बीजानि ॥ ७ ॥ धात्रीशिग्रुकरञ्जबब्बुलमधुष्ठीलेङ्गुदीनेपती—नीपारग्वधरक्तसारबदरीविस्फूर्जनः काञ्चनः । विश्वोदुम्बरतापसीद्रुमयुगं कोलद्वयं सल्लकी गायत्रीकलिवृक्षभण्डिकदराश्वत्थाभयापादपाः ॥ ८ ॥

मल्लीकिंशुकमेषशृङ्गिकिणिहीभूताङ्कुशः शल्पकः कोशाम्राऽर्जुनपारिभद्रकमहावृक्षाः कुमार्यासनैः । कुम्भी रक्तधनञ्जयो नियमनो वातारिमोखाह्वया एतेषां परिगृह्य वल्कलमथो रम्भा विदारी वरी ॥ आलूकक्षिरकन्दवाजिसुवहा कर्कोटिका वृश्चिका खर्जूरी सुरसूरणप्रभृतिकान्कन्दांश्च साधूनपि ॥ ९ ॥ छिन्नाटरूषकशिवप्रियमाषपर्णीज्योतिष्मती युगुलपर्पटमेषवल्ली । भूपर्णिकासजटिकाभृगुराजमुण्डीयुक्तर्तरीकुलकयुग्मफलार्कभक्ता ॥ १० ॥ भूनिम्बवह्निदमनो गिरिकर्णिकायुक् चिल्लारकाखदिरकाविजयाकुमार्यः । गङ्गावती युगकवैष्णविका सुगन्धा लम्बा सुपर्वलतिका सहदेविका च ॥ ११ ॥ गोपीयुगं मृगखुरी सरणी च कङ्गुमोर्यश्च नागदमनी मधुपुष्पिका च । एतानि गृह्य निखिलानि तथाब्दयुग्मं चूतास्थितोतरुरुहो वटसंप्ररोहान् ॥ १२ ॥ भूशर्करामदकराकुसुमं च पीलुबर्हैः शिखां कनककेतकिसंप्ररोहान् । व्याघ्राटिकाद्ग्रिकरकं तिमिरोत्थसारं कण्डूकपित्थभवलोहजटां गृहीत्वा ॥ १३ ॥ मुष्टिप्रमाणं विधिनोद्धृतानि द्रौणैर्जलानां तिसृभिर्विपाच्य । पादावशेषं परिगृह्य पूतं प्रस्थत्रयं तत्र तिलोत्थतैलम् ॥ १४ ॥ हिंस्रा रक्ता वरिष्ठा सुररजनियुगं सैंहलं गन्धसारं शृङ्गारं नागपुष्पं पलितकटुफलं रक्तकाष्ठं नतं च । षड्ग्रन्थाजोङ्गकाश्वारुचककररुहं रोचनारक्तसारं कोरङ्गीपालकाह्वं क्रमिरिपुमधुकं सिन्धुजं स्निग्धदारु ॥ १५ ॥ तालीसं जातिसस्यं मलयजममृतं पद्मकं जातिपत्री सेव्यं पद्मं यवानी कनकतुरवती केसरं पद्मकस्य । पाठीनो राजपुत्रीजलधरचविका सोमवल्को मधूकं पाक्यः स्वर्जी शताह्वा वनजमगधजा मत्स्यपीता शटी च ॥ १६ ॥ कारुञ्ची पुत्रजीवास्तपनकनकजं बीजभृङ्गाररेची वृक्षाम्लं देवधूपो जरणसररसाकल्कराकुट्टिमं च ॥ मृद्वीकासाकुरण्डं नियमनधनिका धन्वयासं च ब्राह्मी विश्वं कैरातकेक्षुक्षुरककरिकणामोदकं बस्तमोदा ॥ १७ ॥ शक्राह्वा तिल्वलाख्योच्छुरपुरसुषवी मेथिका शृङ्गिका च प्रत्येकं संगृहीत्वा पिचुदलतुलिता मुञ्च सकृत्प्रविष्टा । तान्निक्षिप्याशु पात्रे शुचिजनविहितं निर्मलं वैद्यवर्यो गव्यं वा दुग्धमाजं युगपरिगणितं पूर्वमुक्ताच्च तैलात् ॥ १८ ॥ नारायण्यः स्वरसकमथो रङ्गमाता रसं च तैलोन्मानं विपच रविजे भोजयेत्प्रत्यहं वा । तस्मिन्पाकं गतवति यथाविध्यनुप्रक्षिपेच्च सौगन्ध्याप्त्यै शिशिरकिरणं कुङ्कुमं वेधमुख्यम् ॥ १९ ॥ गोधूमाख्यं सुसुरभियुतं गन्धकर्चूरकं च जातीपुष्पं शतदलसमं मल्लिकं चम्पकं च । लोहाह्वेन त्वतिसुरभिते काचभाण्डे निधाय तैलं चैतन्नृपतिसदने धारयेद्वैद्यवर्यः ॥ २० ॥ पाने बस्तौ विहितशमने नावनेऽभ्यञ्जने च मातङ्गे वा मनुजहययोर्वातरोगाभिभूते । वाताष्ठीलागलहनुशिरोगृध्रसीपादशूलं पक्षाघातश्रवणनयनभ्रूललाटे तु शूलम् ॥ २१ ॥ ऊरुस्तम्भार्दितबधिरतैकाङ्गरोगापतानं मन्यास्तम्भं त्रिकहृदयरुङ्मूकताक्षेपखाञ्ज्यम् । जिह्वास्तम्भं गतिविकलताकुब्जतादन्तशूलं तून्यौ गुल्मद्वयं वा गुदकटिचरणभ्रंशगुल्फौ च सुप्तिम् ॥ २२ ॥ विश्वाचीं वा वृषणपवनं धातुवा-

तापतानं मूकं कम्पं जयति सकलान्वातरोगाननुक्तान् । रेतोवृद्धिं जनयति नवं यौवनं पुंस्त्ववृद्धिं बुद्धिं प्राणं वितरति तथा पुष्टिमायुष्यकारि ॥ वन्ध्यायाः पुत्रदं स्याज्ज्वरविहिततनौ शोषदौर्भाग्यहन्तृ तैलं भूपोपयोग्यं विनिगदितमिदं नाम नारायणं च ॥ २३ ॥ इति महालक्ष्मीनारायणतैलम् ॥[1]अथ माषतैलम् ॥ माषक्काथे बलाक्काथे रास्नाया दशमूलजे । यवकोलकुलत्थानां छागमांसरसे पृथक् ॥१॥ प्रस्थं तैलस्य च प्रस्थं क्षीरं दद्याच्चतुर्गुणम् । रास्नात्मगुप्तसिन्धूत्थशताह्वैरण्डमुस्तकैः ॥२॥ जीवनीयबलाव्योषैः पचेदक्षमितैः पृथक् । हस्तकम्पे शिरःकम्पे बाहुकम्पेऽवबाहुके ॥३॥ बस्त्यभ्यञ्जनपानेषु नावने च प्रयोजयेत् । माषतैलमिदं श्रेष्ठमूर्ध्वजत्रुगदापहम् ॥ ४॥ इति माषतैलम् ॥ अथ महाबलातैलम् ॥ बलामूलकषायस्य दशमूलीकृतस्य च । यवकोलकुलत्थानां क्काथस्य पयसस्तथा ॥१॥ अष्टावष्टौ शुभान्भागांस्तैलादन्ये तदेकतः । पचेदावाप्य मधुरं गणं सैन्धवसंयुतम् ॥ २॥ तथागुरुं सर्जरसं सरलं देवदारु च । मञ्जिष्ठाचन्दनं कुष्ठमेला कोलाञ्जनं वरा ॥ ३ ॥ मांसीशैलेयकं पत्रं तगरं सारिवा वचा । शतावरी चाश्वगन्धा शतपुष्पा पुनर्नवा ॥ ४ ॥ तत्संसिद्धं च सौवर्णे राजते मृन्मयेऽथ वा । प्रक्षिप्य सकलं सम्यक् सुगुप्तं स्थापयेद्बुधः ॥ ५ । बलातैलमिदं ख्यातं सर्ववातविकारनुत् । यथाबलं भिषङ्मात्रां सूतिकायै प्रदापयेत् ॥ ६ ॥ या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान् । क्षीणो वातैर्मर्महते मथिते पीडिते तथा ॥ ७ ॥ भग्ने च च्छिन्नभिन्ने च सर्वथैव प्रयोजयेत् । सर्वानाक्षेपकादींश्च वातव्याधीन् व्यपोहति ॥८॥ मत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः । राज्ञा त्वेतद्धि कर्तव्यं राजमान्यैस्तथानरैः ॥ ९ ॥ इति महाबलातैलम् ॥ अथ विजयभैरवतैलम् ॥ रसं गन्धं शिलातालं सर्वं कुर्यात् समांशकम् । चूर्णयित्वा ततः श्लक्ष्णमारनालेन पेषयेत् ॥ १ ॥ तेन कल्केन संलेप्य क्षौमं वस्त्रं ततः परम् । घृताक्तां कारयेद्वर्तिमूर्ध्वभागे प्रदीपयेत् ॥ २ ॥ तस्याधःस्थापिते पात्रे तैलं पतति शोभनम् । लेपयेत्तेन गात्राणि भक्षयेदातुरः सदा ॥ ३ ॥ नाशयेत्सूत्रतैलं तद्वातरोगानशेषतः । बाहुकम्पं शिरःकम्पं जङ्घाकम्पं ततः परम् ॥ ४ ॥ एकाङ्गं च तथा वातं हन्ति लेपान्न संशयः । रोगशान्त्यै सदा भक्ष्यं तैलं विजयभैरवम् ॥ ५ ॥ इति विजयभैरवतैलम् ॥ अथ रास्नापूतिकतैलम् ॥ दशमूलबलादारु अश्वगन्धा शतावरी । वरुणैरण्डनिर्गुण्डीतर्कारीशिग्रुमोरटम् ॥१॥ सहाचरं चित्रमूलं करञ्जं कोलमूलकम् । पुनर्नवां च भूपीलु अर्कपुङ्खी दुरालभा ॥२॥ जीवन्ती विषतिन्दुश्च वातारिर्हिस्रशिग्रुकम् । अलर्कयवकोलं च कुलित्थानां कषायकम् ॥३॥ एतेषां च समां रास्नां पूतिकं च तयोः समम् । अष्टभागावशेषं तु कषायमवतारयेत् ॥४॥ तत्पादं तिलतैलं च त्वजाक्षीरं च तत्समम् । गुग्गुलुं तगरं मांसीं त्रिकटु त्रिफलानि च ॥ ५ ॥ चातुर्जातं कचोरं च विडङ्गामरदारु च । हिङ्गुरास्नावचातिक्तापाठायष्टिकाचित्रकम् ॥ ६ ॥ प्रियङ्गु-

१ (च०) भते । २ (च०) सुततैलम् । ३ (च०) पुञ्जी ।

पिप्पलीमूलं चन्दनं चव्यदीप्यकम् । वरालं चम्पकं कुष्ठं मञ्जिष्ठामिशिसर्षपम् ॥ ७ ॥ जातीफलं सुगन्धं च पाठोशीरं समांशकम् । एतत्तैलस्य षष्ठांशं कल्कद्रव्याणि दापयेत् ॥ ८ ॥ सुमुहूर्ते सुनक्षत्रे नववस्त्रेण पीडयेत् । पानलेपननस्याद्यशिरोबस्तिषु पूजितम् ॥ ९ ॥ धनुर्वातान्तरायामं गृध्रसीमवबाहुकम् । आक्षेपके व्रणायामे विश्वाच्यामपतन्त्रके ॥ १० ॥ आढ्यवाते हनुस्तम्भे शिरोवातापतानके । भ्रूशङ्खकर्णनासाक्षिजिह्वास्तम्भेऽवदारुके ॥ ११ ॥ कलायखञ्जतापङ्गुसर्वाङ्गैकाङ्गमारुते । अर्दिते पादहर्षे च पक्षाघाते प्रशस्यते ॥ १२ ॥ ऊरुस्तम्भं सुप्तवातं नाशयेन्नात्र संशयः । रास्नापूतीकनामैतत्तैलमात्रेयनिर्मितम् ॥ १३ ॥ इति तैलानि ॥

॥ अथ पञ्चतिक्तघृतम् ॥

निम्बामृतावृषपटोलनिदिग्धिकानां भागान्पृथग् दशपलानि पचेद्घटेऽपाम् । अष्टावशेषितरसेन पुनश्च तेन प्रस्थं घृतस्य विपचेत्पिचुभागकल्कैः ॥ १ ॥ रास्नाविडङ्गसुरदारुगजोपकुल्याद्विक्षारनागरनिशामिशिचव्यकुष्ठैः । तेजोवतीमरिचवत्सकदीप्यकाग्निरोहिण्यपुष्करवचाकणमूलयुक्तैः ॥ २ ॥ मञ्जिष्ठया तु विषया त्रिवृता यवान्या संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः । तत्सेवितं घृतमतिप्रबलं समीरं सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥ ३ ॥ नाडीव्रणार्बुदभगन्दरगण्डमालाजत्रूर्ध्ववातगुदगुल्मगुदोत्थमेहान् । यक्ष्मारुजश्वसनपीनसकासशोफहृत्पाण्डुरोगमथ विद्रधिवातरक्तम् ॥ ४ ॥ इति पञ्चतिक्तघृतम् ॥

॥ अथाजमोदादिवटी ॥

अजमोदा कणा वह्निं शतपुष्पा सनागरम् । मरीचं सैन्धवं देवं भागैकं च पृथक् पृथक् ॥ १ ॥ पञ्चभागा हरीतक्याः शुण्ठी च दशभागिका । वृद्धदारोर्देशांशः स्यात् षट्त्रिंशद् गुडभागकाः ॥ २ ॥ गुडपाकैर्वटीं कृत्वा मात्राकर्षः प्रकीर्तितः । संधिवाते प्रदेयं तत्त्वामवाते सुदारुणे ॥ उष्णोदकानुपानेन सर्ववातं नियच्छति ॥ ३ ॥

॥ अथ वाते कढी ॥

निर्गुण्डीदीप्यकं वह्निहरिद्राविश्वभेषजम् । तक्रं काञ्जिकसम्पक्वं वातघ्नं वह्निवर्धनम् ॥ १ ॥

॥ अथ स्वेदलेपविधिः ॥

एरण्डार्ककरञ्जमोरटबलातर्कारिसोमस्नुहीनिर्गुण्डीतलपोटशिग्रुवरणास्फोताश्वगन्धादिजैः । पत्रैः काञ्जिकमूत्रचुक्रसहितैः स्विन्नैर्घटस्थैः कृतैः स्वेदः क्रुद्धसमीरणार्तवपुषां सद्यः सुखोत्पादकः ॥ १ ॥ निर्गुण्ड्या चोपनाहं च सकरञ्जैः सपित्तलैः । भेषजैः सेकलेपादि त्वभिषेकादिकं चरेत् ॥ २ ॥ शतपुष्पसुरद्रुदिनेशपयो

१ (च०) बाहुके । २ (च०) मात्राकर्षप्रमाणतः ।

गदरामठसिन्धुभवं हरति । अपि लेपनतोऽस्थिगतं मरुतं कटिसन्धिभवं त्रिदिनात्सततम् ॥ ३ ॥

॥ अथ महाशाल्वणयोगः शार्ङ्गधरात् ॥

कुलत्थमाषगोधूमैरतसीतिलसर्षपैः । शतपुष्पं देवदारुशेफालीस्थूलजीरकैः ॥१॥ एरण्डबिल्वमूलैश्च रास्नामूलैश्च शिग्रुभिः । मिशिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः ॥२॥ प्रसारण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः । गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः ॥ ३ ॥ क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् । महाशाल्वणसंज्ञोऽयं योगः सर्वानिलार्तिजित् ॥ ४ ॥

॥ अथ स्वेदलेपविधिः ॥

तक्षयित्वा क्षुरेणाङ्गं केवलानिलपीडितम् । तत्र प्रदेहं दद्याच्च पिष्ट्वा गुञ्जाफलैः कृतम् ॥ १ ॥ तेनाववाहुजा पीडा विश्वाची गृध्रसी तथा । अन्यापि वातजा पीडा प्रशमं याति वेगतः ॥ २ ॥ इति स्वेदलेपविधिः ॥

॥ अथ वातहा पोटली ॥

पुन्नागैरण्डबिम्बैर्बकुलधनदहृन्नारिकेलैः करञ्जैः कार्पासैः शिग्रुडोलाफलसुनिषण्णकैः सर्षपाङ्कोलबीजैः । रास्नाकुष्ठैः कुलत्थैस्तिललशुनवचाहिङ्गुसिद्धार्थविश्वैः सर्वैः स्नेहैः कृतं तत्सकलपटु युतं पोटलं वातभञ्जि ॥ १ ॥ इति योगसारात् ॥

॥ अथ शार्ङ्गधराल्लशुनकल्कः ॥

पक्वकन्दरसोनस्य गुलिका निस्तुषीकृताः । पाटयित्वा च मध्यस्थं दूरीकुर्यात्तदङ्कुरम् ॥१॥ तदुग्रगन्धनाशाय रात्रौ तक्रे विनिक्षिपेत् ॥ अपनीय च तन्मध्याच्छिलायां पेषयेत्ततः ॥२॥ तन्मध्ये पञ्चमांशेन चूर्णमेषां विनिक्षिपेत् । सौवर्चलं यवानी च भर्जितं हिङ्गु सैन्धवम् ॥ ३ ॥ कटुत्रिकं जीरकं च समभागानि चूर्णयेत् । एकीकृत्य ततः सर्वं कल्कं कर्षप्रमाणतः ॥ ४ ॥ खादेदग्निबलापेक्षी ऋतुदोषाद्यपेक्षया । अनुपानं ततः कुर्यादेरण्डस्रुतमन्वहम् ॥ ५ ॥ सर्वाङ्गैकाङ्गजं वातमर्दितं चापतन्त्रकम् । अपस्मारं तथोन्मादमूरुस्तम्भं च गृध्रसीम् ॥ ६ ॥ उरःपार्श्वकटीपार्श्वकुक्षिपीडाकृमीञ्जयेत् । अजीर्णमातपं रोषं तप्तनीरं पयो गुडम् ॥७॥ रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् । मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः ॥ ८ ॥ अन्यच्च । शुद्धः कल्को रसोनस्य तिलतैलेन मिश्रितः । वातरोगाञ्जयेत्तीव्रान्विषमज्वरनाशनः ॥ १ ॥ इति लशुनकल्कः ॥

॥ अथैरण्डपाकः ॥

वातारिबीजमस्थं तु सुपक्वं निस्तुषीकृतम् । क्षीरद्रोणार्धसंयुक्तं भिषङ् मन्दाग्नि-

ना पचेत् ॥१॥ घृतप्रस्थार्धयुक् पक्कं खण्डप्रस्थद्वयं क्षिपेत् । त्र्यूषणं सचतुर्जातं ग्रन्थिकं वह्निचव्यकम् ॥ २ ॥ छत्रा मिशिः शटी बिल्वदीप्यौ जीरे निशायुगम् । अश्वगन्धा बला पाठा हपुषा वेल्लपुष्करम् ॥ ३ ॥ श्वदंष्ट्रारुग्वरादारुवेल्लपर्यावालुकावरी । एतानि पिचुमात्राणि चूर्णितानि विनिक्षिपेत् ॥ ४ ॥ वातव्याधींश्च शूलं च शोफं वृद्धिं तथोदरम् । आनाहं बस्तिरुग्गुल्ममामवातं कटिग्रहम् ॥ ऊरुग्रहं हनुस्तम्भं नाशयेदपि योगतः ॥ ५ ॥ इत्यैरण्डपाकः ॥

॥ अथ रसाः ॥

शार्ङ्गधरात् स्वच्छन्दभैरवरसः ॥ शुद्धसूतं मृतं लोहं ताप्यं गन्धं च तालकम् । पथ्याग्निमन्थनिर्गुण्डीत्र्यूषणं टङ्कणं विषम् ॥ १ ॥ तुल्यांशं मर्दयेत् खल्वे दिनं निर्गुण्डिकाद्रवैः । मुण्डीद्रावैर्दिनैकं तु द्विगुञ्जं वटकीकृतम् ॥ २ ॥ भक्षयेद्वातरोगार्तो नाम्ना स्वच्छन्दभैरवः । रास्नामृतादेवदारुशुण्ठीवातारिजं शृतम् ॥ सगुग्गुलं पिबेत्कोष्णमनुपानं सुखावहम् ॥ ३ ॥ इति स्वच्छन्दभैरवः ॥ अथ समीरपन्नगः । अभ्रगन्धविषव्योषरसटङ्कान्समांशकान् । भावयेत्सप्तधा भृङ्गरसेन स्यात्समीरहा ॥ १ ॥ आर्द्रद्रवेण वल्लो वा खण्डव्योषेण योजितः । महावाताञ्जयत्याशु नासाध्मातः सुसंज्ञकृत् ॥ २ ॥ अथ वातविध्वंसनो रसः ॥ रसं गन्धकं नागवङ्गं च लोहं तथा ताम्रजं व्योम निश्चन्द्रिकं च । कणा टङ्कणं त्र्यूषणं नागरं वै पृथग् भागमेकं विमर्द्यैकयामम् ॥१॥ ततो वत्सनाभं चतुःसार्धभागं दृढं मर्दयेद्भावना व्योपसंज्ञां । वराचित्रकैर्मार्कवैः कुष्ठजाद्रिस्त्रिभिर्भावयेन्निर्गुंडीभानुदुग्धैः ॥ २ ॥ महीधात्रिकाचन्द्रिकानिम्बुनीरैः समं भावयेद्वातविध्वंसनोऽयम् । समीरे च शूले महाश्लेष्मरोगे ग्रहण्यां तथा सन्निपाते च सर्वे ॥ स्त्रियाः सूतिकावातरोगेषु दद्यान्निषेवेत गुञ्जाद्वयं सूतमेनम् ॥ ३ ॥ इति वातविध्वंसनो रसः ॥ अथ वातराक्षसरसः ॥ मृतं सूतं तथा गन्धं कान्तं चाभ्रकमेव च । ताम्रभस्मकृतं सम्यग् मर्दयित्वा समांशकम् ॥ १ ॥ पुनर्नवागुडूच्यग्निसुरसात्र्यूषणं तथा । एतेषां स्वरसेनैव भावयेत्त्रिदिनं पृथक् ॥ २ ॥ दत्वा लघुपुटं सम्यक् स्वाङ्गशीतं समुद्धरेत् । वातराक्षसनामायं वातरोगे प्रयोजयेत् ॥ ३ ॥ तत्तद्रोगानुपानेन द्विगुञ्जामात्रसेवनात् । ऊरुस्तम्भे वातरक्ते गात्रभङ्गे तथैव च ॥४॥ आमवातं धनुर्वातं वेदनावातमेव च । पक्षाघातं कम्पवातं सर्वसन्धिगतं तथा ॥ ५ ॥ सुप्तिवातं च शूलं च उन्मादं च विनाशयेत् । तत्तद्रोगानुपानेन वाताशीतिविनाशनः ॥ ६ ॥ इति रससारसंग्रहे वातराक्षसरसः ॥ अथ धनुर्वाते सूतिकाभरणरसः ॥ सुवर्णं रजतं ताम्रं प्रवालं पारदं समम् । गन्धकं चाभ्रकं तालं शिला त्रिकटु रोहिणी ॥ १ ॥ एतानि समभागानि रविक्षीरेण मर्दयेत् । चित्रमूलकषायेण पुनर्नवारसेन च ॥ २ ॥ दिनं गजपुटे पाच्यं मूषायां धारयेत् पृथक् । अनुपानविशेषेण देयं गुञ्जार्धकं च तत् ॥ ३ ॥ सूतिकारोगमतुलं धनुर्वातं

---

१ (च०) धात्र्या। २ (च०) मनो—

विशेषतः । त्रिदोषोत्थान् हरेद्व्याधीनिच्छापथ्यं प्रदापयेत् ॥ सूतिकाभरणं नाम सर्वरोगहरं च तत् ॥ ४ ॥ अथ वातरोगे प्रतापाग्निकुमारो रसः ॥ पारदं शुल्वजं भस्म विषं मरिचनागरम् । त्रिक्षारं पञ्चलवणमेभिर्मर्द्याद्र्रकद्रवैः ॥ १ ॥ काचकूप्यन्तरे क्षिप्त्वा मृदा संलेपयेद्बहिः । शनैर्मृद्वग्निना पाच्यं वालुकायन्त्रके दिनम् ॥ २ ॥ स्वाङ्गशीतलमुद्धृत्य दशांशं च विषं क्षिपेत् । सूक्ष्मचूर्णं कृतं खल्वे गुञ्जामात्रं प्रदापयेत् ॥ ३ ॥ सन्निपातान्निहन्त्याशु आर्द्रकद्रवसंयुतः । प्रतापाग्निकुमारोऽयं सर्ववातहरः परम् ॥ ४ ॥ अथ प्रसूतवाते लक्ष्मीनारायणरसः ॥ शुद्धगन्धकमेतच्च टङ्कणं विषहिङ्गुलम् । रोहिण्यतिविषाकृष्णावत्सकाभ्रकसैन्धवम् ॥ १ ॥ एतानि समभागानि खल्वमध्ये विनिक्षिपेत् । दन्तिद्रावैः फलद्रावैर्मर्दयेच्च दिनत्रयम् ॥२॥ वल्लद्वयां वटीं कृत्वा आर्द्रकस्य जलैर्ददेत् । दोषज्वरे सन्निपाते विषूच्यां विषमज्वरे ॥ ३ ॥ अतिसारे ग्रहण्यां च रक्तामे मेहशूलजित् । सूतिकावातदोषघ्नो लङ्केशमिव राघवः ॥ ४ ॥ इष्टान्नं भोजयेत्पथ्यमभ्यङ्गं स्नानमाचरेत् । कर्पूरमिश्रताम्बूलं प्रसूनं हरिचन्दनम् ॥५॥ नारिकेलोदकं पीत्वा नारीणां संगमेव च । लक्ष्मीनारायणो नाम रसानामुत्तमो रसः ॥ ६ ॥ इति रसाः ॥

॥ अथ पथ्यापथ्यम् ॥

कुलत्थमाषगोधूमाः रक्ताभाः शालयो हिताः । पटोलं शिग्रुवार्ताकं दाडिमं च परूषकम् ॥ १ ॥ मत्स्यपिण्डिका घृतं दुग्धं किलाटं दधिकूर्चिका । वदरं लशुनं द्राक्षा ताम्बूलं लवणं तथा ॥ २ ॥ चटकः कुक्कुटो बर्हीं तित्तिरश्चेति जाङ्गलाः । शिलीन्द्रः पर्वतो नक्रो गर्गरः खुडिशो झषः ॥ ३ ॥ यथाश्रयं यथावस्थं यथाचरणमेव च । वातव्याधौ समुत्पन्ने पथ्यमेतन्नृणां भवेत् ॥ ४ ॥ चिन्ताप्रजागरणवेगविधारणानि छर्दिःश्रमोऽनशनता चणकाः कलायाः । श्यामाकचूर्णकुरुबिन्दुनिवारकङ्गुमुद्गास्तडागतटिनीसलिलं करीरम् ॥ ५ ॥ क्षौद्रं कषायकटुतिक्तरसा व्यवायो हस्त्यश्वयानमपि चङ्क्रमणं च खट्वा । आध्मानिनोऽर्दितवतोऽपि पुनर्विशेषात्स्नानं प्रदुष्टसलिलैर्द्विजघर्षणं च ॥ ६ ॥ निःशेषतस्त्वपरिकीर्तित एष वर्गो नृणां समीरणगदेषु मुदं न दत्ते ॥ ७ ॥ इति पथ्यापथ्यविधिः ॥ वातरोगस्त्वसाध्योऽयं दैवयोगात्सुसिध्यति । अनुमानेन कुर्वन्ति वैद्यकं न प्रतिज्ञया ॥ ८ ॥ वातरोगचिकित्सा समाप्ता ॥

॥ अथ वातरक्तनिदानम् ॥

कृतं तावत्समासेन वातव्याधिनिरूपणम् । वातव्याधिप्रसङ्गेन वातरक्तं निरूप्यते ॥ १ ॥ लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः । क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः ॥ २ ॥ कुलत्थमाषनिष्पावशाकादिपललेक्षुभिः । दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥ ३ ॥ विरुद्धाध्यशनक्रोधदिवास्वप्नप्रजागरैः । प्रायशः सुकु-

माराणां मिथ्याहारविहारिणाम् ॥ स्थूलानां सुखिनां चापि प्रकुप्येद्वातशोणितम् ॥४॥ तस्य संप्राप्तिमाह ॥ हस्त्यश्वोष्ट्रैर्गच्छतोऽन्यैश्च वायुः कोपं प्राप्तः कारणैः सेवितैः स्वैः । तीक्ष्णोष्णाम्लैः क्षारशाकादिभोज्यैः सन्तापाद्यैर्भूयसा सेवितैश्च ॥ १ ॥ शीघ्रं रक्तं दुष्टिमायाति तच्च वायोर्मार्गं संरुणद्ध्याशु जातः । क्रुद्धोऽत्यर्थं मार्गरोधात्स वायुरत्युद्रिक्तं दूषयेद्रक्तमाशु ॥ २ ॥ कृत्स्नं रक्तं निर्दहत्याशु दुष्टं स्रस्तं शीघ्रं पादयोश्चीयते तु । तत्सम्पृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तम् ॥ तद्वत्पित्तं दूषितेनासृजाक्तं श्लेष्मा दुष्टो दूषितेनासृजाक्तः ॥ ३ ॥ क्रुद्धो रुद्धगतिर्मरुत्प्रकुपितेनास्रेण सन्दूष्यते प्राप्यादौ तदनु प्रधावति वपुः कण्डूर्तिसुप्त्यादयः । जायन्ते करपादसन्धिषु मुहुर्वातास्रमेतत्कफे क्रुद्धो दोषवदादिशेत्तु विषवत्कृत्स्नं वपुर्धावति ॥४॥ स्पर्शोद्विग्नौ तोदभेदप्रशोषस्वापोपेतौ वातरक्तेन पादौ । पित्तासृग्भ्यामुग्रदाहौ भवेतामत्यर्थोष्णौ रक्तशोथौ मृदू च ॥ ५ ॥ कण्डूमन्तौ श्वेतशीतौ सशोफौ पीनस्तब्धौ श्लेष्मदुष्टे च रक्ते । सर्वैर्दुष्टे शोणिते चापि दोषाः स्वं स्वं रूपं पादयोर्दर्शयन्ति ॥ ६ ॥ अथ तस्य पूर्वरूपमाह ॥ स्वेदोऽत्यर्थं न वा कार्ष्ण्यं स्पर्शाज्ञत्वं क्षतेऽतिरुक् । सन्धिशैथिल्यमालस्यं सदनं पिटिकोद्गमः ॥ १ ॥ जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु । निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव च ॥ २ ॥ कण्डूः सन्धिषु रुग् दाहो भूत्वा नश्यति चासकृत् । वैवर्ण्यं मण्डलोत्पत्तिर्वातासृक्पूर्वलक्षणम् ॥ ३ ॥ दोषान्तरसंसर्गेण कारणमाह । तत्र वाताधिकलक्षणम् ॥ वाताधिकेऽधिकं तत्र शूलस्फुरणतोदनम् । शोथश्च रौक्ष्यं कृष्णत्वं श्यावता॰वृद्धिहानयः ॥१॥ धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् । शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तताः ॥ २ ॥ अथ रक्ताधिकलक्षणमाह ॥ रक्ते शोथोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते । स्निग्धरूक्षैः शमं नैति कण्डूक्लेदसमन्वितः ॥ १ ॥ अथ पित्ताधिकमाह ॥ पित्ते विदाहः सम्मोहः स्वेदो मूर्च्छा मदस्तृषा । स्पर्शासहत्वं रुग्दाहः शोथः पाको भृशोष्णता ॥ १ ॥ अथ कफाधिकमाह ॥ कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः ॥ अथ द्वन्द्वलक्षणम् ॥ कण्डूर्मन्दा च रुग् द्वन्द्वे ॥ अथ सन्निपातलक्षणमाह ॥ सर्वलिङ्गं च सङ्करे ॥ १ ॥ पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि । आखोर्विषमिव क्रुद्धं तद्देहमनुसर्पति ॥ २ ॥ अथैतस्यैवासाध्ययाप्यत्वमाह ॥ आजानुस्फुटितं यच्च प्रभिन्नं प्रस्रुतं च यत् । उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥ वातरक्तमसाध्यं स्याद्याप्यं संवत्सरोत्थितम् ॥१॥ अथ तस्योपद्रवानाह ॥ अस्वप्नारोचकश्वासमांसकोथशिरोग्रहः । संमूर्च्छा मदरुक्तृष्णा ज्वरमोहप्रलेपकाः ॥ १ ॥ हिक्कापाङ्गुल्यवैसर्पपाकतोदभ्रमक्लमाः । अङ्गुलीवक्रता स्फोटदाहमर्मग्रहार्बुदाः ॥ २ ॥ एतैरुपद्रवैर्युक्तं मोहेनैकेन वापि यत् । वातरक्तमसाध्यं स्याद्यच्चातिक्रान्तवत्सरम् ॥३॥ अकृत्स्नोपद्रवं

---

१ (च०) हग्माहः । २ (च०) मन्द । ३ (च०) वैवर्ण्यम् ।

याप्यं साध्यं स्यान्निरुपद्रवम् । एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ॥ त्रिदोषजमसाध्यं स्याद्यस्य च स्युरुपद्रवाः ॥ ४ ॥ इति वातरक्तनिदानम् ॥

॥ अथ वातरक्तचिकित्सा ॥

वातरक्तं द्विधा ज्ञेयं गम्भीरोत्तानभेदतः । त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयम् ॥ १ ॥ कालातिक्रान्तमेतत्तु कष्टं भवति दुर्धरम् । विरेकास्थापनस्नेहैर्गम्भीरं तदुपाचरेत् ॥ २ ॥ उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः । वाताधिकं वातरक्तं स्नेहाद्यैः समुपाचरेत् ॥ ३ ॥ रक्ताढ्यं रक्तमोक्षाद्यैः पित्ताढ्यं रेचनादिभिः । कफाढ्यं वमनाद्यैश्च प्रोक्तैरत्रौषधैर्भिषक् ॥ ४ ॥ संसर्गे सन्निपाते च क्रियां मिश्रां समाचरेत् । वातरक्ते द्वित्रिलिङ्गे द्वित्रिहेतुसमुत्थिते ॥ ५ ॥ वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् । अल्पाल्पं रक्षता युक्तं यथादोषं यथाबलम् ॥ ६ ॥ सर्वत्रास्रक्स्रुतिः सूचीजलूकागृङ्ग्यलाबुभिः । शतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ॥ ७ ॥ रूक्षैर्वामृदुभिः शस्तमसकृद्बस्तिकर्म च । न हि बस्तिसमं किञ्चिद्वातरक्ते चिकित्सितम् ॥ ८ ॥

॥ अथ क्वाथाः ॥

अथ वासादिक्काथः । वासागुडूचीचतुरङ्गुलानामेरण्डतैलेन पिबेत्कषायम् । क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विकारम् ॥ १ ॥ योगशतात् ॥ अथ नवकार्षिकक्काथः॥ दार्वीगुडूचीकटुकोग्रगन्धामञ्जिष्ठनिम्बत्रिफलाकषायः। वातास्रमुख्यैर्नवकार्षिकाख्यो जयेच्च कुष्ठानखिलान्नराणाम्। पञ्चतिक्तकषायेण योजयेन्नवकार्षिकम् ॥१॥ इति सारसङ्ग्रहान्नवकार्षिकक्काथः॥ अथ गुडूच्यादिः। वत्सादन्युद्भवः क्काथः पीतो गुग्गुलुमिश्रितः। समीरेण समायुक्तं शोणितं संप्रणाशयेत् ॥ १ ॥ इति गुडूच्यादिः कदम्बात् ॥ अथ काश्मर्यादिः ॥ पित्तोत्तरे तु काश्मर्यद्राक्षारग्वधचन्दनैः । मधुकक्षीरकाकोलीयुक्तैः क्काथं सुशीतलम् ॥ शर्करामधुसंयुक्तं वातरक्ते पिबेन्नरः ॥१॥ इति योगतः । अथ पटोलादिः । पटोलत्रिफलाभीरुकटुकामृतसाधितम् । क्काथं पीत्वा जयत्याशु सदाहं वातशोणितम् ॥ १ ॥ इति वृन्दात् ॥ अथ कोकिलादिः ॥ कोकिलाक्षामृताक्काथं पिबेत्कोष्णं यथाबलम् । पथ्यभोजी त्रिसप्ताहान्मुच्यते वातशोणितात् ॥ १ ॥ इति वृन्दात् ॥ अथ लघुमञ्जिष्ठादिः ॥ मञ्जिष्ठा त्रिफला तिक्ता वचा दारु निशामृता । निम्बश्चैषां कृतः क्काथो वातरक्तविनाशनः ॥ पामाकपालिकाकुष्ठरक्तमण्डलजिन्मतः ॥ १ ॥ इति शार्ङ्गधरात् ॥ अथ बृहन्मञ्जिष्ठादिः ॥ मञ्जिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः । भार्गीक्षुद्रावचानिम्बनिशाद्वयफलत्रिकैः ॥ १ ॥ पटोलकटुकामूर्वाविडङ्गासनचित्रकैः । शतावरीत्रायमाणाकृष्णेन्द्रयववासकैः ॥ २ ॥ भृङ्गराजमहादारुपाठाखदिरचन्दनैः । त्रिवृद्वरुणकैरातबाकुचीकृतमालकैः ॥ ३ ॥ शाखोटकमहानिम्बकरञ्जातिविषाजलैः । इन्द्रवारुणिकानन्तासारिवापर्पटैः समैः

---

१ (च०) कुष्ठम् ।

॥ ४ ॥ एभिः कृतं पिबेत्क्वाथं कणागुग्गुलुसंयुतम् । अष्टादशेषु कुष्ठेषु वातरक्ता-र्दिते तथा ॥ ५ ॥ उपदंशे श्लीपदे च प्रसुप्तौ पक्षघातके । मेदोदोषे नेत्ररोगे मञ्जिष्ठादिः प्रशस्यते ॥ ६ ॥ इति बृहन्मञ्जिष्ठादिः शार्ङ्गधरात् ॥ इति क्वाथाः ॥

॥ अथ गुग्गुलू ॥

तत्र प्रथमस्तु कैशोरगुग्गुलुः । त्रिफलायास्त्रयः प्रस्थाः प्रस्थैकममृता भवेत् । संक्षुद्य लोहपात्रे तु सार्धद्रोणाम्बुना पचेत् ॥१॥ जलमर्धं शृतं ज्ञात्वा गृह्णीयाद्वस्त्रगालितम् । ततः क्वाथे क्षिपेच्छुद्धं गुग्गुलुं प्रस्थसम्मितम् ॥२॥ पुनः पचेदयस्पात्रे दर्व्या संघट्टये-न्मुहुः । सान्द्रीभूतं च तं ज्ञात्वा गुडपाकसमाकृतिम् ॥ ३ ॥ चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत् । त्रिफला द्विपला ज्ञेया गुडूची पलिका मता ॥ ४ ॥ षडक्षं त्र्यूषणं प्रोक्तं विडङ्गं च पलार्धकम् । दन्ती कर्षमिता कार्या त्रिवृत्कर्षमिता स्मृता ॥ ५ ॥ ततः पिण्डीकृतं सर्वं घृतभाण्डे विनिक्षिपेत् । गुटिकाः शाणिकाः कृत्वा युञ्ज्याद्दोषाद्यपेक्षया ॥ ६ ॥ अनुपानं भिषग् दद्यात्कोष्णं नीरं पयोऽथवा । मञ्जिष्ठा-दिशृतं वापि युक्तियुक्तमतः परम् ॥ ७ ॥ जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजम् । सर्वव्रणांश्च गुल्मांश्च प्रमेहपिटकास्तथा ॥८॥ प्रमेहोदरमन्दाग्निकासश्वयथुपाण्डुताः । हन्ति सर्वामयान्नित्यमुपयुक्तो रसायनः ॥ ९ ॥ कैशोरकाभिधानोऽयं गुग्गुलुः कान्तिकारकः । वासादिना नेत्रगदान् गुल्मादीन्वरुणादिना ॥ १० ॥ क्वाथेन खदि-रस्यापि व्रणान्कुष्ठान्विनाशयेत् । आम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपम् ॥ मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः ॥११॥ इति शार्ङ्गधरात् कैशोरगुग्गुलुः ॥ अथामृतगुग्गुलुः ॥ वृन्दात् ॥ प्रस्थमेकं गुडूच्याश्च सार्धप्रस्थं तु गुग्गुलोः । प्रत्येकं त्रिफलायाश्च तत्प्रमाणं विनिर्दिशेत् ॥ १ ॥ सर्वमेकत्र संक्षिप्य क्वाथयेन्नल्वणेऽ-म्भसि । पादशेषं परिश्राव्य कषायं ग्राहयेद्भिषक् ॥ २ ॥ पुनः पचेत्कषायं तु याव-त्सान्द्रत्वमाप्नुयात् । दन्तीव्योषविडङ्गानि गुडूचीत्रिफलात्वचः ॥ ३ ॥ ततश्चार्ध-पलं पूतं गृह्णीयाद्वा प्रति प्रति । कर्षं तु त्रिवृतायाश्च सर्वमेकत्र चूर्णयेत् ॥ ४ ॥ तस्मिन्सुसिद्धं विज्ञाय कोष्णं पात्रे विनिक्षिपेत् । ततश्चाग्निबलं दृष्ट्वा तस्य मात्रां प्रयोजयेत् ॥ ५ ॥ वातरक्तं तथा कुष्ठं गुदजानग्निसादनम् । दुष्टव्रणं प्रमेहं च आमवातभगन्दरान् ॥ ६ ॥ नाड्याढ्यवाताञ्श्वयथून्सर्वान् वातान्व्यपोहति । अ-श्विभ्यां निर्मितः पूर्वममृताद्यश्च गुग्गुलुः ॥ ७ ॥ इति गुग्गुलू ॥

॥ अथ तैलानि ॥

अथ लघुमरिचाद्यं तैलम् । मरिचालशिलार्कपयःकलिनीविषमुष्टिविषामरनिम्ब-घनैः । कुटजं सचतुर्गुणगोऽम्बुसृतं किल तैलमसृक्पवनापहरम् ॥ १ ॥ अथ बृहन्म-रिचाद्यं तैलम् ॥ मरिचं त्रिवृता दन्ती क्षीरमार्कं शकृद्रसः । देवदारु हरिद्रे द्वे मां-सी कुष्ठं सचन्दनम् ॥ १ ॥ विशाला करवीरं च हरितालं मनःशिला । चित्रकं ला-

---

१ (च०) परिश्राव्य । २ (च०) नाड्याढ्य । ३ (च०) घनैः । ४ (च०) सृतम् ।

कुली चापि विडङ्गं चक्रमर्दकम् ॥ २ ॥ शिरीषं कुटजो निम्बः सप्तपर्णामृता स्नुही । शम्याको नक्तमालश्च खदिरः पिप्पली वचा ॥ ३ ॥ ज्योतिष्मती च पलिका विषस्य द्विपलं मतम् । आढकं कटुतैलस्य गोमूत्रं च चतुर्गुणम् ॥ ४ ॥ मृत्पात्रे लोहपात्रे वा शनैर्मृद्वग्निना पचेत् । एतत्तैलं विशेषेण नाशयेत्कुष्ठजान्व्रणान् ॥ वातरक्तभवान्व्याधीन्पामाविस्फोटचर्चिकाम् ॥ ५ ॥ इति सारसंग्रहात् ॥ अथ पिण्डतैलं शार्ङ्गधरात् ॥ मञ्जिष्ठासारिवासर्जयष्टीसिक्थपयोन्वितैः । पिण्डाख्यं साधयेत्तैलमभ्यङ्गाद्वातरक्तनुत् ॥ १ ॥ अथ वृन्दात् सारिवादितैलम् ॥ सारिवासर्जयष्ट्याह्वमधूच्छिष्टपयोन्वितैः । सिद्धमेरण्डजं तैलमभ्यङ्गाद्वातरक्तनुत् ॥१॥ अथ पद्मकाद्यादि तैलम् ॥ पद्मकोशीरयष्ट्याह्वं रजनीक्वाथसाधितम् । स्यात्पिष्टैः सर्जमञ्जिष्ठावीराकाकोलिचन्दनैः ॥ पद्मकाद्यमिदं तैलं वातासृग्दाहनाशनम् ॥ १ ॥ इति पद्मकाद्यादि वृन्दात् ॥ अथ गुडूच्यादि ॥ गुडूचीक्वाथकल्काभ्यां तैलं लाक्षारसेन वा । सिद्धं मधूककाश्मर्यरसे वा वातरक्तनुत् ॥ १ ॥ इति वृन्दात् ॥ अथ वृन्दात् शताह्वादि ॥ शताह्वया च कुष्ठेन मधुकेन नतेन वा । एकैकं साधितं तैलं वातरक्तरुजापहम् ॥ १ ॥ इति तैलानि ॥

॥ अथ घृतानि ॥

अथ शार्ङ्गधरादमृताद्यं घृतम् ॥ अमृताक्वाथकल्काभ्यां सक्षीरं विपचेद् घृतम् । वातरक्तं जयत्याशु कुष्ठं जयति दुस्तरम् ॥ १ ॥ अथ सारसङ्ग्रहान्महातिक्तं घृतम् ॥ भूनिम्बाम्बुदनिम्बवत्सककणात्रायन्त्यनन्तामृतातिक्ताभीरुफलत्रिकप्रतिविषामूर्वाविषालाजलैः । पाठापर्पटसारिवाद्वयनिशायुग्यष्टिकापद्मकैः सोशीरैः सपटोलचन्दनवचाशम्याकसप्तच्छदैः ॥ १ ॥ इत्येभिर्गदितैर्जलाष्टगुणितैः प्रस्थं पचेत्सर्पिषो गव्यस्यामलकीरसद्विगुणितं नाम्ना हि तिक्तं घृतम् । हन्त्येतद् गलगण्डमण्डलरुजं कण्डूंसपाण्ड्वामयां शोफश्लीपदवातरक्तविकृतीः कुष्ठानि चाष्टादश ॥ २ ॥ इति घृतानि ॥

॥ अथ योगादि ॥

छिन्नोद्भवाकषायेण सेव्यं शुद्धं शिलाजतु । पञ्चकर्मविशुद्धेन वातरक्तप्रशान्तये ॥ १ ॥ अथामृताद्यवलेहिका ॥ अमृता कटुका शुण्ठी यष्टीकल्कं समाक्षिकम् । गोमूत्रपीतं जयति सकफं वातशोणितम् ॥ १ ॥ अथ गुडूचीयोगः ॥ गुडूच्याः स्वरसं कल्कं चूर्णं वा क्वाथमेव च । प्रभूतकालमासेव्य मुच्यते वातशोणितात् ॥ १ ॥

॥ अथ लेपनम् ॥

ग्रन्थान्तरात् । प्रपौण्डरीकमञ्जिष्ठादार्वीमधुकचन्दनैः । सितोपलैलासक्तुश्च मसूरोशीरपद्मकैः ॥ १ ॥ लेपो रुग्दाहवीसर्परागशोफनिवारणः । लेपः[1] पिष्टा-

---

1 (च०) लेप्याः ।

स्तिलास्तद्वद्धृष्टाः पयसि निर्वृताः ॥ २ ॥ क्षीरपिष्टान्युपालेप्यान्येरण्डस्य फलानि च । कुर्याच्छूलनिवृत्त्यर्थं शताह्वां वाधिकेऽनिले ॥ ३ ॥ मूत्रक्षीरसुरासिद्धं घृतमभ्यञ्जने हितम् । सिद्धं समधुसूक्तं तु सेकाभ्यङ्गे कफोत्तरे ॥४॥ गृहधूमवचाकुष्ठशताह्वारजनीद्वयम् । प्रलेपः शूलनुद्वातरक्ते वातकफोत्तरे ॥ प्रभूतकालमासेव्य मुच्यते वातशोणितात् ॥ ५ ॥ अथ लेपनम् ॥ उभे शताह्वे मधुकं विशालां बलां प्रियालं च कसेरुयुग्मम् । घृतं विदारीं च सितोपलां च कुर्यात्प्रदेहं पवने सरक्ते ॥ १ ॥ सहस्रशतधौतेन घृतेन रुधिरोत्तरे । लेपनं चोष्मशीतेन घृतसर्जरसेन वा ॥२॥ आरनालाढके तैलं पादसर्जरसं शृतम् । प्रस्थस्थे निर्जिते तोये ज्वरदाहार्तिनुत्परम् ॥३॥ समधूच्छिष्टमञ्जिष्ठं ससर्जरससारिवा । पिण्डतैलं तथाभ्यङ्गाद्वातरक्तरुजापहम् ॥ ४ ॥ इति वातरक्ते ॥

॥ अथ पञ्चामृतरसः ॥

रसरत्नप्रदीपात् । पारदं च क्रियाशुद्धं तत्तुल्यं शुद्धगन्धकम् । अभ्रकं तु द्वयोस्तुल्यं त्रिभिस्तुल्यस्तु गुग्गुलुः ॥ १ ॥ सर्वांशममृतासत्त्वं भावयेदौषधैः पृथक् । निर्गुण्डीगोक्षुरच्छिन्नाकोकिलाक्षाङ्घ्रिजैं रसैः ॥ २ ॥ सप्तवारं ततो युञ्ज्याद्वातरक्ते त्रिवल्लकम् । कोकिलाक्षस्य मूलानां पानीयमनुपाययेत् ॥ ३ ॥ इति पञ्चामृतरसः ॥

॥ अथ पथ्यापथ्यम् ॥

यवषष्टिकनीवारकलमारुणशालयः । गोधूमाश्चणका मुद्रास्तुवर्योऽपि मकुष्ठकाः ॥ १ ॥ अव्यजामहिषीणां च गवामपि पयांसि च । उपोदिका काकमाची वेत्राग्रं सुनिषण्णकम् ॥ २ ॥ वास्तुकं कारवेल्लं च तण्डुलीयं पटोलकम् । धात्रीफलं शृङ्गबेरं सूरणं श्वेतशर्करा ॥ ३ ॥ मृद्वीका वृद्धकूष्माण्डनवनीतं नवं घृतम् । लावतित्तिरवर्तीकताम्रचूडविविष्किराः ॥ ४ ॥ प्रतुदाः शुकदात्यूहकपोतचटकादयः । शशिनागरुदेवाह्वसरलस्नेहमर्दनम् ॥ ५ ॥ तिक्तं च पथ्यमुद्दिष्टं वातरक्तगदे नृणाम् । दिवास्वप्नाग्निसंतापव्यायामातपमैथुनम् ॥ ६ ॥ माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् । अण्डजानूपमांसानि विरुद्धानि दधीनि च ॥ ७ ॥ इक्षवो मूलकं मद्यं ताम्बूलं काञ्जिकं तिलान् । कटूष्णं गुर्वभिष्यन्दि लवणानि च सक्तवः ॥ एतानि वातरक्तेषु नैव युञ्ज्याद्भिषग्वरः ॥ ८ ॥ इति वातरक्तचिकित्सा ॥

॥ अथोरुस्तम्भनिदानमाह ॥

शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः । जीर्णाजीर्णैस्तथायाससंक्षोभस्वप्नजागरैः ॥१॥ सश्लेष्ममेदःपवनमाममत्यर्थसंचितम् । अभिभूयेतरं दोषमूरू चेत्प्रतिपद्यते ॥ २ ॥ सक्थ्यस्थीनि प्रपूर्यान्तः श्लेष्मणा स्तिमितेन च । तदा कफान्वितेनोरू स्तब्धौ शीतावचेतनौ ॥ ३ ॥ परकीयाविव गुरू स्यातामतिभृशव्यथौ । ध्यानाङ्गमर्दस्तैमित्यतन्द्रा-

---

१ (च०) स्तभ्नाति तेनोरू । २ (च०) ध्याना— ।

छर्दयरुचिज्वरैः ॥ ४ ॥ संयुक्तः पादसदनकृच्छ्रोद्धरणसुप्तिभिः । तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ॥ ५ ॥ प्राग्रूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः । रोमहर्षोऽरुचिश्छर्दिर्जङ्घोर्वोः सदनं तथा ॥ ६ ॥ वातशङ्किभिरज्ञानात्तस्य स्यात्स्नेहनात्पुनः । पादयोः सदनं सुप्तिः कृच्छ्राद्उद्धरणं तथा ॥ ७ ॥ जङ्घोरुग्लानिरत्यर्थं शश्वच्चादाहवेदनाः । पदं च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च ॥ ८ ॥ संस्थाने पीडने गत्यां चलने चाप्यनीश्वरः । अन्यस्येव हि सम्भग्नावूरू पादौ च मन्यते ॥ ९ ॥ ऊर्वोर्व्यथा च पारुष्यं तन्द्रा स्तैमित्यमङ्गरुक् । पादस्योद्धरणं कृच्छ्रात्तमूरुस्तम्भमादिशेत् ॥ १० ॥ यदा दाहार्तितोदार्तो वेपनः पुरुषो भवेत् । ऊरुस्तम्भस्तदा हन्यात्साधयेदन्यथा नवम् ॥ ११ ॥ इत्यूरुस्तम्भनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

स्नेहासृक्स्राववमनबस्तिकर्म च रेचनम् । वर्जयेदाढ्यवातेषु तैश्च तस्य विरोधतः ॥ १ ॥ तस्मादत्र सदा कार्यं स्वेदलङ्घनरूक्षणम् । आममेव कफाधिक्यान्मारुतं परिरक्षता ॥ २ ॥ यत्स्यात्कफप्रशमनं न च मारुतकोपनम् । तत्सर्वं सर्वदा कार्यमूरुस्तम्भस्य भेषजम् ॥ ३ ॥ सर्वौषधक्रमः कार्यस्तत्रादौ कफनाशनः । पश्चाद्वातविनाशाय कृत्स्ना कार्या क्रिया यथा ॥ ४ ॥ रूक्षणाद्वातकोपाच्च निद्रानाशार्तिसुप्तिका । स्नेहस्वेदक्रमस्तत्र कार्यो वातामयापहः ॥ ५ ॥ प्रतारयेत्प्रतिस्रोतो नदीं शीतजलाशयम् । सरश्चैवामलं शीतं स्थिरतोयं पुनः पुनः ॥६॥ तथा विशुष्केऽस्य कफे शान्तिमूरुग्रहो व्रजेत् । शरीरं बलमग्निं च कार्यैषा रक्षतामयम् ॥ ७ ॥

॥ अथ क्वाथचूर्णकल्कादि ॥

अथ पुनर्नवादिक्वाथः॥ पुनर्नवानागरदारुपथ्याभल्लातकच्छिन्नरुहाकषायः। दशाङ्घ्रिमिश्रः परिपेय ऊरुस्तम्भेऽथवा मूत्रपुरः प्रयोगः ॥१॥ अथ ग्रन्थिकादिक्वाथः॥ ग्रन्थिकारुष्ककृष्णानां क्वाथं क्षौद्रान्वितं पिबेत्। चव्याभयाग्निदारूणां कल्कं वा मधुसंयुतम् ॥ १ ॥ अथ पिप्पल्यादिक्वाथः ॥ पिप्पलीं वर्धमानां वा माक्षिकेण गुडेन वा ऊरुस्तम्भे प्रशंसन्ति गण्डीरारिष्टमेव च ॥१॥ अथ त्रिफलादि चूर्णम् ॥ त्रिफलाचव्यकटुकाग्रन्थिकं मधुना लिहेत् । ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत् ॥ १॥ अथ शिलाजत्वादियोगः ॥ शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम् । ऊरुस्तम्भे पिबेन्मूत्रैर्दशमूलीरसेन वा ॥१॥ अथ पिप्पल्यादिकल्कः ॥ पिप्पली पिप्पलीमूलं भल्लातकफलानि च । कल्कं मधुयुतं पीत्वा ऊरुस्तम्भात्प्रमुच्यते ॥ १ ॥ अथ त्रिफलादियोगः ॥ लिह्याद्वा त्रिफलाचूर्णं क्षौद्रेण कटुकायुतम् । सुखाम्बुना पिबेद्वापि चूर्णं षड्चरणं नरः ॥ १ ॥ अथ कुष्ठादि तैलम् ॥ कुष्ठं श्रीवेष्टकोदीच्यं सरलं दारु केशरम् । अजगन्धाश्वगन्धा च तैलं तैः सार्षपं पचेत् ॥ सक्षौद्रं मात्रया

---

१ (च०) मलम् ।

वस्मादूरुस्तम्भार्दितः पिबेत् ॥ १ ॥ अथ कट्वरतैलम् ॥ बलाभ्यां पिप्पलीमूलनागराद्दष्टकट्वरः । तैलप्रस्थः समो दध्ना गृध्रस्यूरुग्रहापहः ॥१॥ अष्टकट्वरतैलेन तैलं सार्षपमुच्यते । पिप्पलीनागरापाश्च प्रत्येकं द्विपलं स्मृतम् ॥ २ ॥ वृन्दात् ॥

॥ अथ स्वेदनलेपनसेचनानि ॥

सक्षारमूत्रस्वेदांश्च रूक्षान्यस्वेदनानि च । कुर्याद्विहेच्च मूत्राद्यैः करञ्जफलसर्षपैः ॥१॥ मूलैर्वाप्यश्वगन्धाया मूलैरर्कस्य वा भिषक् । पिचुमन्दस्य वा मूलैरथ वा देवदारुणा ॥ २ ॥ क्षौद्रसर्षपवल्मीकमृत्तिकासंयुतैर्भिषक् । गाढमुत्साधितं कुर्यादूरुस्तम्भे प्रलेपनम् ॥ ३ ॥ दन्तीद्रवन्तीसुरसासर्षपैश्चातिबुद्धिमान् । तर्कारीसुरसाशिग्रुबिल्ववत्सकनिम्बजैः ॥ पत्रमूलफलैस्तोयैः शृतमुष्णाम्बुसेचनम् ॥ ४ ॥

॥ अथ गुञ्जागर्भो रसः ॥

निष्कत्रयं शुद्धसूतं निष्कद्वादशगन्धकम् । गुञ्जाबीजं विषं निष्कं निम्बबीजं जया तथा ॥ १ ॥ प्रत्येकं निष्कमात्रं तु माषं जेपालबीजकम् । जातीजम्बीरधत्तूरकाकमाचीद्रवैर्दिनम् ॥ २ ॥ मर्द्य सर्वं वटीं कुर्याद्घृतैर्गुञ्जाद्वयं लिहेत् । गुञ्जागर्भो रसो नाम हिङ्गुसैन्धवसंयुतः ॥ समण्डं दापयेत्पथ्यमूरुस्तम्भप्रशान्तये ॥ ३ ॥ इति रससमुच्चयात् ॥

॥ अथ पथ्यापथ्यम् ॥

रूक्षः सर्वविधिः स्वेदः कोद्रवा रक्तशालयः । यवाः कुलत्थाः श्यामाका उद्दालाश्च पुरातनाः ॥ १ ॥ सौभाञ्जनं कारवेल्लं पटोलं वास्तुकं तथा । सुनिषण्णं काकमाची वेत्राग्रं तप्तवारि च ॥ २ ॥ जाङ्गलैरघृतैर्मांसैः शाकश्चालवणैर्हितैः । एतत्पथ्यं समुद्दिष्टमूरुस्तम्भविकारिणाम् ॥ ३ ॥ गुरुशीतद्रवस्निग्धविरुद्धासात्म्यभोजनम् । विरेचनं स्नेहनं च वमनं रक्तमोक्षणम् ॥ बस्तिं च न हितं प्राहुरूरुस्तम्भविकारिणाम् ॥ ॥ ४ ॥ इत्यूरुस्तम्भचिकित्सा ॥

॥ अथामवातनिदानप्रारम्भः ॥

अथ तस्य निदानपूर्वकसम्प्राप्तिमाह ॥ विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च । स्निग्धं भुक्तवतो ह्यन्नं व्यायामं चापि कुर्वतः ॥ १ ॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति । तेनात्यर्थं विदग्धोऽसौ धमनीः प्रतिपद्यते ॥ २ ॥ वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः । स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छिलः ॥ ३ ॥ जनयत्यग्निदौर्बल्यं हृदयस्य च गौरवम् । व्याधीनामाश्रयो ह्येष आमसंज्ञोऽतिदा-

---

* अथात्र लशुनम् प्रयोज्यम् ।

१ (च०) स्तु घृतैर्मांसैः ।

रुणः ॥ ४ ॥ अजीर्णाक्षरसो जातः क्रमशः सञ्चितश्च यः । आमसंज्ञां स लभते शिरोगात्ररुजाकरः ॥ ५ ॥ अथ तस्य रूपमाह ॥ युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ । स्तब्धं वा कुरुते गात्रमामवातः स उच्यते ॥ १ ॥ अथ तस्य लक्षणमाह अङ्गमर्दोऽरुचिस्तृष्णा ह्यालस्यं गौरवं ज्वरः । अपाकः शून्यताङ्गानामामवातस्य लक्षणम् ॥१॥ मन्यापृष्ठकटीजानुत्रिकसन्धीन् विकुञ्चयन् । सशब्दस्तस्तगात्रश्च आमवातः स उच्यते ॥ २ ॥ जठरानलदौर्बल्यादविपक्कस्तु यो रसः । स आमसंज्ञको देहे सर्वदोषप्रकोपनः ॥ ३ ॥ अथ तस्यैवोपद्रवानाह ॥ स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत् । हस्तपादशिरोगुल्फत्रिकजानूरुसन्धिषु ॥ १ ॥ करोति सरुजं शोफं यत्र दोषः प्रपद्यते । स देशो रुजतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः ॥ २ ॥ जनयेत्सोऽग्निदौर्बल्यं प्रसेकारुचिगौरवम् । उत्साहहानिं वैरस्यं दाहं च बहुमूत्रताम् ॥ ३ ॥ करोति ग्रहणीदोषं विशेषादामसंज्ञकम् । अपक्कं सृजते चान्नं केवलं चाममेव च ॥ ४ ॥ कुक्षौ कठिनता शूलं तथा निद्राविपर्ययम् । तृट्छर्दिभ्रममूर्च्छाश्च हृद्ग्राहं विड्विबन्धनम् ॥ जाड्यान्त्रकूजमानाहं कष्टांश्चान्यानुपद्रवान् ॥ ५ ॥ अथ पित्तादियुक्तस्य विशेषलक्षणमाह ॥ पित्तात्सदाहरागं च सशूलं पवनानुगम् । स्तैमित्यं गुरुकण्डूकं कफदुष्टं तमादिशेत् ॥१॥ अथ साध्यासाध्यत्वमाह ॥ एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते । सर्वदेहचरः शोथः सकृच्छ्रं सान्निपातिकः ॥ १ ॥ इत्यामवातनिदानम् ।

॥ अथ तच्चिकित्सा ॥

लङ्घनं स्वेदनं तिक्तदीपनानि कटूनि च । विरेचनं स्नेहपानं वस्तयश्चाममारुते ॥ १ ॥ रूक्षः स्वेदो विधातव्यो वालुकापोटलैस्तथा । उपनाहाश्च कर्तव्यास्तेऽपि स्नेहविवर्जिताः ॥ २ ॥

॥ अथ क्वाथाः ॥

अथ वृन्दात् । रास्नापञ्चकम् ॥ रास्नागुडूचिकैरण्डं देवदारु महौषधम् । पिबेत्सर्वाङ्गगे वाते सामे सन्ध्यस्थिमज्जगे ॥ १ ॥ अथ रास्नासप्तकम् ॥ रास्नामृतारग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम् । क्वाथं पिबेन्नागरचूर्णमिश्रं जङ्घोरुपृष्ठत्रिकपार्श्वशूली ॥ १ ॥ अथ रास्नाद्वादशकम् ॥ रास्ना शतावरी वासा गुडूच्यतिविषाभया । शुण्ठीदुरालभैरण्डदेवदारुवचाघनैः ॥ १ ॥ क्वाथः पीतो जयत्याशु आमवातं सुदारुणम् । कट्यूरुत्रिकजङ्घाङ्घ्रिगुल्फजानुसमाश्रितम् ॥ २ ॥ अथ शुण्ठ्यादिः ॥ शुण्ठीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः । आमवाते कटीशूले पाचनो रुक्प्रणाशनः ॥१॥ इति वृन्दात् ॥ अथ शठ्यादिः ॥ शटी शुण्ठ्यभया चोग्रा देवाह्वातिविषामृता । कषायमामवातस्य पाचनं रूक्षभोजिनाम् ॥ १ ॥ अथ पिपल्यादिः ॥ पिप्पलीपिप्पलीमूलं चव्यचित्रकनागरम् । क्वथितं वारयत्येतदामवातं सुदारुणम् ॥ १ ॥ अथ दश-

१ (च०) शूनता । २ (च०) कफजुष्टम् ।

मूलादियोगः ॥ दशमूलकषायमिश्रितं वा ललने विश्वकषायमिश्रितं वा । प्रपिबे-त्कटिकुक्षिवस्तिशूले ध्रुवमेरण्डजमेकमेव तैलम् ॥ १ ॥ इति वैद्यजीवनात् ॥ अथ रास्नादिपञ्चदशकम् ॥ रास्नामृतानागरदेवदारु पञ्चाङ्घ्रियुग्मेन्द्रयवैः कषायः । एर-ण्डतैलेन समन्वितोऽयं भेत्ता भवेदामसमीरणस्य ॥ १ ॥ इति वैद्यजीवनात् ॥ अथ महौषधादिर्वैद्यविलासात् । महौषधामृताभवः कषायकश्च सेवितः । हिनस्ति चाम-मारुतं चिराय सन्धिसंश्रितम् ॥ १ ॥ इति क्वाथाः ॥

॥ अथ चूर्णानि ॥

अथ भल्लातकादि ॥ भल्लाततिलपथ्यानां चूर्णं गुडसमन्वितम् । आमवातं कटी-शूलं हन्याद्वा गुडनागरम् ॥ १ ॥ अथाजमोदाद्यं चूर्णम् ॥ शार्ङ्गधरात् ॥ अजमोदा विडङ्गानि सैन्धवं देवदारु च । चित्रकः पिप्पलीमूलं शतपुष्पा च पिप्पली ॥ १ ॥ ॥ १ ॥ मरिचं चेति कर्षांशं प्रत्येकं कारयेद्बुधः । कर्षास्तु पञ्च पथ्यायाः दश स्युर्वृद्धदारकात् ॥ २ ॥ नागराच्च दशैव स्युः सर्वाण्येकत्र चूर्णयेत् । पिबे-त्कोष्णजलेनैतच्चूर्णं श्वयथुनाशनम् ॥ ३ ॥ आमवातरुजं हन्ति सन्धिपीडां च गृध्रसीम् । कटिपृष्ठगुदस्थां च जङ्घयोश्च रुजं जयेत् ॥ ४ ॥ तूनीप्रतूनीविश्वा-चीकफवातामयाञ्जयेत् । समेन वा गुडेनास्य वटकान्कारयेद्बुधः ॥ ५ ॥ अथ शार्ङ्गधरात्पञ्चसमचूर्णम् ॥ शुण्ठी हरीतकी कृष्णा त्रिवृत्सौवर्चलं तथा । समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत् ॥१॥ ज्ञेयं पञ्चसमं चूर्णमेतच्छूलहरं परम् । आध्मा-नजठरार्शोघ्नमामवातहरं स्मृतम् ॥ २ ॥ अथ फलत्रिकादि ॥ त्रिफला नागरं चैव सूक्ष्मचूर्णानि कारयेत् । मस्त्वारनालतक्रेण पयोमांसरसेन वा ॥ आमवातं निहन्त्याशु श्वयथुं संधिसंस्थितम् ॥१॥ अथ हिङ्ग्वादि ॥ हिङ्गुचव्यं विडं शुण्ठी कृष्णाजाजी स-पुष्करम् । भागोत्तरमिदं चूर्णम् पीतं वातामजिद्भवेत् ॥ १ ॥ अथ नागरादि ॥ कर्षं नागरचूर्णस्य काञ्जिकेन पिबेत्सदा । आमवातप्रशमनं कफवातविनाशनम् ॥ १ ॥ अथ पञ्चकोलादि ॥ पञ्चकोलकचूर्णं च पिबेदुष्णेन वारिणा । मन्दाग्निशूलगु-ल्मामकफारोचकनाशनम् ॥ १ ॥ अथ वैश्वानरचूर्णम् ॥ माणिमन्थस्य भागौ द्वौ यवक्षारश्च तत्समः । त्रयोऽजमोदाभागाश्च नागराद् भागपञ्चकम् ॥ १ ॥ दश द्वौ च हरीतक्याः सूक्ष्मचूर्णं कृतं शुभम् । मस्त्वारनालमूत्रैश्च सुरयोष्णोदकेन वा ॥ २ ॥ पीतं जयेच्चामवातं गुल्मह्रद्बस्तिजान् गदान् । प्लीहानमथ शूलादीनानाहं चार्शसां हितम् ॥ वातानुलोमनमिदं चूर्णं वैश्वानरं स्मृतम् ॥३॥ इति वृन्दात् ॥ अथ चित्रकादि वृ-न्दात् ॥ चित्रकं कटुका पाठा कलिङ्गातिविषामृताः । देवदारु वचा मुस्ता नागराति-विषाभयाः ॥ पिबेदुष्णाम्बुना नित्यं चूर्णमाममरुत्प्रणुत् ॥ १ ॥ अथालम्बुषादि ॥ अ-लम्बुषागोक्षुरकौ त्रिफला नागरामृता । यथोत्तरं भागवृद्ध्या श्यामाचूर्णं च तत्समम् ॥१॥ पिबेत्सुरामस्तुतक्रकाञ्जिकोष्णोदकेन वा । आमवातं जयत्याशु सशोफं वातशोणि-तम् ॥ २ ॥ इति वृन्दात् । इति चूर्णानि ॥

॥ अथ सिंहनादगुग्गुलुः ॥

पलत्रयं ना ताप्यस्य त्रिफलायाः सुचूर्णितम् । सौगन्धिकं पलं चैव कौशिकस्य पलं तथा ॥ १ ॥ कुडवं चारुबूकस्य तैलमादाय यत्नतः । पाचयेत्पार्कावद्वैद्यः पात्रे लोहमये दृढे ॥ २ ॥ हन्ति वातं तथा पित्तं श्लेष्माणं खञ्जपङ्गुताम् । श्वासं सुदुर्जयं हन्ति कासं पञ्चविधं तथा ॥ ३ ॥ कुष्ठानि वातरक्तं च गुल्मशूलोदराणि च । आमवातं जयेदेतदपि वैद्यैर्विवर्जितम् । ४ ॥ एतदभ्यासयोगेन जरापलितवर्जितम् सर्पिस्तैलरसोपेतमश्नीयाच्छालिषष्टिकम् ॥ ५ ॥ सिंहनाद इति ख्यातो रोगवारणदर्पहा । वह्नेर्वृद्धिकरः पुंसां भाषितो दण्डपाणिना ॥ ६ ॥ इति सिंहनादगुग्गुलुः ॥ अथान्यश्च बोपदेवकृतशतात् ॥ प्रत्येकं प्रस्थमेकं पुरत्रिफलमपां पाचयेत्सार्धराशौ तुर्यांशे तत्र पूते पुनरमरवराव्योपमुस्ताग्निवल्लैः । छिन्नोग्रामानकार्शोरिपुशवरित्रिवृत्सूतगन्धैः पलार्धैः साहस्रैर्दन्तिबीजैः कुटजवसुपलैः सिंहनादोऽनिलामे ॥ १ ॥

॥ अथ योगरत्नावल्या महारसोनपिण्डः ॥

तुला क्षुण्णरसोनस्य तदर्धं लुञ्चितास्तिलाः । पात्रे तु गव्यतक्रस्य पिष्टद्रव्यैः समं क्षिपेत् ॥ १ ॥ त्र्यूषणं धान्यकं चव्यं चित्रकं गजपिप्पली । अजमोदा त्वगेला च ग्रन्थिकं च पलांशकम् ॥ २ ॥ शर्करायाः पलान्यष्टौ पञ्चाजाज्याः पलानि च । कृष्णाजाज्याश्च चत्वारि राजिकायास्तथैव च ॥ ३ ॥ पलप्रमाणं दातव्यं हिङ्गोर्लवणपञ्चकम् । आर्द्रकस्य च चत्वारि सर्पिषोऽष्टौ पलानि च ॥ ४ ॥ तिलतैलस्य तावन्ति शुक्तस्यापि च विंशतिः । सिद्धार्थकस्य चत्वारि द्विगुणं मधुकस्य च ॥ ५ ॥ एकीकृत्य दृढे भाण्डे धान्यराशौ निधापयेत् । द्वादशाहात्समुद्धृत्य प्रातः खादेद्यथाबलम् ॥ ६ ॥ सुरां सौवीरकं चाथ मधु वापि पिबेन्नरः । जीर्णे यथेप्सितं भोज्यं दधिपिष्टकवर्जितम् ॥७॥ एकमासोपयोगेन सर्वव्याधिहरो भवेत् । अशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्तजाः ॥८॥ विंशतिः श्लेष्मजास्तद्वन्नश्यन्ते तस्य सेवनात् । योनिशूलं प्रमेहांश्च कुष्ठोदरभगन्दरान् ॥ अर्शोगुल्मक्षयांश्चापि जयेद्रुचिबलप्रदः ॥ ९ ॥ इति महारसोनपिण्डः ॥

॥ अथ घृतकल्कावलेहादि ॥

अथैरण्डजयोगः । विशोध्यैरण्डबीजानि पिष्ट्वा तत्पायसं पिबेत् । आमवाते कटीशूले गृध्रस्यां चौषधं परम् ॥ १ ॥ एरण्डबीजमज्जा समविश्वः शर्करासहितः । गुटीकृतः प्रभाते भुक्तः सामानिलं जयति ॥ २ ॥ आमवातगजेन्द्रस्य शरीरवनचारिणः । एक एवाग्रणीर्हन्ता एरण्डस्नेहकेसरी ॥३॥ कटीतटनिकुञ्जेषु सञ्चरन्वातकुञ्जरः । एरण्डतैलसिंहस्य गन्धमाघ्राय गच्छति ॥ ४ ॥ इत्यैरण्डजयोगः ॥ अथ शार्ङ्गधराच्छुण्ठीकल्कः ॥ शुण्ठीकल्कं विनिष्पिष्य रसैरेरण्डमूलजैः[1] । विपचेत्पुटपा-

---

१ (च०) स्वरसे रुबुमूलजैः ।

केन तद्रसः क्षौद्रसंयुतः ॥ आमवातसमुद्भूतां पीडां जयति दुस्तराम् ॥ १ ॥ अथ शुण्ठीघृतम् ॥ पुष्टयर्थं पयसा साध्यं दध्ना विण्मूत्रसंग्रहे । दीपनार्थं मतिमता मस्तुना च प्रकीर्तितम् ॥ १ ॥ सर्पिर्नागरकल्केन सौवीरं च चतुर्गुणम् । सिद्धमग्निकरं श्रेष्ठमामवातहरं परम् ॥ २ ॥ इति शुण्ठीघृतम् ॥ अथ खण्डशुण्ठ्यवलेहः ॥ नागरस्य तुलामेकां घृतस्य पलविंशतिः । क्षीरद्रोणार्धके पक्त्वा खण्डस्यार्धं शतं क्षिपेत् ॥१॥ व्योषं त्रिजातकं चैव केशरं पिप्पली जटा । जोङ्गकं जातिपत्रीकं जातीफलकचोरकम् ॥ २ ॥ अश्मभेदस्ताम्रभस्म वङ्गभस्म तथैव च । स्वर्णमाक्षिकमभ्रं च तथा लोहत्रयं क्षिपेत् ॥ ३ ॥ एतान्पृथक्पलान्भागान्प्रत्येकं चूर्णितं क्षिपेत् । मन्दानलविपक्वं तु लेहवत्साधु साधयेत् ॥ ४ ॥ बल्यं वर्ण्यं तथायुष्यं वलीपलितनाशनम् । आमवातप्रशमनं सौभाग्यकरमुत्तमम् ॥ १ ॥ अथ लेपौ ॥ शतपुष्पा वचा विश्वा श्वदंष्ट्रा वरुणत्वचः । पुनर्नवासदेवाह्वासटिमुण्डिनिकाः समाः ॥ १ ॥ प्रसारिणी च तर्कारी फलं च मदनस्य च । शुक्तकाञ्जिकपिष्टास्तु सुखोष्णालेपने हिताः ॥ २ ॥ इति शतपुष्पादि : ॥ अथाहिंस्रादिः ॥ अहिंस्राकेम्बुकामूलं शिग्रुवल्मीकमृत्तयैः । मूत्रपिष्टैश्च कर्तव्य उपनाहोऽनिलामजित् ॥ १ ॥ अथ पानीयम् ॥ आमवाताभिभूताय पीडिताय पिपासया । पञ्चकोलेन संसिद्धं पानीयं हितमुच्यते ॥ १ ॥ अथामवातविध्वंसनरसः ॥ प्रक्षिप्य गन्धं रसपादभागं कलाप्रमाणं च विषं समस्तात् । कृशानुतोयेन च भावयित्वा वल्लं ददीतास्य मरुत्प्रशान्त्यै ॥ १ ॥ अपस्मारे तथोन्मादे सर्वाङ्गव्यथनेऽपि च । एकाङ्गवाते सामे वा दंष्ट्राबन्धे हिमे तथा ॥ देयोऽयं वल्लमात्रं तु सर्ववातनिवृत्तये ॥ २ ॥

॥ अथ पथ्यापथ्यम् ॥

यवाः कुलत्थाः श्यामाकाः कोद्रवा रक्तशालयः । वास्तुकं शिग्रु वर्षाभूः कारवेल्लं पटोलकम् ॥ १ ॥ आर्द्रकं तप्तनीरं च लशुनं तक्रसंस्कृतम् । जाङ्गलानां तथा मांसं सामवातगदे हितम् ॥ २ ॥ दधिमत्स्यगुडक्षीरोपोदिकामापपिष्टकम् । दुष्टनीरं पूर्ववातं विरुद्धान्यशनानि च ॥ ३ ॥ असात्म्यं वेगरोधं च जागरं विषमाशनम् । वर्जयेदामवातार्तो गुर्वभिष्यन्दकानि च ॥४॥ इति पथ्यापथ्यम् ॥ इत्यामवातचिकित्सा ॥

॥ अथ शूलनिदानं व्याख्यास्यामः ॥

यदुक्तं हारीते । अनङ्गनाशाय हरस्त्रिशूलं मुमोच कोपान्मकरध्वजश्च । तमापतन्तं सहसा निरीक्ष्य भयार्दितो विष्णुतनुं प्रविष्टः ॥ १ ॥ स विष्णुहुङ्कारविमोहितात्मा पपात भूमौ प्रथितः स शूलः । स पञ्चभूतानुगतं शरीरं प्रदूषयत्यस्य हि पूर्वसृष्टिः ॥२॥ शूलारोपणवत्पीडा यस्याकस्मात्प्रजायते । त्रिशूलसम्भवं चैनं शूलमाहुः पुराविदः ॥३॥ शङ्कुस्फोटनवत्तस्य यस्मात्तीव्रा च वेदना । शूलासक्तस्य भवति तस्माच्छूल-

१ (ख० ग० ङ०) सटीमुण्डितिकाः । (घ०) सटीमुण्डीतिकाः ।

मिहोच्यते ॥ ४ ॥ अथ तस्य सङ्ख्यामाह ॥ पृथग्दोषैः समस्तामद्वन्द्वैः शूलो-ऽष्टधा भवेत् ॥ अथ प्राधान्यमाह ॥ सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥ १ ॥ अथ सम्प्राप्तिमाह ॥ व्यायामयानादतिमैथुनाच्च प्रजागराच्छीतजलातिपानात् । कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् ॥ कषायतिक्तातिविरूढजा-न्नविरुद्धवल्लूरकशुष्कशाकात् ॥ १ ॥ अथ वातिकमाह ॥ विट्शुक्रमूत्रानिलवेगरो-धाच्छोकोपवासादतिहास्यभाष्यात् । वायुः प्रवृद्धो जनयेद्धि शूलं । हृत्पार्श्व-पृष्ठत्रिकबस्तिदेशे ॥ १ ॥ अथ तस्य कालनियममाह ॥ जीर्णे प्रदोषे च घनागमे च शीते च कोपं समुपैति गाढम् । मुहुर्मुहुश्चोपशमप्रकोपौ विड्वातसंस्तम्भनतोद-भेदैः ॥ १ ॥ अथोपशयमाह ॥ संस्वेदनाभ्यञ्जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति ॥१॥ अथ पैत्तिकमाह ॥ क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुल-त्थयूषैः । कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः ॥ १ ॥ ग्राम्यातियो-गादशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शूलम् । तृण्मोहदाहार्तिकरं हि नाभ्यां सं-स्वेदमूर्च्छाभ्रमशोषयुक्तम्॥२॥अथ तस्य कालनियममाह ॥ मध्यंदिने कुप्यति चार्ध-रात्रे निदाघकाले जलदात्यये च ॥ अथ तस्य शान्तिमाह ॥ शीते च शीतैः समुपै-ति शान्तिं सुस्वादुशीतैरपि भोजनैश्च ॥ १ ॥ अथ श्लैष्मिकमाह ॥ आनूपवारिज-किलाटपयोविकारैर्मांसेक्षुपिष्टकृशरातिलशष्कुलीभिः । अन्यैर्बलासजनकैरपि हेतुभि-श्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम् ॥ १ ॥ हृल्लासकाससदनारुचिसम्प्रसेकै-रामाशये स्तिमितकोष्ठशिरोगुरुत्वैः ॥२॥ अथ तस्य कालनियममाह ॥ भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रं सूर्योदयेऽथ शिशिरे कुसुमागमे च ॥ १ ॥ अथ सान्निपाति-कमाह ॥ सर्वेषु दोषेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम् । सुकष्टमेनं विष-वज्रतुल्यं विवर्जनीयं प्रवदन्ति तज्ज्ञाः ॥ १ ॥ अथ आमजमाह ॥ आटोपहृल्लास-वमीगुरुत्वस्तैमित्यकानाहकफप्रसेकैः । कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमु-दाहरन्ति ॥ १ ॥ अथ द्विदोषजमाह ॥ द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम् । बस्तौ हृत्कण्ठपार्श्वेषु स शूलः कफवातिकः ॥ १ ॥ कुक्षौ हृन्नाभिमध्ये यः स शू-लः कफपैत्तिकः । दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः ॥२॥ अथ तन्त्रान्तरे ॥ वाता-त्मकं बस्तिगतं वदन्ति पित्तात्मकं चापि वदन्ति नाभ्याम् । हृत्पार्श्वकुक्षौ कफस-न्निविष्टं सर्वेषु देशेषु च सन्निपातात् ॥ १ ॥ अथ मध्ये साध्यासाध्यत्वमाह ॥ एकदो-षोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः । सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥ १ ॥ अथ भूर्युपद्रवानाह ॥ वेदनातितृषामूर्च्छा ह्यानाहो गौरवारुची । भ्रमो ज्वरः कृशत्वं च बलहानिस्तथैव च ॥ कासः श्वासश्च हिक्का च शूलस्योपद्रवाः स्मृताः॥१॥ इति शूलनिदानम् ॥

॥ अथ सामान्यतस्तच्चिकित्सा ॥

वमनं लङ्घनं स्वेदः पाचनं फलवर्तयः । क्षारश्चूर्णश्च गुटिकाः शस्यन्ते शूलशान्तये॥१॥

॥ अथ वातशूलचिकित्सामाह॥

ज्ञात्वा तु वातजं शूलं स्नेहस्वेदैरुपाचरेत् । पायसैः कृशरापिण्डैः स्निग्धैर्वा पिशितोत्कटैः ॥ १ ॥ आशुकारी हि पवनस्तस्मात्तं त्वरया जयेत् । तस्य शूलाभिपन्नस्य स्वेद एव सुखावहः ॥ २ ॥ अथ तिलकल्कस्वेदः ॥ तुषवारिविनिष्पिष्टतिलकल्कोष्णपोटली । भ्रामिता जठरस्योर्ध्वं मुहुः शूलं विनाशयेत् ॥ १ ॥ अथ लेपसेकौ ॥ नाभिलेपाज्जयेच्छूलं मदनं काञ्जिकान्वितम् । बिल्वैरण्डतिलैर्वापि पिष्टैरम्लेन पोटली ॥ १ ॥ अथ कुलत्थादियूषः ॥ वातात्मकं हन्त्यचिरेण शूलं स्नेहेन युक्तस्तु कुलत्थयूषः । ससैन्धवो व्योषयुतः सलावः सहिङ्गुसौवर्चलदाडिमाढ्यः॥१॥ अथ बलादिक्काथः ॥ बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः । क्काथः सहिङ्गुलवणः पीतो वातरुजं जयेत् ॥ १ ॥ अथ शार्ङ्गधरान्नागरादिः ॥ नागरैरण्डयोः क्काथः क्काथ इन्द्रयवस्य वा । हिङ्गुसौवर्चलोपेतो वातशूलनिवारणः ॥ १ ॥ अथ करञ्जाद्यं चूर्णम् । करञ्जसौवर्चलनागराणां सरामठानां समभागिकानाम् । चूर्णं कदुष्णेन जलेन पीतं समीरशूलं विनिहन्ति सद्यः ॥ १ ॥ अथ राजिकादिलेपः ॥ राजिकाशिग्रुकल्कं च गोतक्रेण च पेषितम् । तेन लेपेन हन्त्याशु शूलं वातसमुद्भवम् ॥ १ ॥ अथ हिङ्ग्वादिलेपः ॥ हिङ्गुतैलं सलवणं गोमूत्रेण विपाचितम् । नाभिस्थाने प्रदातव्यं यस्य शूलं सवेदनम् ॥ १ ॥ अथ शूले साटोपे ॥ तैलमेरण्डजं वापि दशमूलस्य वारिणा । पीतं निहन्ति साटोपं हिङ्गुसौवर्चलान्वितम् ॥ १ ॥ इति वातशूलचिकित्सा ॥

॥ अथ पित्तशूलचिकित्सामाह ॥

वामयेत्पित्तशूलार्तं पटोलेक्षुरसादिभिः । पश्चाद्विरेचयेत्सम्यक् पित्तगुल्मविरेचनैः ॥ १ ॥ अथ शतावर्यादिक्काथः ॥ शतावरी सयष्ट्याह्वा वाट्यालकुशगोक्षुरैः । शृतशीतं पिबेत्तोयं सगुडक्षौद्रशर्करम् । पित्तशूलास्रदाहघ्नं हिक्काज्वरवमिच्छिदम् ॥१॥ अथ बृहत्यादिक्काथः ॥ बृहतीगोक्षुरैरण्डकुशकाशेक्षुवालुकाः । पीताः पित्तभवं शूलं सद्यो हन्युः सुदारुणम् ॥ १ ॥ अथ त्रिफलारग्वधादिः । त्रिफलारग्वधक्काथः शर्कराक्षौद्रसंयुतः । रक्तपित्तहरो दाहपित्तशूलनिवारणः ॥ १ ॥ अथ त्रिफलादिः । त्रिफलारिष्टयष्ट्याह्वकटुकारग्वधैः शृतम् । पाययेन्मधुसंमिश्रं दाहशूलोपशान्तये॥१॥ अथ शतावरीस्वरसादि वृन्दात् ॥ शतावरीरसं क्षौद्रयुक्तं प्रातः पिबेन्नरः । दाहशूलोपशान्त्यर्थं सर्वपित्तामयापहम् ॥ १॥ अथ धात्र्यादियोगः ॥ धात्र्या रसं विदार्या वा त्रायन्तीगोस्तनाम्बुना । पिबेत्सशर्करं सद्यः पित्तशूलनिवारणम् ॥ १ ॥ अथ धात्रीचूर्णादि ॥ प्रलिह्यात्पित्तशूलघ्नं धात्रीचूर्णं समाक्षिकम् । सगुडां घृतसम्मिश्रां भक्षयेद्वा हरीतकीम् ॥ १ ॥ अथ गुडादियोगः ॥ गुडशालियवक्षीरं सर्पिर्दुग्धं विरेचनम् । जाङ्गलानि च मांसानि भेषजं पित्तशूलिनः ॥ १ ॥ इति पित्तशूलचिकित्सा ॥

॥ अथ कफशूलचिकित्सामाह ॥

शाल्यन्नं जाङ्गलं मांसमरिष्टं कटुकं रसम् । मद्यानि जीर्णगोधूमं कफशूले प्रयोजयेत् ॥ १ ॥ अथ त्रिलवणादिचूर्णम् ॥ लवणत्रयसंयुक्तं पञ्चकोलं सरामठम् । सुखोष्णेनाम्भसा पीतं कफशूलं हरं परम् ॥ १ ॥ इति श्लेष्मशूलचिकित्सा ॥

॥ अथ त्रिदोषशूलचिकित्सामाह ॥

अथ शङ्खचूर्णयोगः । शङ्खचूर्णं सलवणं सहिङ्गु व्योषसंयुतम् । उष्णोदकेन तत्पीतं हन्ति शूलं त्रिदोषजम् ॥ १ ॥ अथ मण्डूरावलेहः ॥ गोमूत्रे सिद्धमण्डूरं त्रिफलाचूर्णसंयुतम् । विलिहन्मधुसर्पिर्भ्यां शूलं हन्ति त्रिदोषजम् ॥१॥ इति त्रिदोषशूलः ॥

॥ अथामशूलचिकित्सामाह ॥

आमशूले क्रिया कार्या कफशूलविनाशिनी । शेषमामहरं सर्वं यच्चदग्निविवर्धनम् ॥ १ ॥ अथ चित्रकादिक्काथः ॥ चित्रकग्रन्थिकैरण्डशुण्ठीधान्यजलैः शृतम् । सहिङ्गु सैन्धवबिडमामशूलहरं परम् ॥ १ ॥ अथैरण्डादिक्काथः ॥ एरण्डबिल्वबृहतीद्वयमातुलुङ्गपाषाणभित्त्रिकटुमूलकृतः कषायः । सक्षारहिङ्गुलवणो रुबुतैलमिश्रः श्रोण्यंसपृष्ठहृदयस्तनरुक्षु पेयः ॥ १ ॥ अथैरण्डतैलादियोगः ॥ एरण्डतैलं षड्भागं लशुनस्य तथाष्टकम् । एकं हिङ्गुत्रिसिन्धूत्थं सर्वमेकत्र मर्दयेत् ॥ त्रिनिष्कं भक्षयेच्चानु ह्यामशूलप्रशान्तये ॥२॥ हिङ्गुत्रिगुणसैन्धवं तस्माच्च शुद्धतैलमैरण्डम् । तत् त्रिगुणरसोनरसं गुल्मोदावर्तशूलघ्नम् ॥ २ ॥ इत्यामशूलचिकित्सा ॥

॥ अथ द्वन्द्वजशूलचिकित्सा ॥

अथ कण्टकार्यादिक्काथः ॥ निदिग्धिकाबृहत्यौ च कुशकाशेक्षुवालकाः । श्वदंष्ट्रैरण्डमूलं च वारिणा सह पाचयेत् ॥ पिबेत्सशर्करक्षौद्रं शूले पित्तानिलात्मके ॥ १ ॥ ॥ अथ पटोलादिः ॥ पटोलत्रिफलारिष्टामृतं क्षौद्रयुतं पिबेत् । पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥ १ ॥ अथ द्राक्षादिक्काथः ॥ द्राक्षाटरुषयोः क्काथः श्लेष्मपित्तरुजं जयेत् । पित्तश्लेष्मोद्भवं शूलं विरेकवमनैर्जयेत् ॥ १ ॥ अथ क्षाराम्बुयोगः ॥ क्षारोदकं पिबेदुष्णं पिप्पलीलवणान्वितम् । वातश्लेष्मोद्भवं शूलं कुक्षिशूलं च नाशयेत् ॥ १ ॥ इति द्वन्द्वजशूलचिकित्सा ॥

॥ अथ शूले साधारणविधिः

॥ अथ त्रिफलादिविरेचनम् ॥ त्रिफलाक्काथगोमूत्रक्षौद्रक्षीररसैः पृथक् । एरण्डतैलद्विगुणैर्हितं शूले विरेचनम् ॥ १ ॥ अथ बीजपूरादिस्वरसः ॥ बीजपूररसः पानान्मधुक्षीरयुतो जयेत् । पार्श्वहृद्बस्तिशूलानि कोष्ठवायुं च दारुणम् ॥ १ ॥ अथ पथ्यादिक्काथः ॥ पथ्यासशक्रयवपुष्करमूलयुक्तां निष्काथ्य हिङ्गुजटिलातिविषासमेताम् । पीत्वा सुखोष्णमथ वातकृतं सशूलमामोद्भवं कफकृतं च निहन्ति तूर्णम् ॥ १ ॥

॥ अथ मातुलुङ्गादिः ॥ मातुलुङ्गरसो वापि शिग्रुकाथस्तथा परः । सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलहा ॥ १ ॥ अन्यच्च ॥ मातुलुङ्गरसे सर्पिः सहिङ्गु लवणान्वितम् । सुखोष्णं पाययेत्तद्धि विड्विबन्धानुलोमनम् ॥ कुक्षिहृत्पार्श्वशूलेषु वेदना चोपशाम्यति ॥ १ ॥ अथ बिल्वमूलादिः ॥ बिल्वमूलमथैरण्डं चित्रकं विश्वभेषजम् । हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम्॥ १ ॥ अथ हरीतकीयोगः ॥ मूत्रान्तः पाचितां शुष्कां लोहचूर्णसमन्विताम् । सगुडामभयां दद्यात् सर्वशूलोपशान्तये ॥ १ ॥ अथ लोहत्रिफलायोगः ॥ तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् । प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिवारणम् ॥ १ ॥ अथ चूर्णानि ॥ अथादौ तुम्बुर्वाद्यं चूर्णम् ॥ चूर्णं तुम्बुरुरामठत्रिलवणक्षाराजमोदाभयावेल्लत्र्यूषणपुष्कराह्वयकृतं कुम्भत्रिभागान्वितम् । मन्दोष्णेन जलेन पीतमखिलं शूलं सगुल्मोदराध्मानाजीर्णविबन्धमामपवनानाहौ च शीघ्रं जयेत् ॥ १ ॥ अथ द्विक्षाराद्यम् ॥ विश्वोरुबूकदशमूलपवाम्भसा तु द्विक्षारहिङ्गुलवणत्रयपुष्कराणाम् । चूर्णं पिबेद्धृदयपृष्ठकटिग्रहामपक्वाशयार्तिभृशरुग्ज्वरगुल्मशूली ॥१॥ अथ हिङ्ग्वादि ॥ हिङ्ग्वम्लत्रिपटुग्रषट्कटुशटीवृक्षाम्लदीप्याल्लकम् पाठाजाज्यजगन्धमूलहपुषाद्विक्षारसाराभयम् । हिध्माध्मानविबन्धवर्ध्मकसनश्वासाग्निसादारुचिप्लीहार्शोऽखिलशूलगुल्मगलहृद्रोगाश्मपाण्डुप्रणुत् ॥ १ ॥ अथ नाराचकचूर्णम् ॥ कर्षमात्रा भवेत्कृष्णा त्रिवृतं स्यात्पलोन्मितम् । खण्डात्पलं च विज्ञेयं चूर्णमेकत्र कारयेत् ॥ १ ॥ कर्षोन्मितं लिहेदेतत्क्षौद्रेणाध्माननाशनम् । गाढविट्कोदरकफपित्तशूलानि नाशयेत् ॥ २ ॥ इति चूर्णानि ॥ अथ शङ्खवटी ॥ चिञ्चाक्षारं पञ्चपलं लवणानि पलं पलम् । सञ्चूर्ण्य निक्षिपेत्प्रस्थद्वयैर्जम्बीरवारिभिः ॥ १ ॥ शङ्खं दशपलं तप्त्वा निक्षिपेत्सप्तवारतः । तत्समस्तं विशोष्याथ हिङ्ग्वोपं चतुष्पलम् ॥२॥ बलिसूतविषाद् भागान् पलार्धं च पृथक् पृथक् । एतत्समस्तं संमर्द्य जम्बीराम्लैर्दिनत्रयम् ॥ ३ ॥ बदरास्थिप्रमाणेन वटिकां कारयेद्बुधः । एकैकां भक्षयेत्प्रातः कोष्णतोयं पिबेदनु ॥४॥ सर्वशूलं हरेद् गुल्ममजीर्णं परिणामजम् । अतिसारगदं हन्याद्ग्रहणीं च विशेषतः ॥ ५ ॥ अथ सूर्यप्रभा वटी ॥ व्योषग्रन्थिवचाग्निहिङ्गुजरणद्वन्द्वं विषं निम्बुकद्रावैरार्द्रकजैरसैर्विमृदितं तुल्यं मरीचोपमा । कर्तव्या वटिकाथ सा दिनमुखे भुक्ता कवोष्णाम्बुना शूलं त्वष्टविधं निहन्ति सहसा सूर्यप्रभा नामतः ॥ १ ॥ अथ खण्डपिप्पली ॥ कणाचूर्णं तु कुडवं षट्पलं हविषस्तथा । पलषोडशकं खण्डं शतावर्याः पलाष्टकम् ॥ १ ॥ क्षीरप्रस्थद्वये सार्धे लेहीभूते तदुद्धरेत् । त्रिजातमुस्तधान्याकं शुण्ठीमांसीद्विजीरकम् ॥ २ ॥ अभयामलकं चैव चूर्णं द्वादशकार्षिकम् । तदर्धं मरिचं भागं सारं खादिरमेव च ॥३॥ मधुत्रिपलसंयुक्तं खादेत्सिद्धं यथाबलम् । शूलारोचकहृल्लासच्छर्दिपित्ताम्लरोगनुत् ॥ अग्निसन्दीपनी हृद्या खण्डपिप्पलिका मता ॥ ४ ॥ अथ घृतम् ॥ घृताच्चतुर्गुणो देयो मातुलुङ्गरसो दधि । शुष्कमूलककोलाम्लकषायो दाडिमाम्भसा ॥ १ ॥ विडङ्गल-

वणक्षारं पञ्चकोलयवानिभिः । पाठामूलककल्केन सिद्धं शूले घृतं मतम् ॥ २ ॥ हृत्पार्श्वशूलं वै श्वासं कासं हिक्कां तथैव च । वर्ध्मगुल्मप्रमेहार्शोवातव्याधींश्च नाशयेत् ॥ ३ ॥

॥ अथ रसौ ॥

अथ शूलगजकेसरी रसः ॥ रसविषगन्धकपर्दक्षारेण सिन्धुपिप्पलीविश्वैः । अहिवल्यम्बुविघृष्टः शूलेभहरिर्द्विगुञ्जोऽयम् ॥ १ ॥ अन्यश्च । क्षारं कपर्दाद्विपसैन्धवौ च व्योषं च सम्मर्द्य भुजङ्गवल्ल्याः । रसेन गुञ्जाप्रमितः प्रदिष्टः समीरशूलेभहरिः प्रचण्डः ॥ १ ॥ इति रसौ ॥

॥ अथ पथ्यापथ्यम् ॥

पटोलं कारवेल्लं च वास्तुकं शिग्रुजं तथा । सामुद्रं लशुनं वाथ शालिः संवत्सरोषितः ॥१॥ एरण्डतैलं सुरभीजलं च तप्ताम्बुजम्बीररसोऽपि कुष्ठम् । लघूनि च क्षाररजांसि चेति वर्गो हितः शूलगदार्दितेभ्यः ॥ २ ॥ विरुद्धान्यन्नपानानि जागरं विषमाशनम् । रूक्षतिक्तकषायाणि शीतलानि गुरूणि च ॥३॥ व्यायामं मैथुनं मद्यं वैदलं कटुकानि च । वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान्नरः ॥४॥ इति शूलरोगचिकित्सा॥

॥ अथ परिणामशूलनिदानप्रारम्भः ॥

स्वैर्निदानैः प्रकुपितो वायुः सन्निहितस्तदा । कफपित्ते समावृत्य शूलकारी भवेद्बली ॥१॥ अथ तन्त्रान्तरे । बलासः प्रच्युतः स्थानात् पित्तेन सह मूर्च्छितः । वायुमादाय कुरुते शूलं जीर्यति भोजने ॥ १ ॥ कुक्षौ जठरपार्श्वेषु नाभ्यां बस्तौ स्तनान्तरे। पृष्ठमूलप्रदेशेषु सर्वेष्वेतेषु वा पुनः ॥ २ ॥ भुक्तमात्रेऽथ वा वान्ते जीर्णे चान्ने प्रशाम्यति । षष्टिकव्रीहिशालीनामोदनेन च वर्धते ॥ ३ ॥ तत्परीणामजं शूलं दुर्विज्ञेयं महागदम् । आहाररसवाहानां स्रोतसां दुष्टिहेतुकम् ॥ ४ ॥ केचिदन्नद्रवं प्राहुरन्ये तत्पक्तिदोषजम् । पक्तिशूलं वदन्त्येके केचिदन्नविदाहजम् ॥ ५ ॥ अथ तस्य सामान्यलक्षणमाह ॥ भुक्ते जीर्यति यच्छूलं तदेव परिणामजम् । तस्य लक्षणमेतद्धि समासेन प्रकीर्त्यते ॥ १ ॥ अथ वातिकमाह ॥ आध्मानाटोपविण्मूत्रविबन्धरतिवेपनैः । स्निग्धोष्णोपशमं प्रायो वातिकं तद्वदेद्भिषक् ॥१॥ अथ पैत्तिकमाह ॥ तृष्णादाहारुचिस्वेदकट्वम्ललवणोत्तरम् । शूलं शीतशमं प्रायः पैत्तिकं तद्वदेद्भिषक् ॥ १ ॥ अथ श्लैष्मिकमाह ॥ छर्दिहृल्लाससंमोहस्वल्परुग् दीर्घसन्तति । कटुतिक्तोपशान्तं हि तच्च ज्ञेयं कफात्मकम् ॥१॥ अथ द्विदोषजमाह ॥ संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् । अथ सान्निपातिकमाह । त्रिदोषजमसाध्यं स्यात्क्षीणमांसबलानलम्॥१॥ अथान्नद्रवाख्यम् ॥ जीर्णे जीर्यत्यजीर्णे च यच्छूलमुपजायते । तदप्यसाध्यं नित्यत्वादुक्तं वैद्यविशारदैः ॥ १ ॥ पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा । न शमं याति नियमात्सोऽन्नद्रव उदाहृतः ॥ २ ॥ अथायं प्रायेण त्रिदोषविकृतित्वादसाध्यः ॥

आनाहो गौरवं छर्दिर्भ्रमस्तृष्णा ज्वरोऽरुचिः। कृशत्वं बलहानिश्च वेदनातिप्रवर्तते ॥ १ ॥ उपद्रवा दशैवेते शूले च परिणामजे। सोपद्रवोऽप्यसाध्यः स्यात्कृच्छ्रेण निरुपद्रवः ॥ २ ॥ इति परिणामशूलनिदानम्।

॥ अथ तच्चिकित्सा ॥

लङ्घनं प्रथमं कुर्याद्वमनं च विरेचनम्। बस्तिकर्म परं चात्र पक्तिशूलोपशान्तये ॥ १ ॥ वातजं स्नेहयोगेन पित्तजं रेचनादिना। कफजं वमनाद्यैश्च पक्तिशूलमुपाचरेत् ॥ द्वन्द्वजं स्नेहयोगेन तत्त्रियोगेन सर्वजम् ॥ २ ॥ अथ कल्काः ॥ विष्णुक्रान्ताजटाकल्कः सिताक्षौद्रघृतैर्युतः। परिणामभवं शूलं नाशयेत्सप्तभिर्दिनैः ॥ १ ॥ शुण्ठीतिलगुडैः कल्कं दुग्धेन सह योजयेत्। परिणामभवं शूलमामवातं च नश्यति ॥२॥ नागरतिलगुडकल्कं पयसा संसाध्य यः पुमानद्यात्। उग्रं परिणतिशूलं सप्ताहाज्जयति चावश्यम् ॥ ३ ॥ अथ शम्बूकभस्मयोगः ॥ शम्बूकजं भस्म पीतं जलेनोष्णेन तत्क्षणात्। पक्तिजं विनिहन्त्याशु शूलं विष्णुरिवासुरान् ॥ १ ॥ अथ शम्बूकादिवटिका ॥ शम्बूकमूषणं चैव पञ्चैव लवणानि च। समांशां गुटिकां कृत्वा कलम्बुकरसेन च ॥ १ ॥ प्रातर्भोजनकाले वा भक्षयेच्च यथाबलम्। शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥ २ ॥ अथ क्षीरमण्डूरम् ॥ लोहकिट्टं पलान्यष्टौ गोमूत्रेऽर्धाढके पचेत्। परिणामभवं शूलं सद्यो हन्ति न संशयः ॥ १ ॥ अथ तारमण्डूरम् ॥ विडङ्गं चित्रकं चव्यं त्रिफला त्र्यूषणानि च। नवभागानि चैतानि लोहकिट्टसमानि च ॥ १ ॥ गोमूत्रं द्विगुणं दत्वा मूत्राद्विगुणको गुडः। शनैर्मृद्वग्निना पक्त्वा सुसिद्धं पिण्डतां गतम् ॥ २ ॥ स्निग्धभाण्डे विनिक्षिप्य भक्षयेत्कोलमात्रया। प्राङ्मध्यान्तक्रमेणैव भोजनस्य प्रयोजितः ॥ ३ ॥ योगोऽयं शमयत्याशु पक्तिशूलं सुदारुणम्। कामलां पाण्डुरोगं च शोथमेदोऽनिलार्शसाम् ॥ शूलार्तानां कृपाहेतोस्तारया प्रकटीकृतः ॥ ४ ॥ अथ भीममण्डूरम्। यवक्षारकणाशुण्ठीकोलं ग्रन्थिकचित्रकात्। प्रत्येकं पलमादाय प्रस्थं लोहस्य किट्टतः ॥ १ ॥ शनैः पचेदयस्पात्रे यावद्दर्वीप्रलेपनम्। दत्वाष्टगुणगोमूत्रं किट्टाच्छुद्धाद्विचक्षणः ॥२॥ ततोऽक्षमात्रान्वटकान्योजयेत्सप्तरात्रतः। आदिमध्यावसानेषु भोजनस्योचितस्य वै ॥ स भीमवटको ह्येष परिणामरुगन्तकः ॥ ३ ॥ अथ शतावरीमण्डूरः ॥ संशोध्य चूर्णितं कृत्वा मण्डूरस्य पलाष्टकम्। शतावरीरसस्याष्टौ दध्नश्च पयसस्तथा ॥ १ ॥ पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः। विपचेत्सर्वमेकस्थं यावत्पिण्डत्वमाप्नुयात् ॥ २ ॥ सिद्धं तु भक्षयेन्मध्ये प्रान्ते भुक्तस्य चाग्रतः। वातात्मकं पित्तभवं शूलं च परिणामजम् ॥ ३ ॥ निहन्त्येव हि योगोऽयं मण्डूरस्य न संशयः। दुग्धे निर्वापणं कार्यं यद्वा बहुसुतारसे ॥ ४ ॥ अथवा चोभयोरेव लोहकिट्टस्य सप्तधा। रसो गन्धः शुभः पाके वर्तिः स्याद्यदि मर्दनात् ॥ तदा पाकं विजानीयान्मण्डूरस्य भिषग्वरः ॥ ५ ॥ इति शतावरीमण्डूरः ॥ अथ लोहगुग्गुलुः ॥

त्रिफला मुस्तकं व्योषं विडङ्गं पौष्करं वचा। चित्रकं मधुकं चैव पलांशं श्लक्ष्णचूर्णितम् ॥ १ ॥ अयोभस्म पलान्यष्टौ गुग्गुलुस्तावदेव तु। सर्पिषा मेलयि-त्वाथ कर्षमात्रवटीकृतम् ॥ २ ॥ अद्यादनुपिबेत्कोष्णं वारि शूलाद्विमुच्यते। जीर्णान्नसंभवात्पाण्डोः कामलाया हलीमकात् ॥ ३ ॥ अथ विडङ्गाद्यो मोदकः ॥ विडङ्गतण्डुलं व्योषं त्रिवृद्दन्ती सचित्रकम्। सर्वाण्येतानि संहृत्य सूक्ष्मचूर्णानि कार-येत् ॥ १ ॥ गुडेन मोदकान्कृत्वा भक्षयेत्प्रातरुत्थितः। उष्णोदकानुपानेन दद्यादग्नि-विवर्धनम् ॥ जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥ २ ॥ अथैरण्डादिभस्मयोगः ॥ एरण्डवह्निशम्बूकवर्षाभूगोक्षुरं समम्। अन्तर्दग्ध्वा पिबेदद्भिरुष्णाभिः शूलशान्तये ॥ १ ॥ अथ पथ्याद्यं लोहम् ॥ पथ्यालोहरजः शुण्ठी तच्चूर्णं मधुसर्पिषा। परिणाम-भवं हन्ति वातपित्तकफात्मकम् ॥ १ ॥ अथ कृष्णाद्यं लोहम् ॥ कृष्णाभयालोहचूर्णं विलिहन्मधुसर्पिषा। परिणामभवं शूलं सद्यो हन्ति सुदारुणम् ॥ १ ॥ अथ चतुः-समं लोहम् ॥ गन्धं ताम्रं रसं लोहं प्रत्येकं मारितं पलम्। सर्वमेतत्समाहृत्य विपचेत् कुशलो भिषक् ॥ १ ॥ आज्ये पलद्वादशके दुग्धे शतपले वरे। पक्त्वा तत्र क्षिपे-च्चूर्णं सुपूतं घनतां नयेत् ॥ २ ॥ विडङ्गत्रिफलावह्नित्रिकटूनां तथैव च। क्षिप्त्वा पलो-न्मितानेतान्यथा संमिश्रतां नयेत् ॥ ३ ॥ ततः पिष्ट्वा शुभे भाण्डे स्थापयेच्च विचक्षणः। आत्मनः शोभने घस्रे पूजयित्वा रविं गुरुम् ॥ ४ ॥ घृतेन मधुना मर्द्यं भक्षयेन्माषसं-मितम्। अष्ट माषाः क्रमाद्यावन्मात्रां संस्तम्भयेत्ततः ॥ ५ ॥ अन्नपानं च दुग्धेन नारिकेलोदकेन वा। जीर्णशाल्यन्नमुद्गाश्च सितामांसरसादयः ॥ ६ ॥ रसानामविरु-द्धानि पानान्नान्यपि भक्षयेत्। हृच्छूलं पार्श्वशूलं च सामवातं कटिग्रहम् ॥ ७ ॥ गु-ल्मशूलं च सर्वं च यकृत्प्लीहा विशेषतः। अग्निमान्द्यं क्षयः कुष्ठं श्वासकासविचर्चिका ॥ अश्मरी मूत्रकृच्छ्रं च योगेनानेन शाम्यति ॥ ८ ॥ इति चतुःसमं लोहम् ॥ अथ सा-मुद्राद्यं चूर्णम् ॥ सामुद्रं सैन्धवं क्षारौ रुचकं रौमकं बिडम्। दन्ती लोहरजः किट्टं त्रिवृत्सूरणकं समम् ॥ १ ॥ दधिगोमूत्रपयसा मन्दपावकपाचितम्। तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥ २ ॥ जीर्णेऽजीर्णे च भुञ्जीत मांसादि घृतसाधितम्। नाभिशूलं च हृच्छूलं गुल्मप्लीहकृतं च यत् ॥ ३ ॥ विद्रध्यष्ठीलजं हन्ति कफवातो-द्भवं तथा। अन्नद्रवं जरयितुमजीर्णं ग्रहणीमपि ॥ ४ ॥ शूलानामपि सर्वेषामौषधं नास्त्यतः परम्। परिणामसमुत्थस्य विशेषेणान्तकं मतम् ॥ ५ ॥ इति सामुद्राद्यं चूर्णम् ॥ अथ पिप्पल्यादियोगः ॥ समागधीगुडं सर्पिः प्रस्थं क्षीरं चतुर्गुणम्। पक्वं पीत्वा जयत्याशु पक्तिशूलं समुद्धतम् ॥ १ ॥ अथ त्रिपुरभैरवो रसः ॥ भागौ रसस्य भागश्च हेम्नः पिष्टं विधाय च। तथा द्वादश भागानि ताम्रपत्राणि लेपयेत् ॥ १ ॥ ऊ-र्ध्वाधो गन्धकं दत्त्वा पलमात्रं समन्ततः। क्षारस्य मृगशृङ्गस्य चूर्णं योज्यं समन्ततः ॥ २ ॥ सिञ्चेन्मत्स्याक्षिनीरेण रुद्ध्वा यामचतुष्टयम्। पचेच्छूलहरः सूतो भवे-त्त्रिपुरभैरवः ॥ ३ ॥ माषो मध्वाज्यसंयुक्तो देयोऽस्य परिणामजे। अन्येष्वेरण्डतैलेन कटुत्रयपुतो हितः ॥ ४ ॥ अथ शूलदावानलः ॥ सारसङ्ग्रहात् ॥ शुद्धसूतं विषं गन्धं

षर्षांशं मर्दयेद्दृढम् । मरीचं पिप्पली शुण्ठी हिङ्गु सौवर्चलं द्वयम् ॥ १ ॥ पलाष्टकं पटूनां च विश्वासारं पलाष्टकम् । समवारं शङ्खभस्म जम्बीराम्ले निषेचयेत् ॥ २ ॥ पलाष्टकं च संयोज्यं तत्सर्वं निम्बुकद्रवैः । दिनं मर्द्य कोलमात्रं भक्षयेत्सर्वशूलनुत् ॥ ३ ॥ अजीर्णोदरमन्दाग्निमसाध्यमपि साधयेत् । शूलदावानलाख्योऽयं रसोऽजीर्णादिरोगहा ॥ ४॥ इति शूलदावानलः ॥

॥ अथ पथ्यापथ्यम् ॥

माषादिशिम्बिधान्यानि मद्यानि वनिताहिमम् । आतपं जागरं क्रोधं शुचं सन्धानमम्लकम् ॥ वर्जयेत्पक्तिशूलार्तस्तथाजीर्णं तिलानपि ॥ १ ॥ इति परिणामशूलचिकित्सा ॥

॥ अथातोदावर्तनिदानम् ॥

वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैम्[1] । क्षुत्तृष्णाश्वासनिद्राश्च धृत्वोदावर्तसम्भवः ॥१॥ अथ तेषां क्रमेण लक्षणान्याह ॥ अथापानवातावरोधजमाह ॥ वातमूत्रपुरीषाणां सङ्गोऽध्मानं क्लमो ज्वरः । जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात् ॥ १ ॥ ॥ अथ पुरीषावरोधजमाह ॥ आटोपशूलौ परिकर्तिका च सङ्गः पुरीषस्य तथोर्ध्ववातः । पुरीषमास्यादथवा निरेति पुरीषवेगेऽभिहते नरस्य ॥१॥ अथ मूत्रविग्रहजमाह ॥ बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजा । विनामो वङ्क्षणानाहः स्याल्लिङ्गं मूत्रनिग्रहे ॥ १ ॥ अथ जृम्भाविघातजमाह ॥ मन्यागलस्तम्भशिरोविकाराः जृम्भोपघातात्पवनात्मकाः स्युः । तथाक्षिनासावदनामयाश्च भवन्ति तीव्राः सह कर्णरोगैः ॥ १ ॥ ॥ अथाश्रुविघातजमाह ॥ आनन्दजं वाप्यथ शोकजं वा नेत्रोदकं प्राप्तममुञ्चतो हि । शिरोगुरुत्वं नयनामयाश्च भवन्ति तीव्राः सह पीनसेन ॥१॥ अथ हिक्कानिरोधजमाह ॥ मन्यास्तम्भः शिरःशूलमर्दितार्धावभेदकौ । इन्द्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥१॥ अथोद्गारविधारणजमाह ॥ कण्ठास्यपूर्णत्वमतीव तोदः कूजश्च वायोरथ वाप्रवृत्तिः । उद्गारवेगेऽभिहते भवन्ति घोरा विकाराः पवनप्रसूताः ॥ १ ॥ अथ च्छर्दिनिग्रहजमाह ॥ कण्डूकोठारुचिव्यङ्गशोथपाण्ड्वामयज्वराः । कुष्ठहृल्लासवीसर्पाश्छर्दिनिग्रहजा गदाः ॥ १ ॥ अथ शुक्रविधारणजमाह ॥ मूत्राशये वै गुदमुष्कयोश्च शोफो रुजा मूत्रविनिग्रहश्च । शुक्राश्मरी तत्स्रवणं भवेच्च ते ते विकाराभिहते च शुक्रे ॥ १ ॥ अथ क्षुधावरोधजमाह ॥ तन्द्राङ्गमर्दावरुचिः श्रमश्च क्षुधोऽभिघातात्कृशता च दृष्टेः ॥ १ ॥ अथ तृष्णानिरोधजमाह ॥ कण्ठास्यशोषः श्रवणावरोधस्तृष्णाभिघाताद् हृदयव्यथा च ॥ १ ॥ अथ श्वासावरोधजमाह ॥ श्रान्तस्य निश्वासविनिग्रहेण हृद्रोगमोहावथ वापि गुल्मः ॥ १ ॥ अथ निद्रानिग्रहजमाह ॥ जृम्भाङ्गमर्दोऽक्षिशिरोऽतिजाड्यं निद्राविघातादथ वापि तन्द्राः[2] ॥ १ ॥ अथ त्रयोदशरूक्षभोजन-

१ (च०) वमीन्द्रियैः । २ (च०) निद्राणां भूयो —।

जनितविकारमाह ॥ वायुः कोष्ठानुगो रूक्षकषायकटुतिक्तकैः । भोजनैः कुपितः सद्य उदावर्तं करोति च ॥ १ ॥ अथ तस्य सम्प्राप्तिमाह ॥ वातमूत्रपुरीषासृक्कफमेदोवहानि वै । स्रोतांस्युदावर्तयति पुरीषं चातिवर्तयेत् ॥ १ ॥ ततो हृद्बस्तिशूलार्तो हृल्लासारतिपीडितः । वातमूत्रपुरीषाणि कृच्छ्रेण लभते नरः ॥ २ ॥ श्वासकासप्रतिश्यायदाहमोहतृषाज्वरान् । वमिहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥ ३ ॥ बहूनन्यांश्च लभते विकारान्वातकोपजान् ॥ ४ ॥ अथासाध्यलक्षणमाह ॥ तृष्णार्दितं परिक्लिष्टं क्षीणं शूलैरुपद्रुतम् । शकृद्वमन्तं मतिमानुदावर्तिनमुत्सृजेत् ॥ १ ॥ इत्युदावर्तनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

सर्वेष्वेतेषु भिषजा चोदावर्तेषु कृत्स्नशः । वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये ॥ १ ॥ आस्थापनं मारुतजे स्निग्धस्विन्ने विशेषतः । पुरीषजे तु कर्तव्यो विधिरानाहकोदितः ॥ २ ॥

॥ अथ विण्मूत्रावरोधे ॥

॥ अथ सौवर्चलादि ॥ सौवर्चलाढ्यां मदिरां मूत्रे त्वभिहते पिबेत् । एलां वाप्यथ मस्त्वम्लं क्षीरं वाथ वराम्बु वा ॥ १ ॥ अथोर्वारुबीजादियोगः ॥ उर्वारुबीजं तोयेन पिबेद्वा लवणान्वितम् । पञ्चमूलीशृतं क्षीरं द्राक्षारसमथापि वा ॥ १ ॥ अथ यवक्षारादियोगः ॥ यवक्षारं सितायुक्तं पिबेद्वा मृद्विकारसैः । वरीकूष्माण्डयोस्तोयं सितायुक्तं पिबेदथ ॥ १ ॥ अथ मूषकादियोगः ॥ मूषकस्य विशा लेपो बस्तेरुपरि वा चरेत् । किंशुकानां प्रलेपो वा कवोष्णो मूत्ररोधहा ॥ १ ॥ पिष्ट्वा श्वदंष्ट्राफलमूषिकाविडैरुर्वारुबीजानि सकाञ्जिकानि । आलिप्यमानानि समानि बस्तौ मूत्रस्य निष्यन्दकराणि सद्यः ॥ अत्र सर्वं प्रयुञ्जीत मूत्रकृच्छ्राश्मरीविधिम् ॥२॥ इति मूत्रावरोधयोगः ॥

॥ अथावशेषाणां चिकित्सा ॥

स्नेहस्वेदैरुदावर्तं जृम्भाजं समुपाचरेत् । अश्रुमोक्षोऽश्रुजे कार्यः स्निग्धस्विन्नस्य देहिनः ॥ १ ॥ मरीचाद्यञ्जनैर्धूमैर्निमिषाद्यवलोकनैः[1] । क्षवजे क्षवयन्त्रेण घ्राणस्थेनानयेत्क्षवम् ॥२॥ उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् । भक्षयेद्रुचकं सार्द्रं खण्डं वा मथितान्वितम् ॥ ३ ॥ वम्या वान्तं[2] यथा दोषं नस्यस्नेहादिभिर्जयेत् । वस्तिशुद्धिकरैः सिद्धं चतुर्गुणजलं पयः ॥ ४ ॥ आ वारिनाशात् क्वथितं पीतं वान्तं प्रकामतः । रमणेषु प्रिया नार्यः शुक्रोदावर्तिनं नरम् ॥५॥ तस्याभ्यङ्गोऽवगाहश्च[3] मदिराश्चरणायुधाः । शालिः पेयो[4] निरूहाश्च हितं मैथुनमेव च ॥ ६ ॥ क्षुद्विघाते हितं स्निग्धं रुच्यमल्पं च भोजनम् । तृषाघाते पिबेन्मद्यं यवागूं स्वादु शीतलाम् ॥७॥ रसेनाद्यात्तु विश्रान्तः श्र-

१ (च०) आदित्याद्यवलोकनैः । २ (च०) पीतवन्तम् । ३ (च०) नस्याभ्यङ्गावगाहाश्च । ४ (च०) शालीपयो ।

मलवातार्दितो नरः। निद्राघाते पिबेद् दुग्धं माहिषं रजनीमुखे ॥ ८ ॥ तिलतैलेन संमृज्य भूतले शयनं चरेत् । उदावर्तिनमभ्यक्तं स्निग्धगात्रमुपाचरेत् ॥ वर्तिकास्थापनस्वेदबस्तिरेचनकर्मणा ॥ ९ ॥

॥ अथ सामान्यविधिः ॥

अथ श्यामादिकषायो वृन्दात् ॥ श्यामा दन्ती द्रवन्ती स्नुग् महाश्यामामृता त्रिवृत् । सप्तला शङ्खिनी श्वेता राजवृक्षः सबिल्वकः ॥ १ ॥ कपिल्लकं करञ्जश्च हेमक्षीरीत्ययं गणः । सर्पिस्तैलरजःक्काथकल्केष्वन्यतमेषु च ॥ उदावर्तोदरानाहविषगुल्मविनाशनः ॥ २ ॥ अथ वृन्दाद्वाल्यादियूपः ॥ वाल्यायूषेण पिप्पल्या मूलकानां रसेन वा । भुक्त्वा स्निग्धमुदावर्तवातगुल्माद्विमुच्यते ॥ १॥ अथ वाल्यादिः ॥ वाल्यक्षीररसैः सेव्यं यच्च वातानुलोमनम् । वातघ्नैर्लवणाद्यैश्च रसाद्यैश्चान्नमाचरेत् ॥ १ ॥

॥ अथ चूर्णानि ॥

अथ हरीतक्यादिचूर्णम् ॥ हरीतकी यवक्षारः पीलुनी त्रिवृता तथा । घृतैश्चूर्णं त्विदं पेयमुदावर्तप्रशान्तये ॥ १ ॥ अथ द्विरुत्तरं चूर्णम् । हिङ्गुकुष्ठवचास्वर्जिबिडं चेति द्विरुत्तरम् । पीतं मद्येन तच्चूर्णमुदावर्तहरं परम् ॥ १ ॥ अथ नाराचचूर्णम् ॥ खण्डं पलं त्रिवृतासममुपकुल्याकर्षचूर्णितं सूक्ष्मम् । प्राग्भोजनस्य समधु बिडालपदकं लिहेत्मातः ॥ १ ॥ एतद् गाढपुरीषे पित्ते कफे च विनियोज्यम् । स्वादुर्नृपयोग्योऽयं चूर्णो नाराचको नाम ॥ २ ॥ हिङ्गुत्रिगुणसैन्धवं तस्माच्च शुद्धतैलमैरण्डम् । तत्त्रिगुणं रसोनरसं गुल्मोदावर्तशूलघ्नम् ॥ ३ ॥ अथ प्रलेपः ॥ वल्मीकमृत्करञ्जस्य त्वङ्मूलफलपल्लवम् । सिद्धार्थं चेति पिष्टानां मूत्रेणालेपनं हितम् ॥ उदावर्तेषु सर्वेषु सम्यग्वातानुलेपनम् ॥१॥ अथ फलवर्तयः ॥ तत्र मदनादिः ॥ मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः । गुडक्षीरसमायुक्ता फलवर्तिः प्रशस्यते ॥ १ ॥ अथाङ्गारधूमादिः ॥ अङ्गारधूमः पिप्पल्यो मदनं राजसर्षपाः । गोमूत्रपिष्टाः सगुडा फलवर्तिः प्रशस्यते ॥ १ ॥ अथ हिङ्ग्वादिः ॥ हिङ्गुमाक्षिकसिन्धूत्थैः पक्त्वा वर्तिं सुवर्तिताम् घृताभ्यक्तां गुदे दद्यादुदावर्तविनाशिनीम् ॥ १ ॥ इति फलवर्तयः ॥ अथोदयमार्तण्डो रसः ॥ हिङ्गुलं जयपालटङ्कणविषाण्यन्त्यार्धभागोत्तरं सर्वं खल्वतले विमर्द्य मतिमान् गुञ्जाद्वयं वै ददेत् । मार्तण्डोदयको ज्वरादिसहितान्यः सोदराध्मानके पाण्ड्वाजीर्णगदेऽनुपानवशतः पथ्यं च तक्रोदनम् ॥१॥ व्योषेणार्द्ररसेन तत्र सितया युक्तो ज्वरे दारुणे मान्द्ये गुल्मकफानले च पवने शूले च शोफोदरे । वातास्रे स्वरवर्णकुष्ठगुदजान् रोगानशेषाञ्जयेत् ॥ २ ॥ अथ नाराचरसः ॥ जेपालेन समैः

---

१ (च०) वाल्यम् ।

सूतव्योषटङ्कणगन्धकैः। नाराचः स्याद्रसो ह्येष माषसर्पिःसितायुतः। हन्त्युदावर्तमानाहमुदराणि च गुल्मकम् ॥ १ ॥ इत्युदावर्तचिकित्सा ॥

॥ अथानाहनिदानम् ॥

आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन। प्रवर्तमानं न यथा स्वमेनं विकारमानाहमुदाहरन्ति ॥ १ ॥ अथामजमानाहमाह ॥ तस्मिन्भवत्यामसमुद्भवे तु तृष्णाप्रतिशायशिरोविदाहाः। आमाशये शूलमथो गुरुत्वं हृत्स्तम्भनोद्गारविघातनं च ॥ १ ॥ अथ शकृत्सञ्चयमाह ॥ स्तम्भः कटीपृष्ठपुरीषमूत्रे शूलोऽथ मूर्च्छा शकृतो वमिश्च। श्वासश्च पक्वाशयजे भवन्ति तथालसोक्तानि च लक्षणानि ॥ १ ॥ उदावर्तिनमप्येनमानाहिनमथापि वा। तृष्णोपद्रवसंयुक्तं तं त्यजेद्भिषजां वरः ॥ २ ॥

॥ अथानाहचिकित्सा ॥

आनाहेऽपि प्रयुञ्जीत उदावर्तहरीं क्रियाम् ॥ तत्राप्यत्र विशेषमाह। त्रिवृद्धरीतकीश्यामाः स्नुहीक्षीरेण भावयेत्। वटिका मूत्रपीतास्ताः श्रेष्ठास्त्वानाहभेदिकाः ॥ १ ॥ हिङ्गूग्रगन्धाविडशुण्ठ्यजाजीहरीतकीपुष्करमूलकुष्ठम्। भागोत्तरं चूर्णितमेतदिष्टं गुल्मोदरानाहविषूचिकासु ॥ १ ॥ वचाभयाचित्रकयावशूकान् सपिप्पलीकातिविषासकुष्ठान्। उष्णाम्बुनानाहविमूढवातान्पीत्वा जयेदाशु रसौदनाशी ॥ २ ॥ अथ राढधूमादिवर्तिः ॥ राढधूमबिडव्योषगुडमूत्रविपाचिता। गुदेऽङ्गुष्ठसमावर्तिर्विधेयानाहशूलनुत् ॥ १ ॥ विपाच्य मूत्राम्लरसेन दन्तीपिण्डीतकृष्णाबिडकृष्णधूमैः। वर्तिं कराङ्गुष्ठनिभां[1] घृताक्तां गुदे रुजानाहहरीं विदध्यात् ॥ २ ॥ इत्यानाहचिकित्सा ॥ अथ पथ्यापथ्यम् ॥ विष्टम्भीनि विरुद्धानि कषायाणि गुरूणि च। उदावर्ते प्रयत्नेन वर्जयेत्सततं नरः ॥१॥ उदावर्ते हितं सर्वं पाचनं लङ्घनं तथा। आनाहे तु यथायोग्यं सेवयेन्मतिमान्नरः ॥ २ ॥ इति पथ्यापथ्यम् ॥

॥ अथातो गुल्मनिदानं व्याख्यास्यामः ॥

अथ तस्य सम्प्राप्तिमाह। दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः। कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ १ ॥ तेषां स्थानान्याह ॥ तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः ॥ तस्य लक्षणमाह ॥ हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः वृत्तश्चयापचयवान् स गुल्म इति कीर्तितः ॥ १ ॥ विशेषलक्षणं चरके ॥ तृष्णाज्वरपरीतश्च दाहस्वेदाग्निमार्दवैः। गुल्मिनामरुचौ चापि रक्तमेवावसेचयेत् ॥१॥ भट्टारकहरिश्चन्द्रः ॥ स्त्रीणामावर्तजो गुल्मो न पुंसामुपजायते। अन्यस्त्वसृग्भवो गुल्मः स्त्रीणां

---

1 (च०) कृष्णाबिडकृष्णधूमान्।

पुंसां च जायते ॥१॥ निरूढमूलप्रभवो हि कोष्ठे स्थितः स्वतन्त्रः परसंश्रयो वा । स्पर्शोपलब्धः परिपिण्डितत्वाद्गुल्मो यथा दोषमुपैति नाम ॥२॥ स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः । पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ ३ ॥ तस्य पूर्वरूपमाह ॥ उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि । आटोपमाध्मानमपक्तिशक्तिरासन्नगुल्मस्य वदन्ति चिह्नम् ॥ १ ॥ सर्वगुल्मानां सामान्यलक्षणमाह ॥ अरुचिः कृच्छ्रविण्मूत्रं वातान्त्रप्रतिकूजनम् । आनाहं चोर्ध्ववातत्वं सर्वगुल्मेषु लक्षयेत् ॥ १ ॥ अथ वातजमाह ॥ रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च । शोकोऽभिघातोऽतिमलक्षयश्च निरन्नता चानिलगुल्महेतुः ॥१॥ यः स्थानसंस्थानरुजाविकल्पं विड्वातसङ्गं गलवक्त्रशोषम् । श्यावारुणत्वं शिशिरज्वरं च हृत्कुक्षिपार्श्वांसशिरोरुजं च ॥२॥ करोति जीर्णेऽभ्यधिकं प्रकोपं भुक्ते मृदुत्वं समुपैति यश्च । वातात्स गुल्मो न च तत्र रूक्षं कषायतिक्तं कटु चोपशेते ॥ ३ ॥ पैत्तिकमाह ॥ कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा । आमाभिघातो रुधिरं च दुष्टं पित्तस्य गुल्मस्य निमित्तमुक्तम् ॥१॥ तस्य पूर्वरूपमाह ॥ ज्वरः पिपासा वदनाङ्गरागः शूलं महज्जीर्यति भोजने च । स्वेदो विदाहो व्रणवच्च गुल्मः स्पर्शासहः पैत्तिकगुल्मरूपम् ॥१॥ अथ श्लैष्मिकमाह ॥ शीतं गुरु स्निग्धमचेष्टनं च सम्पूरणं प्रस्वपनं दिवा च । गुल्मस्य हेतुः कफसम्भवस्य सर्वश्च दुष्टो निचयात्मकस्य ॥१॥ अथ पुनः श्लैष्मिकरूपाण्याह ॥ स्तैमित्यशीतज्वरगात्रसादहृल्लासकासारुचिगौरवाणि । शैत्यं रुगल्पा कठिनोन्नतत्वं गुल्मस्य रूपाणि कफात्मकस्य ॥१॥ द्वन्द्वत्रिदोषजेष्वेकहेतुलक्षणनिर्देशार्थमाह ॥ निमित्तलिङ्गान्युपलभ्य गुल्मे द्विदोषजे दोषबलाबलं च । व्यामिश्रलिङ्गानपरांस्तु गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम् ॥ १ ॥ अथ त्रिदोषजस्यासाध्यत्वमाह ॥ महारुजं दाहपरीतमश्मवद् घनोन्नतं शीघ्रविदाहि दारुणम् । मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशेत् ॥१॥ अथ स्त्रीणां रक्तगुल्मस्य सम्प्राप्तिमाह । नवप्रसूताहितभोजना या या चामगर्भं विसृजेदृतौ वा । वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम् ॥ १ ॥ उक्तं चरके । ऋतावनाहारभयातपेन विरूक्षणैर्वेगविधारणैश्च । संस्तम्भनोल्लेखनयोनिदोषैर्गुल्मः स्त्रिया रक्तभवोऽभ्युपैति ॥१॥ तस्य लिङ्गमाह ॥ पित्तस्य गुल्मेन समानलिङ्गं विशेषणं चाप्यपरं निबोध । यः स्पन्दते पिण्डित एव नाङ्गैश्चिरात्स शूलः समगर्भलिङ्गः ॥ स रौधिरः स्त्रीभव एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः ॥ १ ॥ अथ चिरजस्यावस्थायामसाध्यत्वमाह ॥ सञ्चितः क्रमशो गुल्मो महावास्तुपरिग्रहः । कृतः शूलः शिरोनद्धो यदा कूर्म इवोन्नतः ॥ १ ॥ दौर्बल्यारुचिहृल्लासकासवम्यरतिज्वरैः । तृष्णातन्द्राप्रतिश्यायैर्युज्यते स न सिध्यति॥ २ पुनरसाध्यलक्षणमाह ॥ गृहीत्वा सज्वरं श्वासच्छर्द्यतीसारपीडितम् । हृन्नाभिहस्तपादे शोथः कर्षति गुल्मिनम् ॥ १ ॥ अथ पुनः श्वासासाध्यलक्षणमाह ॥ श्वासः शू

१ (च०) वातेनान्त्रनिकूजनम् ।

पिपासाऽन्नविद्वेषो ग्रन्थिमूढता । जायते दुर्बलत्वं च गुल्मिनो मरणाय वै ॥ १ ॥
इति गुल्मनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

लङ्घनं दीपनं स्निग्धमुष्णं वातानुलोमनम् । बृंहणं च भवेदन्नं तद्धितं सर्वगुल्मिनाम् ॥ १ ॥ गुल्मिनामनिलशान्तिरुपायैः सर्वशो विधिवदाचरितव्या । मारुते तु विजितेऽन्यमुदीर्णं दोषमल्पमपि कर्म निहन्यात् ॥ २ ॥ सुखोष्णा जाङ्गलरसाः सुस्निग्धा व्यक्तसैन्धवाः । कटुत्रिकसमायुक्ता हिताः पानेषु गुल्मिनाम् ॥ ३ ॥ कृमिपिण्डेष्टकास्वेदान्कारयेत्कुशलो भिषक् । उपनाहाश्च कर्तव्याः सुखोष्णाः शाल्वणादयः ॥ ४ ॥ गुल्मस्थाने रक्तमोक्षो बाहुमध्ये शिराव्यधः । स्वेदानुलोमनं चैव प्रशस्तं सर्वगुल्मिनाम् ॥ ५ ॥ अथ वातगुल्मचिकित्सा ॥ प्रागेव वातजे गुल्मे सुस्निग्धं स्वेदितं नरम् । रेचितं स्नेहरेकैश्च निरूहैः सानुवासनैः ॥ उपाचरेद्भिषक् प्राज्ञो मात्राकालविशेषतः ॥ १ ॥ अथ मातुलुङ्गादियोगः ॥ मातुलुङ्गरसे हिङ्गु दाडिमं विडसैन्धवम् । सुरामण्डेन पातव्यं वातगुल्मरुजापहम् ॥ १ ॥ अथ वृन्दान्नागरादि ॥ नागरार्धपलं पिष्टं द्वे पले लुञ्चितस्य च । तिलस्यैकं गुडपलं क्षीरेणोष्णेन पाययेत् ॥ वातगुल्ममुदावर्तं योनिशूलं च नाशयेत् ॥१॥ अथ हिङ्गुपञ्चकम् ॥ हिङ्गुसैन्धववृक्षाम्लराजिकानागरैः समैः । चूर्णं गुल्मप्रशमनं स्यादेतद्धिङ्गुपञ्चकम् ॥१॥ अथ केतकीक्षारयोगः ॥ स्वर्जिकाकुष्ठसहितः क्षारः केतकिसंभवः । पीतस्तैलेन शमयेद्वातगुल्मं सुदारुणम् ॥१॥ अथैरण्डतैलादियोगः ॥ पिबेदेरण्डतैलं वा वारुणीमण्डमिश्रितम् । तदेव तैलं पयसा वातगुल्मी पिबेन्नरः ॥ १ ॥ अथ वृन्दात् हपुषाद्यं घृतम् ॥ हपुषाजाजिपृथ्वीकापिप्पलीमूलचित्रकैः । क्षीरमूलककोलानां रसैश्च विपचेद् घृतम् ॥ १ ॥ वातगुल्मारुचिश्वासशूलानाहज्वरार्शसाम् । ग्रहणीयोनिदोषाणां घृतमेतन्निवारणम् ॥ २ ॥ अथ चित्रकाद्यं घृतम् ॥ चित्रकव्योषसिन्धूत्थपृथ्वीकाचव्यदाडिमैः । दीप्यकग्रन्थिकाजाजीहपुषाधान्यकैः समैः ॥ १ ॥ दध्यारनालबदरमूलकस्वरसैर्घृतम् । पक्त्वा पिबेद्वातगुल्मदौर्बल्याटोपशूलनुत् ॥२॥ अथ पथ्यम् । तित्तिरांश्च मयूरांश्च कुक्कुटान् क्रौञ्चवर्तिकान् । सर्पिःशालिप्रसन्नांश्च वातगुल्मे च योजयेत् ॥ १ ॥ वातगुल्मप्रतीकारे प्रकुप्यति यदा कफः । शस्तमुल्लेखनं तत्र चूर्णाद्याश्च कफापहाः ॥ २ ॥ यदि कुप्यति वा पित्तं विरेकस्तत्र भेषजम् । दोषघ्नैरप्यशान्ते च गुल्मे शोणितमोक्षणम् ॥ ३ ॥ इति वातगुल्मचिकित्सा ॥

॥ अथ पित्तगुल्मचिकित्सा ॥

अथ त्रिवृच्चूर्णम् ॥ पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलाम्बुना । विरेचनाय ससितं कम्पिल्लं च समाक्षिकम् ॥१॥ अथ द्राक्षादियोगः ॥ द्राक्षाभयारसं गुल्मे पैत्तिके सगुडं पिबेत् । सशर्करं वा विलिहेत्त्रिफलाचूर्णमुत्तमम् ॥१॥ अथ पथ्याद्यं घृतम् । रसेनाम-

लकेक्षूणां घृतपादं विपाचयेत् । पथ्यायाश्च पिबेत्सर्पिस्तत्सिद्धं पित्तगुल्मनुत् ॥ १ ॥ ॥ अथ द्राक्षाद्यं घृतम् ॥ द्राक्षामधुकखर्जूरं विदारीं सशतावरीम् । परूषकाणि त्रिफलां साधयेत्पलसंमिताम् ॥ १ ॥ जलाढके पादशेषे रसमामलकस्य च । घृतमिक्षुरसं क्षीरमभयाकल्कपादिकम् ॥ २ ॥ साधयेत्तद् घृतं सिद्धं शर्कराक्षौद्रपादिकम् प्रयोगः पित्तगुल्मघ्नः सर्वगुल्मविकारनुत् ॥ ३ ॥ अथ पथ्यम् ॥ शालिगोछागदुग्धं च पटोलं घृतमिश्रितम्। द्राक्षा परूषकं धात्री खर्जूरं दाडिमं सिताम् ॥ पथ्यार्थं पैत्तिके गुल्मे बलातोयं च योजयेत् ॥ १ ॥ इति पित्तगुल्मचिकित्सा ॥

॥ अथ श्लेष्मगुल्मचिकित्सा ॥

स्नेहोपनाहनस्वेदैस्तीक्ष्णस्रंसनवस्तुभिः । योगैश्च वातगुल्मोक्तैः श्लेष्मगुल्ममुपाचरेत् ॥ १ ॥ अथ तिलादिस्वेदः ॥ तिलैरण्डातसीबीजसर्षपैः परिलिप्य च । श्लेष्मगुल्ममयस्पात्रैः सुखोष्णैः स्वेदयेद्भिषक् ॥ १ ॥ अथ यवान्यादि ॥ यवानीं चूर्णितां तक्रे विडेन लवणीकृताम् । श्लेष्मगुल्मे पिबेद्वातमूत्रवर्चोऽनुलोमनम् ॥ १ ॥ अथ क्षीरषट्पलं घृतम् ॥ पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः । पलिकैः सयवक्षारैर्घृतप्रस्थं विपाचयेत् ॥ १ ॥ क्षीरप्रस्थेन तत्सर्पिर्हन्ति गुल्मं कफात्मकम् । ग्रहणीपाण्डुरोगघ्नं प्लीहकासज्वरापहम् ॥ २ ॥ अथ मिश्रकस्नेहः ॥ त्रिवृता त्रिफला दन्ती दशमूलं पलोन्मितम् । जले चतुर्गुणे पक्त्वा चतुर्भागावशेषिते ॥ १ ॥ सर्पिरैरण्डतैलं च क्षीरं चैकत्र साधयेत् । संसिद्धो मिश्रकस्नेहः सक्षौद्रः कफगुल्मनुत् ॥ २ ॥ इति मिश्रकः स्नेहः ॥ अथ पथ्यम् ॥ कुलत्थान् जीर्णशालींश्च षष्टीकान्यवजाङ्गलान् । मद्यं तैलं घृतं तक्रं कफगुल्मे प्रयोजयेत् ॥ १ ॥ इति कफगुल्मचिकित्सा ॥

॥ अथ त्रिदोषगुल्मचिकित्सा ॥

वरुणादिकषायस्तु गुल्मं दोषत्रयोत्थितम् । हन्ति हृत्पार्श्वशूलघ्नं सोपद्रवमसंशयम् ॥ १ ॥ अथ शार्ङ्गधराद्वरुणादिक्वाथः ॥ वरुणो बकपुष्पश्च बिल्वापामार्गचित्रकाः । अग्निमन्थद्वयं शिग्रुद्वयं च बृहतीद्वयम् ॥ १ ॥ सैरेयकत्रयं मूर्वा मेषशृङ्गी किरातकः । अजशृङ्गी च बिम्बी च करञ्जश्च शतावरी ॥ २ ॥ वरुणादिगणक्वाथः कफमेदोहरः स्मृतः । हन्ति गुल्मं शिरःशूलं तथाभ्यन्तरविद्रधीन् ॥ ३ ॥ इति त्रिदोषगुल्मचिकित्सा ॥

॥ अथ रक्तगुल्मप्रतीकारः ॥

पित्तवद्रक्तगुल्मिन्या नार्याः कार्यो यथाविधि । प्रस्निग्धस्विन्नकोष्ठाया योज्यं स्नेहविरेचनम् ॥ १ ॥ अथ शताह्वादिकल्कः ॥ शताह्वाचिरिबिल्वत्वग्दारुभार्गीकणोद्भवः । कल्कः पीतो जयेद् गुल्मं तिलक्वाथेन रक्तजम् ॥ १ ॥ अथ तिलक्वाथः ॥ तिलक्वाथो गुडघृतव्योषभार्गीरजोऽन्वितः । पानं रक्तभवे गुल्मे नष्टे पुष्पे

---

१ (च०) बस्तिभिः । २ (ख० ङ०) शूलाघ्नम् । (ग० घ०) शूलाढ्यम् ।

च योषितः ॥ १ ॥ अथ सुश्रुतात् तिलमूलादिचूर्णम् ॥ तिलमूलं च शिग्रुं च ब्रह्मदण्डीयमूलकम् । मधुयष्टीत्रिकटुकैर्युतं चूर्णमुपासयेत् ॥ पुष्परोधे वातगुल्मे स्त्रीणां सद्यः सुखावहम् ॥ १ ॥ अथ भार्ग्यादिचूर्णम् ॥ भार्गी कृष्णा करञ्जत्वग् ग्रन्थिकामरदारुजम् । चूर्णं तिलानां क्वाथेन रक्तगुल्मरुजापहम् ॥ १ ॥ अथ दन्त्यादिगुटिका ॥ दन्तीहिङ्गुयवक्षारालाबुबीजकणागुडाः । स्नुहीक्षीरेण गुटिका सर्वेषां कर्षमात्रिका ॥ भक्षिता रक्तगुल्मघ्नी रुधिरस्रावकारिणी ॥१॥ अथार्कपुष्पयोगः ॥ पक्वं तैलेऽर्कजं पुष्पं रुधिरस्रावकारि च ॥१॥ अथ पलाशक्षारघृतम् ॥ पलाशक्षारतोयेन सर्पिः सिद्धं पिबेद्बुधः । यस्मिन्नवसरे क्षारतोयसाध्यघृतादिषु ॥ १ ॥ फेनोद्गमस्य निर्वृत्तिर्नष्टदुग्धसमाकृतिः । स एव तस्य पाकस्य कालो नेतरलक्षणः ॥२॥ इति पलाशक्षारघृतम्* ॥ अथ वृन्दान्मुण्ड्यादि ॥ मुण्डीरोचनिकाचूर्णं शर्करामाक्षिकान्वितम् । विदध्यात्तास्रगुल्मिन्यां मलसंरेचनाय च ॥ १ ॥ उष्णैर्वा भेदयेद्भिन्ने विधिर्वासृग्दरे हितः । अतिप्रवृत्तमस्रं तु भिन्ने गुल्मे निवारयेत् ॥ २ ॥ इति रक्तगुल्मप्रतीकारः ॥

॥ अथ सामान्यविधिः ॥

अथ चित्रकादिक्वाथः ॥ चित्रकग्रन्थिकैरण्डशुण्टीक्वाथः परं हितः । शूलानाहविबन्धेषु सहिङ्गुबिडसैन्धवः ॥ १ ॥ अथ हिङ्ग्वादि चूर्णम् ॥ हिङ्गुग्रन्थिकधान्यजीरकवचाचव्याग्निपाठासटीवृक्षाम्लं लवणत्रयं त्रिकटुकं क्षारद्वयं दाडिमम् । पथ्यापुष्करवेतसाम्लहपुषाजाज्यस्तदेभिः कृतं चूर्णं भावितमेतदार्द्रकरसैः स्याद्बीजपूरस्य च ॥१॥ आध्मानग्रहणीविकारगुदजान् गुल्मानुदावर्तकान् प्रत्याध्मानगदं तथाऽश्मरियुतं तूनीद्वयारोचकान् । ऊरुस्तम्भमतिभ्रमं च मनसो बाधिर्यमष्ठीलकां प्रत्यष्ठीलिकिकामथापहरते प्राक्पीतमुष्णाम्बुना ॥ २ ॥ हृत्कुक्षिवङ्क्षणकटीजठरान्तरेषु बस्तिस्तनांसफलकेषु च पार्श्वयोश्च । शूलानि नाशयति वातबलासजानि हिङ्ग्वादि मान्यमिदमश्विनसंहितायाम् ॥३॥ अथ वृन्दाद्धिङ्गुनवकम् ॥ हिङ्गुपुष्करमूलानि तुम्बरूणि हरीतकी । श्यामा बिडं सैन्धवं च यवक्षारं महौषधम् ॥ १ ॥ यवक्वाथोदकेनैतद् घृतभृष्टं तु पाचयेत् । तेनास्य भिद्यते गुल्मः सशूलः सपरिग्रहः ॥२॥ अथ भास्करलवणाद्यं चूर्णम् ॥ सामुद्रलवणं ग्राह्यमष्टकर्षमितं बुधैः । एवं सौवर्चलं ग्राह्यं बिडसैन्धवधान्यकम् ॥ १ ॥ पिप्पलीपिप्पलीमूलं कर्षं जीरकपत्रकम् । नागकेशरतालीसमम्लवेतसकं तथा ॥ २ ॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः । मरीचं जीरकं विश्वमेकैकं कर्षमात्रकम् ॥ ३ ॥ दाडिमस्य चतुष्कर्षं त्वगेलाचार्धकर्षिका । एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधम् ॥ ४ ॥ शाणप्रमाणं देयं तु मस्तुतक्रसुरासवैः । वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षतम् ॥ ५ ॥ अर्शांसि ग्रहणीं कुष्ठं विबन्धं च भगन्दरम् । शोथं शूलं श्वासकासमामदोषं च हृद्रुजम् ॥ ६ ॥ मन्दाग्निं ना-

* अकल्कमेव घृतमेतत्पक्तव्यम् ।

१ (ख०) निर्वृत्ति—। २ (च०) दशा—।

शयत्येतद्दीपनं पाचनं परम् । सर्वलोकहितार्थाय भास्करेणोदितं पुरा ॥ ७ ॥ इति शार्ङ्गधरात् ॥ अथ क्षारद्वयादि ॥ क्षारद्वयानलव्योषनीलीलवणपञ्चकम् । चूर्णितं सर्पिषा पेयं सर्वगुल्मोदरापहम् ॥ १ ॥ अथाग्निमुखरसः ॥ हिङ्गुभागो भवेदेको वचा च द्विगुणा भवेत् । पिप्पली त्रिगुणा ज्ञेया शृङ्गबेरं चतुर्गुणम् ॥ १ ॥ यवानिका पञ्चगुणा षड्गुणा च हरीतकी । चित्रकं सप्तगुणितं कुष्ठं चाष्टगुणं भवेत् ॥२॥ एतद्वातहरं चूर्णं पीतमात्रं प्रसन्नया । पिबेद्दध्ना मस्तुना वा सुरया कोष्णवारिणा ॥३॥ उदावर्तमजीर्णं च प्लीहानमुदरं तथा । अङ्गानि यस्य शीर्यन्ते विषं वा येन भक्षितम् ॥ अर्शोहरो दीपनश्च शूलघ्नो गुल्मनाशनः ॥ ४ ॥ कासं श्वासं निहन्त्याशु तथैव क्षयनाशनः । चूर्णो ह्यग्निमुखो नाम्ना न क्वचित्प्रतिहन्यते ॥ ६ ॥ अथ काङ्कायनगुटिका ॥ यवानी जीरकं धान्यं मरिचं गिरिकर्णिका । अजमोदोपकुञ्ची च चतुःशाणाः पृथक् पृथक् ॥१॥ हिङ्गुषट्शाणकं कार्यं शाणो लवणपञ्चकात् । त्रिवृच्चाष्टमितैः शाणैः प्रत्येकं कल्पयेत्सुधीः ॥२॥ दन्ती शठी पौष्करं च विडङ्गं दाडिमं शिवा । चित्रोऽम्लवेतसः शुण्ठी शाणैः षोडशभिः पृथक् ॥३॥ बीजपूररसेनैषां गुटिकां कारयेद्बुधः । घृतेन पयसा चाम्लैः रसैरुष्णोदकेन वा ॥ ४ ॥ पिबेत्काङ्कायनप्रोक्ता गुटिका गुल्मनाशिनी । मद्येन वातिकं गुल्मं गोक्षीरेण च पैत्तिकम् ॥५॥ मूत्रेण कफगुल्मं च दशमूलैस्त्रिदोषजम् । उष्ट्रीदुग्धेन नारीणां रक्तगुल्मं निवारयेत् ॥ हृद्रोगं ग्रहणीशूलं कृमीनर्शांसि नाशयेत् ॥ ६ ॥ इति शार्ङ्गधरात् ॥ अथ चिञ्चाक्षारादिशङ्खवटी ॥ चिञ्चाक्षारं स्नुहीक्षारमर्कक्षारं पलं[1] पलम् । द्विपलं शङ्खजं भस्म रामठं च पलार्धकम् ॥१॥ लवणानि च सर्वाणि पलमात्राणि योजयेत् । क्षारद्वयं पलार्धं[2] च सर्वमेकत्र योजयेत् ॥२॥ जम्बीरकरसैर्मर्द्यमनलस्य दिनत्रयम् । भृङ्गराजस्य निर्गुण्ड्या मुण्ड्याश्चैव पृथग् द्रवैः ॥३॥ आर्द्रकस्य रसेनैव प्रत्येकं दिनमर्दितम् । बदरीबीजमात्रांस्तु वटकान्कारयेद्भिषक् ॥४॥ एकैकं भक्षयेत्प्रातः पञ्चगुल्मान् व्यपोहति । सर्वं शूलं निहन्त्याशु अजीर्णं च विषूचिकाम् ॥ ५ ॥ मन्दाग्निं नाशयेच्छीघ्रं पथ्यं तैलाम्लवर्जितम् । चिञ्चाशङ्खवटी नाम ग्रहणीरोगहृत्परा ॥ ६ ॥ अथ वज्रक्षारः ॥ सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् । टङ्कणं स्वर्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥१॥ अर्कक्षीरैः स्नुहीक्षीरैः शोषयेदातपे त्र्यहम् । अर्कपत्रं लिपेत्तेन रुद्ध्वा भाण्डे पुटे पचेत् ॥२॥ तं क्षारं चूर्णयित्वाथ त्र्यूषणं त्रिफलारजः । क्षारार्धं योजयेत्सम्यगेकीकृत्य विचूर्णयेत् ॥३॥ जीरकं रजनीवह्निनवकस्य समं ततः । वज्रक्षारमिमं शुद्धं स्वयं प्रोक्तं पिनाकिना ॥४॥ सर्वोदरेषु गुल्मेषु शूले शोफे च योजयेत् । अग्निमान्द्ये त्वजीर्णे च भक्षेन्निष्कद्वयं तथा ॥ ५ ॥ वाताधिके जलैः कोष्णैः घृतैः पित्ताधिके हितः । कफे गोमूत्रसंयुक्त आरनालैस्त्रिदोषनुत् ॥ ६ ॥ अथ योगसागराच्छङ्खद्रावः ॥ प्रस्थं जम्बीरनीरं बदरपरिमितं ॥ काकतुण्डस्य मूलं कर्षार्धं स्वर्जिकायास्त्रिपटुपलयुतं नव्यसारं पलार्धम् । तत्सर्वं सूर्य- ॥-च

1 (च०) पलद्वयम् । 2 (च०) पलांशम् ।

तापे मुनिदिनयुगुलं काचकुप्यां निधाय हन्याद् गुल्मं सुतीव्रं जठरमलरुजं शङ्खक-द्रावसंज्ञः ॥ १ ॥ इति शङ्खद्रावः ॥ अथान्यः शङ्खद्रावः ॥ फटकीपलमेकं च सैन्धवं पलमेव च । द्विपलं च यवक्षारं द्विपलं नवसागरम् ॥ १ ॥ चतुष्पलं सुराक्षारं पलार्धं कासिसं तथा । डमरुयन्त्रयोगेन चुल्ल्यां वै बदरीन्धनैः ॥ २ ॥ साधयेल्लाघवाचूर्णं शङ्खद्रावरसं परम् । गुल्मादिसर्वरोगेषु देयः सर्वसुखप्रदः ॥ ३ ॥ अन्यश्च ॥ सैन्धवं च यवक्षारं नव्यसारं तथैव च । प्रत्येकं द्विपलं ग्राह्यं सुराक्षारं चतुष्पलम् ॥ १ ॥ फटकीपलमेकं च पलार्धं कासिसं तथा । सर्वमेकत्र संयोज्य डमरुयन्त्रमध्यगे ॥ २ ॥ चुल्ल्यां प्ररोहयेत्तत्तु ज्वालयेत् खदिरेन्धनैः । द्रावितं तत्समादाय तेजोरूपं जलप्रभम् ॥ ३ ॥ द्रावयेदखिलान्धातून्वराटांश्च न संशयः । शङ्खद्रावरसो नाम गुल्मोदरहरः परः ॥ ४ ॥ इति शङ्खद्रावः ॥ अथ क्रव्यादरसः ॥ द्विपलं गन्धकं शुद्धं द्रावयित्वा विनिक्षिपेत् । पारदं पलमानेन मृतशुल्बायसी पुनः ॥ १ ॥ कर्षमानेन संमिश्र्य पञ्चाङ्गुलदले क्षिपेत् । ततो विचूर्ण्य यत्नेन निक्षिप्याय-सपात्रके ॥ २ ॥ चुल्ल्यां निवेश्य यत्नेन चालयेन्मृदुवह्निना । पात्रं पात्रं हि जम्बीररसं तत्र प्रचारयेत् ॥ ३ ॥ पञ्चकोलसमुद्भूतैः कषायैः साम्लवेतसैः । भावनाः खलु दात-व्याः पञ्चाशत्प्रमितास्तथा ॥ ४ ॥ भृष्टटङ्कणचूर्णेन तुल्येन सह मेलयेत् । तदर्धं पञ्चलवणैः सर्वसाम्यमरीचकैः ॥ ५ ॥ सप्तधा भावयेत्पश्चाच्चणकक्षारवारिणा । ततः संशोष्य संपेष्य कूपिकाभ्यन्तरे क्षिपेत् ॥६॥ अत्यन्तगुरुभोज्यानि गुरुमांसान्यनेकशः । भक्षेच्चाकण्ठपर्यन्तं ततो देयो रसोत्तमः ॥ ७ ॥ चतुर्वल्लमितो देयस्तक्रैः सलवणैरपि । भुक्तं जीर्यति तत्क्षिप्रं जायते दीपनं परम् ॥ ८ ॥ रसः क्रव्यादनामायं प्रोक्तो म-न्थानभैरवैः । सिंहलक्षोणिपालाय भूरिमांसभुजे तथा ॥ ततः क्रव्यादयं प्रोक्तो दृढं¹ प्रत्ययकारकः ॥९॥ कुर्याद्दीपनमुद्धतं पवनजं देहे परं शोषणं तुन्दस्थौल्यनिब-र्हणो गरहरो दुष्टव्रणार्तिप्रणुत् । कासश्वासविनाशनो ग्रहणिकाविध्वंसनः स्रंसनो गुल्मप्लीहजलोदरोपशमनः क्रव्यादनामा रसः ॥१०॥ विश्वहिङ्गुबिडैः सार्धं क्रव्यादो भक्षितो रसः । गुल्मानशेषान्प्लीहानं विद्रधीनपि नाशयेत् ॥११॥ इति क्रव्यादः ॥ अथ गदनिग्रहाच्चविकासवः ॥ चविकायास्तुलार्धं तु तदर्धं चित्रकस्य च । वाष्पिका पु-ष्करं मूलं षड्ग्रन्था हपुषा शटी ॥१॥ पटोलमूलत्रिफलायवानीकुटजत्वचः । विशाला धान्यकं रास्ना दन्ती दशपलोन्मिता ॥ २ ॥ कृमिघ्नमुस्तमञ्जिष्ठादेवदारुकटुत्रिकम् । भागान्पञ्चपलानेतानष्टद्रोणेऽम्भसः पचेत् ॥३॥ द्रोणशेषे रसे पूते देयं गुडशतत्रयम् धातक्या विंशतिपलं चातुर्जातं पलाष्टकम् ॥ ४ ॥ लवङ्गव्योषकङ्कोलं पलिकानि प्रकल्पयेत् । निदध्यान्मासमेकं तु घृतभाण्डे सुसंस्कृते ॥ ५ ॥ चतुष्पलां पिबेन्मात्रां प्रातः पिबं नियच्छति । सर्वगुल्मविकारांश्च प्रमेहांश्चैव विंशतिम् ॥६॥ प्रतिश्यायं क्षयं कासमष्ठीलां वातशोणितम् । उदराण्यन्त्रवृद्धिं च चविकाख्यो महासवः ॥ ७ ॥ इति

---

१ (ख०) दृढप्रत्ययकारकः ।

चविकासवः ॥ अथ कुमार्यासवः ॥ कुमार्याश्च रसद्रोणे गुडं पलशतं तथा । तुलाद्विसहस्र्यां विजयां क्वाथयेत्तज्जलार्मणे ॥ १ ॥ चतुर्थांशावशेषे तु पूते तस्मिन्निधापयेत् । मधुनश्चाढकं दत्त्वा धातक्या द्विपलाष्टकम् ॥ २ ॥ स्निग्धभाण्डे विनिक्षिप्य कल्कं चैव प्रदापयेत् । जातीफलं लवङ्गं च कक्कोलं च कबाबकम् ॥ ३ ॥ जटिलाचव्यचित्रं च जातीपत्री सकर्कटम् । अक्षं पुष्करमूलं च प्रत्येकं च पलं पलम् ॥४॥ मृतं शुल्बं तथा लोहं शुक्तिमात्रं प्रदापयेत् । भूम्यां वा धान्यराशौ वा स्थापयेद्दिनविंशतिम् ॥५॥ तमुद्धृत्य पिबेन्मात्रां यथा चाग्निबलाबलम् । पञ्चकासं तथा श्वासं क्षयरोगं च दारुणम् ॥६॥ उदराणि तथाष्टौ च षडर्शांसि च नाशयेत् । वातव्याधिमपस्मारमन्यान् रोगान्सुदारुणान् ॥ ७ ॥ जाठरं कुरुते दीप्तं कोष्ठशूलं च नाशयेत् । गुल्माष्टकं नष्टपुष्पं नाशयेदेकपक्षतः ॥ कुमारिकासवो ह्येष बृहस्पतिविनिर्मितः ॥ ८ ॥ इति कुमार्यासवः ॥ अथ हिङ्ग्वादि घृतम् ॥ हिङ्गुपुष्करमूलानि तुम्बरूणि हरीतकी । श्यामा विडं सैन्धवं च यवक्षारं महौषधम् ॥ १ ॥ यवक्वाथोदकेनैतद् घृतप्रस्थं विपाचयेत् । तेनास्य भिद्यते गुल्मः सशूलः सपरिग्रहः ॥२॥ अथ दधिकादि घृतम् ॥ बिडदाडिमसिन्धूत्थहुतभुग्व्योषजीरकैः । हिङ्गुसौवर्चलक्षारचुक्रवृक्षाम्लवेतसैः ॥१॥ बीजपूररसोपेतैः सर्पिर्दधि चतुर्गुणम् । साधितं दधिकं नाम्ना गुल्महृत्प्लीहनुत्परम् ॥ २ ॥ अथ वृन्दात् त्रायमाणादि ॥ जले दशगुणे साध्यं त्रायमाणं चतुष्पलम् । पञ्चभागान्वितैः कल्कैः संयोज्यं चैव कार्षिकैः ॥१॥ रोहिणी कटुका मुस्ता त्रायमाणा दुरालभा । द्राक्षा तामलकी वीरा जीवन्ती चन्दनोत्पलम् ॥ २ ॥ रसस्यामलकानां च क्षीरस्य च घृतस्य च । पलानि पृथगष्टाष्टौ सम्यग् दत्त्वा विपाचयेत् ॥ ३ ॥ पित्तगुल्मं रक्तगुल्मं विसर्पं पित्तजं ज्वरम् । हृद्रोगं कामलां कुष्ठं हन्यादेतद् घृतोत्तमम् ॥ ४ ॥ अथ सामुद्रादिवर्तिः ॥ वातवर्चोनिरोधेषु सामुद्रार्द्रकसर्षपैः । कृत्वा पायौ विधातव्या वर्तयो मरिचान्वितैः ॥ १ ॥

॥ अथ रसाः ॥

अथादौ नाराचो रसः ॥ शुद्धसूतं समं गन्धं जेपालं त्रिफलासमम् । त्रिकटुं पेषयेत्क्षौद्रमिश्रं गुल्मं लिहन्हरेत् ॥ उष्णोदकं पिबेच्चानु नाराचोऽयं रसोत्तमः ॥१॥ इति नाराचो रसः ॥ अथ वडवानलरसः ॥ शुद्धसूतं समं गन्धं मृतं ताम्राभ्रटङ्कणम् । सामुद्रं च यवक्षारं स्वर्जिसैन्धवनागरम् ॥ १ ॥ अपामार्गस्य च क्षारं पालाशं वत्सनाभकम् । प्रत्येकं सूततुल्यं स्याच्चणकाम्लेन मर्दयेत् ॥ २ ॥ हस्तिकन्याद्रवैश्चाहो आर्द्रयुक्तं पुटेल्लघु । माषैकं भक्षयेन्नित्यं रसोऽयं वडवानलः ॥ सर्वं गुल्मं निहन्त्याशु ग्रहणीं च विशेषतः ॥ ३ ॥ इति वडवानलरसः ॥ अथ गुल्मकुठारो रसः ॥ नागवङ्गाभ्रकं कान्तं समं ताम्रं समांशकम् । जम्बीरस्वरसैर्घृष्टा वटी गुञ्जाप्रमाणिका ॥ १ ॥ मधुनार्द्रकनीरेण क्षारयुग्मेन सेविता । अजीर्णमाम्लं गन्धं च हृत्पार्श्वोदरशूलके ॥ नाम्ना गुल्मकुठारोऽयं सर्वगुल्मान्व्यपोहति ॥ २ ॥ अथ

काश्यपात् मदेभसिंहसूतो रसः॥ रसगन्धवराटताम्रशङ्खं विषवङ्गाभ्रककान्ततीक्ष्णमुण्डम्। अहिहिङ्गुलटङ्कणं समांशं सकलं तद्द्विगुणं पुराणकिट्टम्॥ १॥ पशुमूत्रविशोधितं सुभृष्टा त्रिफलाभृङ्गरजार्द्रकोत्थनीरैः। सुविशोष्य वरामृतालिवासास्वरसैः रष्टगुणैः पुनर्नवोत्थैः॥२॥ पृथगग्निकृतं घनं विपाच्य गुटिका गुञ्जयुता निजानुपानैः। ज्वरपाण्डुतृषास्रपैत्यगुल्मक्षयकासस्वरमग्निसादमूर्च्छाः॥ ३॥ पवनादिषु दुस्तराष्टरोगान् सकलं पित्तहरं मदावृतं च। बहुना किमसौ यथार्थनामा सकलव्याधिहरो मदेभसिंहः॥ ४॥ अथ प्रवालपञ्चामृतरसः॥ प्रवालमुक्ताफलशङ्खशुक्तिकपर्दिकानां च समांशभागम्। प्रवालमात्रं द्विगुणं प्रयोज्यं सर्वैः समांशं रविदुग्धमेव॥१॥ एकीकृतं तत्खलु भाण्डमध्ये क्षिप्त्वा मुखे बन्धनमत्र योज्यम्। पुटं विदध्यादतिशीतले च उद्धृत्य तद्भस्म क्षिपेत्करण्डे॥२॥ नित्यं द्विवारं प्रतिपाकयुक्तं वल्लप्रमाणं हि नरेण सेव्यम्। आनाहगुल्मोदरप्लीहकासश्वासाग्निमान्द्यान् कफमारुतोत्थान्॥३॥ अजीर्णमुद्गारहृदामयघ्नं ग्रहण्यतीसारविकारनाशनम्॥४॥ मेहामयं मूत्ररोगं मूत्रकृच्छ्रं तथाश्मरीम्। नाशयेन्नात्र सन्देहः सत्यं गुरुवचो यथा॥५॥ पथ्याश्रितं भोजनमादरेण समाचरेन्निर्मलचित्तवृत्त्या। प्रवालपञ्चामृतनामधेयो योगोत्तमः सर्वगदापहारी॥६॥ इति रसाः॥

॥ अथ पथ्यापथ्यम्॥

संवत्सरसमुत्पन्नाः कलमा रक्तशालयः। खण्डं कुलत्थयूषश्च धन्वमांसरसः सुराः॥ १॥ गवामजानाञ्च पयो मृद्वीका च परूपकम्। तक्रमेरण्डतैलं च लशुनं बालमूलकम्॥२॥ पत्तूरो वास्तुकं शिग्रु मातुलुङ्गं हरीतकी। वातानुलोमनं चैव पथ्यं गुल्मे नृणां भवेत्॥ ३॥ माषादयः शिम्बिधान्ये शूकधान्ये यवादयः। वल्लूरं मूलकं मत्स्यं मधुराणि फलानि च॥ ४॥ अधोवायुशकृन्मूत्रश्रमश्वासाश्रुधारणम्। वमनं जलपानं च गुल्मरोगी परित्यजेत्॥ ५॥ इति पथ्यापथ्यम्॥ इति गुल्मरोगचिकित्सा॥

॥ अथातो हृद्रोगनिदानम्॥

अत्युष्णगुर्वम्लकषायतिक्तैः श्रमाभिघाताध्यशनप्रसङ्गैः। संचिन्तनैर्वेगविधारणैश्च हृदामयः पञ्चविधः प्रदिष्टः॥ १॥ अथ तस्य संप्राप्तिमाह॥ दूषयित्वा रसं दोषा विगुणा हृदयं गताः। हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते॥ १॥ अथ वातिकमाह॥ आयम्यते मारुतजे हृदयं तुद्यते तथा। निर्मथ्यते दीर्यते च स्फोट्यते पाट्यतेऽपि च॥१॥ अथ पैत्तिकमाह॥ तृष्णोष्णदाहचोषाः स्युः पैत्तिके हृदये क्लमः। धूमायनं च मूर्च्छा च स्वेदः शोषो मुखस्य च॥ १॥ अथ श्लैष्मिकमाह॥ गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्दवम्। माधुर्यमपि चास्यस्य बलासो वर्तते हृदि॥ १॥ ॥ अथ त्रिदोषकृमिजयोर्मिलितमेव लक्षणमाह॥ विद्यात्त्रिदोषमप्येवं सर्वलिङ्गहृदामयम्। त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते॥१॥ तिलक्षीरगुडादींश्च ग्रन्थिस्तस्योपजायते। मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति॥ २॥ तत्क्लेदात्कृमयश्चाथ भवन्त्यु-

पहतात्मनः। तीव्रार्तितोदं कृमिजं सदोषत्रयसम्भवम् ॥ ३ ॥ उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः। अरुचिः श्यावनेत्रत्वं शोषश्च कृमिजे भवेत् ॥४॥ क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः। क्रिमिजे तु कृमीणां ये श्लेष्मिकाणां हि ते मताः ॥ ५ ॥ इति हृद्रोगनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

अथ वातहृद्रोगः ॥ वातोपसृष्टे हृदये वामयेत्स्निग्धमातुरम्। द्विपञ्चमूलीकाथेन सस्नेहलवणेन वा ॥ १ ॥ अथ पिप्पल्यादि चूर्णम् ॥ पिप्पल्येला वचा हिङ्गु यवक्षारोऽथ सैन्धवम्। सौवर्चलमथो शुण्ठी दीप्यश्चेति विचूर्णितम् ॥१॥ फलधान्याम्लकौलत्थदधिमद्यवसादिभिः। पाययेच्छुद्धदेहस्य वातहृद्रोगशान्तये ॥२॥ अथ पुष्करमूलाद्यं चूर्णम् ॥ सपुष्कराख्यं फलपूरमूलं महौषधं सत्र्यभयासुकल्कः। क्षीराम्लसर्पिर्लवणैर्विमिश्रः स्याद्वातहृद्रोगहरो नराणाम् ॥ १ ॥ इति वातहृद्रोगः ॥

॥ अथ पित्तहृद्रोगः ॥

अथ श्रीपर्ण्यादियोगः ॥ श्रीपर्णी मधुकं क्षौद्रं सितागुडजलैर्वमेत्। पित्तोपसृष्टे हृदये सिञ्चेत मधुरैः शृतैः ॥१॥ अथ शीतादि ॥ शीताः प्रदेहाः परिषेचनं च तथा विरेको हृदि पित्तदुष्टे। द्राक्षासिताक्षौद्रपरूषकैः स्याच्छुद्धे च पित्तापहमन्नपानम् ॥१॥ अथ द्राक्षादि चूर्णम् ॥ हारहूराहरीतक्योस्तुल्यं शर्करया रजः। पीतं हिमाम्बुना हन्ति पित्तहृद्रोगमञ्जसा ॥१॥ अथार्जुनादि चूर्णम् ॥ अर्जुनस्य त्वचा सिद्धं क्षीरं पित्तहृदार्तिजित्। सितया पञ्चमूल्या वा बलया मधुकेन वा ॥ १ ॥ अथ श्वदंष्ट्राकसेरुकादिसर्पिः ॥ कसेरुकाशैवलशृङ्गवेरप्रपौण्डरीकं मधुकं बिसं च। ग्रन्थिश्च सर्पिः पयसा पचेत्तैः क्षौद्रान्वितं पित्तहृदामयघ्नम् ॥ १ ॥ इति पित्तहृद्रोगः ॥

॥ अथ कफहृद्रोगः ॥

हृद्रोगे कफजे स्विन्नं मृदान्तं लङ्घितं नरम्। कफघ्नैर्भेषजैर्युञ्ज्याज्ज्ञात्वा दोषबलाबलम् ॥ १ ॥ अथ त्रिवृताद्यौ चूर्णक्काथौ ॥ त्रिवृत्सटीबलारास्नाशुण्ठीपथ्याः सपौष्कराः। चूर्णिता वा शृता मूत्रे पातव्याः कफहृद्गदे ॥ २ ॥ अथैलादि ॥ सूक्ष्मैला मागधीमूलं पटोलं सर्पिषा सह। नाशयेदाशु हृद्रोगं कफजं सपरिग्रहम् ॥१॥ इति कफहृद्रोगः ॥

॥ अथ त्रिदोषहृद्रोगः ॥

त्रिदोषजे लङ्घनमादितः स्यादन्नं तु सर्वेषु हितं विधेयम्। चूर्णानि सर्पींषि च वक्ष्यमाणान्यत्र प्रयोज्यानि भिषग्भिराशु ॥ १ ॥ इति त्रिदोषहृद्रोगः ॥

॥ अथ कृमिजहृद्रोगः ॥

हृद्रोगे कृमिजे कार्यं लङ्घनं चापतर्पणम्। पश्चात्कृमिहरं कर्म कृमिरोगोक्तमाच-

रेत् ॥ १ ॥ कृमिजे च पिबेन्मूत्रं विडङ्गामयसंयुतम् । हृदि स्थिताः पतन्त्येव ह्यसाध्याः कृमयो नृणाम् ॥ २ ॥ इति कृमिजहृद्रोगः ॥

॥ अथ सामान्यहृदामयप्रतीकारः ॥

पवनारिजटा द्विपलाष्टगुणे सलिले पचिता यवजेन युतम् । क्कथनं हृदयोद्भवपार्श्वतटीकटिशूलविदारणसिंहनखम् ॥ १ ॥ अथ दशमूलादिक्काथः ॥ दशमूलकषायस्तु लवणक्षारसंयुतः । पीतो निहन्ति सहसा हृदामयमसंशयम् ॥ १ ॥ अथ पुष्करादिक्काथः ॥ क्काथः कृतः पुष्करमातुलुङ्गपलाशपूतीकशटीसुराह्वैः । सनागराजाजिवचायवाह्वसक्षार उष्णो लवणश्च पेयः ॥१॥ अथ हिङ्ग्वादिचूर्णम् ॥ हिङ्गूग्रगन्धाबिडविश्वकृष्णाकुष्ठामयाचित्रकयावशूकम् । पिबेत्ससौवर्चलपुष्कराढ्यं यवाम्भसा शूलहृदामयघ्नम् ॥१॥ अथ पुष्कराद्यं चूर्णम् ॥ चूर्णं पुष्करमूलस्य मधुना सह लेहयेत् । हृल्लासश्वासकासघ्नं हृदामयहरं परम् ॥ १ ॥ अथ ककुभाद्यं चूर्णम् ॥ घृतेन दुग्धेन गुडाम्भसा वा पिबेत्सचूर्णं ककुभत्वचोत्थम् । हृद्रोगजीर्णज्वररक्तपित्तं जित्वा भवेयुश्चिरजीविनस्ते ॥ १ ॥ अथैणशृङ्गभस्मयोगः ॥ शरावसम्पुटे दग्ध्वा शृङ्गं हरिणजं पिबेत् । गव्येन सर्पिषा पिष्टं हृच्छूलं नश्यति ध्रुवम् ॥ १ ॥ अथ वृन्दात् कटुकादि ॥ पिष्ट्वा वा कटुका पेया सयष्टीका सुखाम्बुना । जीर्णज्वरं रक्तपित्तं हृद्रोगं च व्यपोहति ॥१॥ अथ घृतानि ॥ अथादौ वल्लभघृतम् ॥ शतार्धमभयानां तु सौवर्चलपलद्वयम् । पचेत्कल्कैर्घृतप्रस्थं दत्वा क्षीरं चतुर्गुणम् ॥ घृतं वल्लभकं नाम्ना श्रेष्ठं हृद्रोगनाशनम् ॥१॥ अथ यष्ट्यादिघृतम् ॥ यष्टीनागबलोदीच्यार्जुनैः सर्पिः सुसाधितम् । हृद्रोगक्षयपित्तास्रश्वासकासज्वरार्तिजित् ॥ १ ॥ इति घृतानि ॥ अथ वृन्दात्पुनर्नवादि तैलम् ॥ पुनर्नवादारुसपञ्चमूलरास्नायवाङ्कोलकपित्थबिल्वम् । पक्त्वा जले तेन पचेच्च तैलमभ्यङ्गपानेऽनिलहृद्गदघ्नम् ॥ १ ॥ अथ रसाः ॥ तत्रादौ त्रिनेत्रो रसः ॥ रसगन्धाभ्रभस्मानि पार्थवृक्षत्वगम्बुना । एकविंशतिधा घर्मे भावितानि विधानतः ॥१॥ माषमात्रमिदं चूर्णं मधुना सह लेहयेत् । वातजं पित्तजं श्लेष्मसम्भूतं वा त्रिदोषजम् ॥ कृमिजं चापि हृद्रोगं निहन्त्येव न संशयः ॥ २ ॥ अथ हृदयार्णवरसः ॥ सूतार्कगन्धं क्काथेन वराया मर्दयेद्दिनम् । काकमाच्या वटीं कृत्वा चणमात्रां तु भक्षयेत् ॥ हृदयार्णवनामायं हृद्रोगदलनो रसः ॥ १ ॥ अथ पथ्यापथ्यम् ॥ शालिमुद्गा यवा मांसं जाङ्गलं मरिचान्वितम् । पटोलं कारवेल्लं च पथ्यं प्रोक्तं हृदामये ॥ १ ॥ तैलाम्लतक्रगुर्वन्नकषायश्रममातपम् । रोषं स्त्रीर्नर्म चिन्तां वा भाष्यं हृद्रोगवांस्त्यजेत् ॥ २ ॥ इति हृद्रोगचिकित्सा ॥

॥ अथोरोग्रहनिदानम् ॥

अत्यभिष्यन्दिगुर्वन्नशुष्कपूत्यामिषाशनात् । सास्रं मांसं यकृत्प्लीन्होः सद्यो वृद्धिं यदा गतम् ॥ १ ॥ उरोग्रहं तदा कुक्षौ कुरुतः कफमारुतौ । सस्तम्भं सज्वरं घोरं

---

१ (च०) कटि । २ (च०) मर्म ।

रूक्षं स्पर्शासहं गुरुम् ॥ २ ॥ आध्मानं कुक्षिहृत्कण्ठे वातविण्मूत्ररोधताः । तन्द्रारोचकशूलानि तस्य लिङ्गानि निर्दिशेत् ॥ ३ ॥ इत्युरोग्रहनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

अत्राशु स्वेदनं युक्त्या वमनं रक्तमोक्षणम् । तीक्ष्णैर्निरूहणं चैकं क्रमाल्लङ्घनमाचरेत् ॥१॥ पुत्रजीवकशिग्रुत्वक्सूर्यावर्तबलोद्भवाः । रसा एकैकशः कोष्णास्त्रिशो वा रामठान्विताः ॥ २ ॥ सपञ्चलवणाः पेयास्त्रिवृद्गुडसुकल्किताः । तन्निवृत्तौ यथालाभं मूत्रतैलसुरासवैः ॥ ३ ॥ चव्याम्लवेतसक्षारसरामठसचित्रकान् । पिबेत्तैलारनालाभ्यामुरोग्रहनिवृत्तये ॥ ४ ॥ यो वा नरस्यात्र कृतस्य कर्मणो विधिर्विरुद्धो न भवेन्मनागपि । यथाबलं वीक्ष्य च शुद्धविग्रहं तथाविधं पथ्यमपि प्रयोजयेत् ॥ ५ ॥ इत्युरोग्रहचिकित्सा श्रीहरिश्चन्द्रस्य ॥

॥ अथातो मूत्रकृच्छ्रनिदानम् ॥

व्यायामतीक्ष्णौषधरूक्षमद्यप्रसङ्गनृत्यद्रुतपृष्ठयानात् । आनूपमत्स्याध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणामिहाष्टौ ॥ १ ॥ अथ तस्य सम्प्राप्तिमाह ॥ पृथङ्मलाः स्वैः कुपिता निदानैः सर्वेऽथवा कोपमुपेत्य वस्तौ । मूत्रस्य मार्गं परिपीडयन्ति यदा तदा मूत्रयतीह कृच्छ्रात् ॥ १ ॥ अथ वातजमाह ॥ तीव्रा हि रुग्वङ्क्षणवस्तिमेढ्रे स्वल्पं मुहुर्मूत्रयतीह वातात् ॥ १ ॥ अथ पित्तजमाह ॥ पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात् ॥ १ ॥ अथ श्लैष्मिकमाह ॥ वस्तेः सलिङ्गस्य गुरुत्वशोफौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे ॥ १ ॥ अथ त्रिदोषजमाह ॥ सर्वाणि रूपाणि च सन्निपाताद्भवन्ति तत्कृच्छ्रतमं हि कृच्छ्रम् ॥ १ ॥ अथ शल्यजमाह ॥ मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु च । मूत्रकृच्छ्रं तदाघाताज्जायते भृशवेदनम् ॥ वातकृच्छ्रेण तुल्यानि तस्य लिङ्गानि निर्दिशेत् ॥ १ ॥ अथ पुरीषजमाह ॥ शकृतस्तु प्रतीघाताद्वायुर्विगुणतां गतः । आध्मानं वातशूलं च मूत्रसङ्गं करोति च ॥१॥ अथाश्मरीजमाह ॥ अश्मरीषु तु तत्पूर्वं मूत्रकृच्छ्रमुदाहृतम् ॥ १ ॥ अथ शुक्रजमाह ॥ शुक्रदोषैरुपहते मूत्रमार्गे विधारिते । सशुक्रं मूत्रयेत्कृच्छ्राद्वस्तिमेहनशूलवान् ॥ १ ॥ अथावान्तरभेदमाह ॥ अश्मरी शर्करा चैव तुल्यसंभवलक्षणे । शर्कराया विशेषं तु शृणु कीर्तयतो मम ॥ १ ॥ पच्यमानाश्मरी पित्ताच्छोष्यमाणा च वायुना । विमुक्तकफसंधाना क्षरन्ती शर्करा मता ॥ २ ॥ हृत्पीडा वेपथुः शूलं कुक्षौ वह्निश्च दुर्बलः । तथा भवति मूर्च्छा च मूत्रकृच्छ्रं च दारुणम् ॥ ३ ॥ इति मूत्रकृच्छ्रनिदानम् ॥

॥ अथ मूत्रकृच्छ्रचिकित्सा ॥

अथादौ वातमूत्रकृच्छ्रम् ॥ अभ्यञ्जनस्नेहनिरूहवस्तिस्वेदोपनाहोत्तरवस्तिसेकान् । स्थिरादिभिर्वातहरैश्च सिद्धान्दद्याद्रसांश्चानिलमूत्रकृच्छ्रे ॥ १ ॥ अमृता नागरं धात्री

---

१ (ख० ग०) आध्मानात्कुक्षिहृच्छोफ । २ (च०) अश्मरीहेतुतत्पूर्वम् ।

वाजिगन्धा त्रिकण्टकम् । निष्क्वाथ्य प्रपिबेत्क्वाथं मूत्रकृच्छ्रे समीरजे ॥ २ ॥ इति वातकृच्छ्रम् ॥

॥ अथ पित्तकृच्छ्रम् ॥

सेकावगाहाः शिशिरप्रदेहाः श्रेष्ठो विधिर्बस्तिपयोविरेकाः । द्राक्षाविदारीक्षुरसैर्घृतं च कृच्छ्रेषु पित्तप्रभवेषु कार्याः ॥१ ॥ अथ तृणपञ्चमूलक्वाथपयसी ॥ कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम् । पित्तकृच्छ्रहरं पञ्चमूलं वस्तिविशोधनम् ॥ एतत्सिद्धं पयः पीतं मेढ्रगं हन्ति शोणितम् ॥ १ ॥ अथ शतावर्यादिक्वाथः ॥ शतावरीकाशकुशश्वदंष्ट्राविदारिशालीक्षुकसेरुकाणाम् । क्वाथं सुशीतं मधुशर्कराभ्यां युक्तं पिबेत्पैत्तिकमूत्रकृच्छ्रे ॥ १ ॥ अथ हरीतक्यादिक्वाथः ॥ हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानाम् । क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे सरुजे विबन्धे ॥ १ ॥ अथोर्वारुकबीजयोगः ॥ उर्वारुबीजं मधुकं सदार्विं पित्ते पिबेत्तण्डुलधावनेन । दार्वीं तथैवामलकीरसेन समाक्षिकां पित्तकृतेऽथ कृच्छ्रे ॥ १ ॥ अथ वृन्दान्मन्थादियोगः ॥ मन्थं पिबेद्वा ससितं सर्पिः शृतं पयो वार्धसिताप्रयुक्तम् । धात्रीरसं चेक्षुरसं पिबेद्वा कृच्छ्रे सरक्ते मधुना विमिश्रम् ॥ १ ॥ अथ द्राक्षादि ॥ द्राक्षासितोपलाकल्कं कृच्छ्रघ्नं मस्तुना युतम् । पिबेद्वा कामतः क्षीरमुष्णं गुडसमन्वितम् ॥ १ ॥ अथ वृन्दान्नारिकेलादि ॥ नारिकेलजलं योज्यं गुडधान्यसमन्वितम् । सदाहं मूत्रकृच्छ्रं च रक्तपित्तं निहन्ति च ॥ १ ॥ अन्यच्च ॥ रक्तस्य नारिकेलस्य जलं कतकसंयुतम् । शर्करैलासमायुक्तं मूत्रकृच्छ्रहरं विदुः ॥ १ ॥ अथ शतावर्यादिसर्पिः ॥ शतावरीकाशकुशश्वदंष्ट्राविदारिकेक्ष्वामलकल्कसिद्धम् । सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यम् ॥ १ ॥ इति पित्तकृच्छ्रम् ॥

॥ अथ श्लेष्मकृच्छ्रम् ॥

क्षारोष्णतीक्ष्णौषधमन्नपानं स्वेदो यवान्नं वमनं निरूहः । तक्रं च तिक्तोषणसिद्धतैलं बस्तिश्च शस्तः कफमूत्रकृच्छ्रे ॥ १ ॥ अथ मूत्रादियोगः ॥ मूत्रेण सुरया वापि कदलीस्वरसेन वा । कफकृच्छ्रविनाशाय सूक्ष्मां पिष्ट्वा त्रुटिं पिबेत् ॥ १ ॥ अथ तक्रादियोगो वृन्दात् ॥ तक्रेण युक्तं सितवारुणस्य बीजं पिबेत्कृच्छ्रविघातहेतोः । पिबेत्तथा तण्डुलधावनेन प्रवालचूर्णं कफमूत्रकृच्छ्रे ॥ १ ॥ इति श्लेष्मकृच्छ्रम् ॥

॥ अथ त्रिदोषकृच्छ्रम् ॥

सर्वं त्रिदोषप्रभवे तु कृच्छ्रे यथाबलं कर्म समीक्ष्य कार्यम् । तत्राधिके प्राग्वमनं कफे स्यात्पित्ते विरेकः पवने तु वस्तिः ॥ १ ॥ अथ बृहत्यादिक्वाथः ॥ बृहतीधावनीपाठायष्टीमधुकलिङ्गकान् । पक्त्वा क्वाथं पिबेन्मर्त्यः कृच्छ्रे दोषत्रयोद्भवे ॥१॥ अथ शतावर्यादिक्वाथः ॥ शतावर्यास्तु मूलानां निष्क्वाथः ससितामधुः । मूत्रदोषं

निहन्त्याशु वातपित्तकफोद्भवम् ॥ १ ॥ अथ गुडदुग्धयोगः ॥ गुडेन मिश्रितं दुग्धं कदुष्णं कामतः पिबेत् । मूत्रकृच्छ्रेषु सर्वेषु शर्करावातरोगनुत् ॥ १ ॥ इति त्रिदोषजमूत्रकृच्छ्रम् ॥

॥ अथाभिघातमूत्रकृच्छ्रम् ॥

मूत्रकृच्छ्रेऽभिघातोत्थे वातकृच्छ्रक्रिया हिता। पञ्चवल्कलमृल्लेपः कवोष्णोऽत्र प्रशस्यते ॥ १ ॥ अथ मन्थादियोगः ॥ मन्थं पिबेद्वा ससितं ससर्पिः शृतं पयो वार्धसितामयुक्तम्[1] । धात्रीरसं चेक्षुरसं पिबेद्वाभिघातकृच्छ्रे मधुना विमिश्रम् ॥ १ ॥ इत्यभिघातकृच्छ्रम् ॥

॥ अथ शुक्रविबन्धजकृच्छ्रम् ॥

कृच्छ्रे शुक्रविबन्धोत्थे शिलाजतुसमाक्षिकम् । सक्षीरं ससितं सर्पिर्मन्त्वं[2] प्रपिबेन्नरः ॥ १ ॥ शुक्रदोषविशुद्ध्यर्थं समदां प्रमदां श्रयेत् । तृणपञ्चकमूलेन सिद्धं सर्पिः पिबेदपि ॥ २ ॥ लेहः[3] शुक्रविबन्धोत्थे शिलाजतुसमाक्षिकः । बलाहिङ्गुयुतं क्षीरं सर्पिर्मिश्रं पिबेन्नरः ॥ मूत्रदोषविशुद्ध्यर्थं शुक्रदोषहरं परम् ॥ इति वृन्दात् ॥

॥ अथ शकृद्विघातजं कृच्छ्रम् ॥

स्वेदचूर्णक्रियाभ्यङ्गबस्तयः स्युः पुरीषजे । कृच्छ्रे तत्र विधिः कार्यः सर्वः शुक्रविबन्धजित् ॥ १ ॥ अथ गोक्षुरादिक्वाथः ॥ क्वाथो गोक्षुरबीजानां यवक्षारयुतः सदा । मूत्रकृच्छ्रं शकृज्जातं पीतः शीघ्रं निवारयेत् ॥१॥ इति शकृद्विघातजं कृच्छ्रम् ॥

॥ अथाश्मरीजं कृच्छ्रम् ॥

अश्मरीजे मूत्रकृच्छ्रे स्वेदाद्या वातजित् क्रिया। पाषाणभेदक्वाथस्तु कृच्छ्रमश्मरिजं जयेत् ॥ १ ॥ अथैलादि ॥ एलोपकुल्यामधुकाश्मभेदकौन्तीश्वदंष्ट्रावृषकोरुबूकैः । शृतं पिबेदश्मजतुप्रगाढं सशर्करं साश्मरिमूत्रकृच्छ्रे ॥१॥ इत्यश्मरीजं कृच्छ्रम् ॥

॥ अथ सामान्यविधिः ॥

अथ त्रिकण्टकादिक्वाथः॥ गदनिग्रहात्॥ त्रिकण्टकारग्वधदर्भकाशदुरालभापर्पटभेदपथ्याः । निघ्नन्ति पीता मधुनाश्मरीकां सम्प्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥ १ ॥ अथ पाषाणभेदादिः ॥ पाषाणभेदस्त्रिवृता च पथ्या दुरालभा पुष्करगोक्षुरं च । पलाशशृङ्गाटककर्कटीजबीजं कषायः सुनिरुद्धमूत्रे ॥ १ ॥ अथ समूलगोक्षुरादिः ॥ समूलगोक्षुरक्वाथः सितामाक्षिकसंयुतः । नाशयेन्मूत्रकृच्छ्राणि तथा चोष्णसमीरणम् ॥ १ ॥ अथ यवादिर्वृन्दात् ॥ यवोरुबूकस्तृणपञ्चमूलीपाषाणभेदैः सशतावरीभिः । कृच्छ्रेषु गुल्मेष्वभयाविमिश्रैः कृतः कषायो गुडसम्प्रयुक्तः ॥१॥ अथैलादियोगः॥ एलाश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तण्डुलजलैर्लुलितानि पीत्वा । यद्वा गुडेन सहिता-

---

1 (क०) सिताप्रयोगः । 2 (च०) सर्पिर्मन्वापि । 3 (कृ० ग०) हलः ।

म्यवलेह्य धीमानासन्नमृत्युरपि जीवति मूत्रकृच्छ्री ॥ १ ॥ अथ क्षाराणां प्रयोगः ॥ अङ्कोलतिलकाष्ठानां क्षारः क्षौद्रेण संयुतः । दधिवार्यनुपानेन मूत्ररोधं नियच्छति ॥१॥ सितातुल्यो यवक्षारः सर्वकृच्छ्रनिवारणः । निदिग्धिकारसो वापि सक्षौद्रः कृच्छ्रनाशनः ॥२॥ यवक्षारसमायुक्तं पिबेत्तक्रं च कामतः । मूत्रकृच्छ्रविनाशाय तथैवाश्मरिनाशनम् ॥३॥ माषमेकं यवक्षारं कूष्माण्डस्वरसं पलम् । शर्कराकर्षसंयुक्तं मूत्रकृच्छ्रनिवारणम् ॥४॥ अथ वृन्दाद्दाडिमादियोगः ॥ दाडिमाम्लयुतां हृद्यां शुण्ठीजीरकसंयुताम् । पीत्वा सुरां सलवणां मूत्रकृच्छ्रात्प्रमुच्यते ॥१॥ अथोर्वारुबीजकल्कं वृन्दात् ॥ उर्वारुबीजकल्कं च श्लक्ष्णं पिष्टाक्षसम्मितम् । धान्याम्ललवणैः पेयं मूत्रकृच्छ्रविनाशनम् ॥१॥ अथ त्रिफलादिकल्कः ॥ त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् । वारिणा लवणीकृत्य पिबेन्मूत्ररुजापहम् ॥ १ ॥ अथैलादिः ॥ पिबेन्मद्येन सूक्ष्मैलां धात्रीफलरसेन वा । शितिवारकबीजं वा तक्रे श्लक्ष्णं च चूर्णितम् ॥ १ ॥ ॥ अथ हरिद्रादिः ॥ हरिद्रागुडकर्षैकं चारनालेन वा पिबेत् । वन्ध्याकर्कोटिकाकन्दं भक्षेत्क्षौद्रसितायुतम् ॥ अश्मरीं हन्ति नो चित्रं रहस्यं हि शिवोदितम् ॥ १ ॥ ॥ अथ योगसारादेलादि । एलागोक्षुरयोश्चूर्णं शिशोर्देयं मधुप्लुतम् । मूत्रकृच्छ्रापहः क्वाथः पेयस्तन्मूलवारिणा । १ ॥ गोक्षुरजस्तथा क्वाथो यवक्षारयुतः शुभः । सर्वकृच्छ्रविनाशाय शिलाजतुयुतोऽथ वा ॥ २ ॥ अथ खर्जूरादिचूर्णम् ॥ खर्जूरामलबीजानि पिप्पली च शिलाजतु । एलामधुकपाषाणं चन्दनोर्वारुबीजकम् ॥ १ ॥ धान्यकं शर्करायुक्तं पातव्यं ज्येष्ठवारिणा । अङ्गदाहं लिङ्गदाहं गुदवङ्क्षणशुक्रजम् ॥ शर्कराश्मरिशूलघ्नं बल्यं वृष्यकरं परम् ॥ २ ॥ अथेक्षुरसादियोगः ॥ भ्रष्टेक्षुस्वरसं ग्राह्यमाखुविड्विहितं पिबेत् । नाशयेन्मूत्रकृच्छ्राणि सद्य एव न संशयः ॥ १ ॥ ॥ अथ कुटजयोगः ॥ पिष्ट्वा गोपयसा श्लक्ष्णं कुटजस्य त्वचं पिबेत् । तेनोपशाम्यते क्षिप्रं मूत्रकृच्छ्रं सुदारुणम् ॥ १ ॥ अथ त्रिकण्टकाद्यं घृतम् ॥ त्रिकण्टकैरण्डकुशाद्यभीरुकर्कारुकेक्षुस्वरसेन सिद्धम् । सर्पिर्गुडार्धांशयुतं प्रपेयं कृच्छ्राश्मरीमूत्रविघातहारि ॥ १ ॥ अथ शतावरीघृतम् । घृतप्रस्थं शतावर्या रसस्यार्धाढकम् पचेत् । अजाक्षीरेण संयुक्तं चतुष्प्रस्थान्वितेन तु ॥ १ ॥ द्विगोक्षुरामृतानन्ता कास[1]कण्टकिनीरसान् । कुडवार्धं पृथग् दत्वा पिष्टैर्यष्टिकटुत्रयम् ॥२॥ श्वदंष्ट्राफलिनीदुग्धाशिलाजत्वश्मभेदकैः । त्रिसुगन्धान्वितैरर्धपलांशैः सघृतं पुनः ॥३॥ शर्कराद्विपलोपेतं क्षौद्रपादसमन्वितम् । हन्ति कृच्छ्राणि सर्वाणि मूत्रदोषाश्मशर्कराः ॥ सर्वकृच्छ्राणि हन्त्याशु एतच्छतावरीघृतम् ॥ ४ ॥ अथ त्रिकण्टकादिगुग्गुलुः ॥ त्रिकण्टकानां क्वथितेऽष्टनिघ्ने पुरम् पचेत्पाकविधानयुक्त्या । फलत्रिकव्योषपयोधराणां चूर्णं पुरेण प्रमितं प्रदद्यात् ॥ १ ॥ वटी प्रमेहं प्रदरं च मूत्राघातं च कृच्छ्रं च तथाश्मरीं च । शुक्रस्य दोषान् सकलांश्च वातान् निहन्ति मेघानिव वायुवेगः ॥२॥

---

1 (च०) काश ।

अथ सेकलेपौ ॥ पिष्ट्वा श्वदंष्ट्राफलमूलिकाविडैर्वारुबीजानि सकाञ्जिकानि । आलिप्यमानानि समानि बस्तौ मूत्रस्य निष्यन्दकराणि सद्यः ॥ १ ॥ बस्तावेरण्डतैलेन स्निग्धत्वे किंशुकैस्तरोः । स्विन्नपुष्पैः मृदं सेकं मूत्रकृच्छ्रोपशान्तये ॥२॥ कोष्णाखुविट्कल्कलेपो बस्तेरुपरि कृच्छ्रिणः । त्रपुसीबीजलेपो वा धारा वा किंशुकाम्भसः ॥३॥ ध्वजच्छिद्रे चेन्दुदानं दानं वा चटकाविशः । मेघनादशिफालेपः स्वेदो वा कर्कटाम्भसा ॥ ४ ॥ पातो वा कोष्णतैलस्य धारा वा कोष्णवारिणः । नवैते पादिका योगा मूत्रकृच्छ्रहरा मताः ॥ ५ ॥ अथ चन्द्रकलारसः संग्रहात् ॥ प्रत्येकं कर्षमात्रं स्यात्सूतं ताम्रं तथाभ्रकम् । द्विगुणं गन्धकं चैव कृत्वा कज्जलिकां शुभाम् ॥ १ ॥ मुस्तादाडिमदूर्वोत्थैः केतकीस्तनजद्रवैः । सहदेव्याः कुमार्याश्च पर्पटस्य च वारिणा ॥ २ ॥ रामशीतलिकातोयैः शतावर्या रसेन च । भावयित्वा प्रयत्नेन दिवसे दिवसे पृथक् ॥ ३ ॥ तिक्तागुडूचिकासत्त्वं पर्पटोशीरमाधवी । श्रीगन्धं सारिवा चैषां समानं सूक्ष्मचूर्णितम् ॥४॥ द्राक्षाफलकषायेण सप्तधा परिभावयेत् । ततः पोताश्रयं कृत्वा वट्यः कार्याश्चणोपमाः ॥ ५ ॥ अयं चन्द्रकलानाम्ना रसेन्द्रः परिकीर्तितः । सेव्यः पित्तगदध्वंसी वातपित्तगदापहः ॥ ६ ॥ अन्तर्बाह्यमहादाहविध्वंसनमहाघनः । ग्रीष्मकाले शरत्काले विशेषेण प्रशस्यते ॥ ७ ॥ कुरुते नाग्निमान्द्यं च महतापं ज्वरं हरेत् । भ्रममूर्च्छाहरश्चाशु स्त्रीणां रक्तं महास्रवम् ॥८ ॥ ऊर्ध्वाधो रक्तपित्तं च रक्तवान्ति विशेषतः । मूत्रकृच्छ्राणि सर्वाणि नाशयेन्नात्र संशयः ॥९॥ इति चन्द्रकलारसः ॥ अथ रसरत्नप्रदीपाल्लघुलोकेश्वरो रसः ॥ रसभस्म च भागैकं चत्वारः शुद्धगन्धकम् । पिष्ट्वा वराटकान्पूर्याद्रसपादं च टङ्कणम् ॥ १ ॥ क्षीरेण पिष्ट्वा रुद्ध्वास्यं भाण्डे रुद्ध्वा पुटे पचेत् । स्वाङ्गशीतं विचूर्ण्याथ लघुलोकेश्वरो रसः ॥ २ ॥ चतुर्गुञ्जो घृतैर्देयो मरीचैकोनविंशतिः । जातीमूलपलं चैकमजाक्षीरेण पाचयेत् ॥ शर्कराभावितं चानुपीतं कृच्छ्रहरं परम् ॥३॥ इति लघुलोकेश्वरः ॥ अथ वैक्रान्तगर्भनामा रसः ॥ सूतं स्वर्णं च वैक्रान्तं मृतं तुल्यं च मर्दयेत् । चाण्डालीराक्षसीद्रावैर्द्वियामान्ते च गोलकम् ॥१॥ शुष्कं रुद्ध्वा पुटे पाच्यं करीषाग्नौ महापुटे । माषैकं मधुना लेह्यं मूत्रकृच्छ्रप्रशान्तये ॥ २ ॥ वैक्रान्तगर्भनामायं सर्वकृच्छ्रामयाञ्जयेत् । अपामार्गस्य मूलं तु तक्रे पिष्ट्वानुपाययेत् ॥ ३ ॥ इति वैक्रान्तगर्भरसः ॥ अथ लोहभस्मयोगः ॥ अयोभस्म श्लक्ष्णपिष्टं मधुना सह योजितम् । मूत्रकृच्छ्रं निहन्त्याशु त्रिभिर्लेहैर्न संशयः ॥ १ ॥ अथ रसादियोगः ॥ रसवल्लं यवक्षारं सितातक्रयुतं पिबेत् । मूत्रकृच्छ्राण्यशेषाणि हन्यन्ते पानतो जवात् ॥ १ ॥

॥ अथ पथ्यापथ्यम् ॥

पुरातना लोहितशालयश्च धन्वामिषं मुद्गरसः सिता च । तक्रं पयो गोश्च दधि प्रभूतं पुराणकूष्माण्डफलं पटोलम् ॥१॥ उर्वारुखर्जूरकनारिकेलं तण्डुलियं चामलकं च सर्पिः ।

१ (च०) निर्दोषकराणि । २ (च०) किंशुकोद्भवैः । ३ (च०) स्वेदसेकम् ।

प्रतीरमीरं हिमवालुका च मिश्रं चूर्णं स्यात्सति मूत्रकृच्छ्रे ॥ २ ॥ मद्यं श्रमं निधुवनं गजवाजियानं सर्वं विरुद्धमशनं विषमाशनं च । ताम्बूलमत्स्यलवणार्द्रकतैलभृष्टं पिण्याकहिङ्गुतिलसर्षपमूत्रवेगान् ॥ माषान् करीरमतितीक्ष्णविदाहि रूक्षमम्लं प्रमुञ्चतु जनः सति मूत्रकृच्छ्रे ॥ ३ ॥ इति मूत्रकृच्छ्रचिकित्सा ॥

॥ अथ मूत्राघातनिदानं व्याख्यास्यामः ॥

जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश । प्रायो मूत्रविघाताद्यैर्वातकुण्डलिकादयः ॥ ॥ १ ॥ अथादौ तेषां मध्ये क्रमेण वातकुण्डलिकामाह ॥ रूक्षाद्वातविघाताद्वा वायुर्बस्तौ सवेदनः । मूत्रमाविश्य चरति विगुणः कुण्डलीकृतः ॥ १ ॥ मूत्रमल्पाल्पमथवा सरुजं संप्रवर्तते । वातकुण्डलिकां तां तु व्याधिं विद्यात्सुदारुणम् ॥ २ ॥ अथाष्ठीलामाह ॥ आध्मापयन्वस्तिगुदं रुद्ध्वा वायुश्चलोन्नताम् । कुर्यात्तीव्रार्तिमष्ठीलां मूत्रमार्गनिरोधिनीम् ॥ १ ॥ अथ वातबस्तिमाह ॥ वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः । निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः ॥ १ ॥ मूत्रसङ्गो भवेत्तेन वस्तिकुक्षिरुजाकरः । वातबस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाधनः ॥ २ ॥ अथ मूत्रातीतमाह ॥ चिरं धारयतो मूत्रं त्वरया न प्रवर्तते । मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते ॥ १ ॥ अथ मूत्रजठरमाह ॥ मूत्रस्य वेगेऽभिहते तदुदावर्तहेतुकः । अपानः कुपितो वायुरुदरं पूरयेद्भृशम् ॥ १ ॥ नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनम् । तन्मूत्रजठरं विद्याद् गुदवस्तिनिरोधनम् ॥ २ ॥ अथ मूत्रोत्सङ्गमाह ॥ वस्तौ वाप्यथ वा नाले मणौ वा यस्य देहिनः । मूत्रं प्रवृत्तं सज्जेत सरक्तं वा प्रवाहतः ॥ १ ॥ स्रवेच्छनैः शनैरल्पं सरुजं वाथ नीरुजम् । विगुणानिलजो व्याधिः स मूत्रोत्सङ्गसंज्ञितः ॥ २ ॥ अथ मूत्रक्षयमाह ॥ रूक्षस्य क्लान्तदेहस्य वस्तिस्थौ पित्तमारुतौ । मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् ॥ १ ॥ अथ मूत्रग्रन्थिमाह ॥ अन्तर्वस्तिमुखे वृत्तः स्थिरोऽल्पः सहसा भवेत् । अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रग्रन्थिः स उच्यते ॥ १ ॥ तन्त्रान्तरे । उक्तं वातकफाद्दुष्टं वस्तिद्वारेषु दारुणम् । ग्रन्थिं कुर्यात्स कृच्छ्रेण सृजेन्मूत्रं तदावृतम् ॥ १ ॥ ॥ अथ मूत्रशुक्रमाह ॥ मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतम् । स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्तते ॥ भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते ॥ १ ॥ अथोष्णवातमाह ॥ व्यायामाध्मातपैः पित्तं वस्तिं प्राप्यानिलावृतम् । वस्तिं मेढ्रं गुदं चैव प्रदहेत् स्रावयेदधः ॥१॥ मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा । कृच्छ्रात्पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम् ॥ २ ॥ अथ मूत्रसादमाह ॥ पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत् । कृच्छ्रान्मूत्रं तदा रक्तं पीतं श्वेतं घनं सृजेत् ॥ १ ॥ सदाहं रोचनाशङ्खचूर्णवर्णं भवेच्च यत् । शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम् ॥२॥ अथ विड्विघातमाह ॥ रूक्षदुर्बलयोर्वातादुदावृत्तं शकृद्यदि ।

---

१ (च०) रौक्ष्याद्वेग । २ (च०) मूत्रविण्मार्गरोधिनीम् ।

मूत्रस्रोतोऽनुपचेत विड्विसृष्टं तदा नरः। विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत् ॥ १ ॥ अथ बस्तिकुण्डलमाह ॥ द्रुताध्वलङ्घनायासैरभिघातात्प्रपीडनात्। स्वस्थानाद्बस्तिरुद्वृत्तः स्थूलस्तिष्ठति गर्भवत् ॥ १ ॥ शूलस्पन्दमदाहार्तो बिन्दुं बिन्दुं स्रवत्यपि। पीडितस्तु सृजेद्धारां संस्तम्भोद्वेष्टनार्तिमान् ॥ २ ॥ बस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम्। पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ॥३॥ तस्मिन्पित्तावृते दाहः शूलं मूत्रविवर्णता। श्लेष्मणा गौरवं शोफः स्निग्धं मूत्रं घनं सितम् ॥ ४ ॥ श्लेष्मरुद्धबिलो बस्तिः पित्तोदीर्णो न सिध्यति। अविभ्रान्तबिलः साध्यो न च यः कुण्डलीकृतः ॥ स्याद्बस्तौ कुण्डलीभूते तृण्मोहः श्वास एव च ॥ ५ ॥ इति मूत्राघातनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

स्नेहस्वेदोपपन्नस्य हितं स्नेहविरेचनम्। दद्यादुत्तरबस्तिं च मूत्राघाते सवेदने ॥ १ ॥ अथ नलादिक्वाथः ॥ नलकुशकाशेक्षुशिफाक्वथितं प्रातः सुशीतलं ससितम्। पिबतः प्रयाति नियतं मूत्राघातः सवेदनः पुंसः ॥१॥ अथ गोधावन्यादि ॥ गोधावन्यामूलक्वथितं घृततैलगोरसोन्मिश्रम्। पीतं विरुद्धमचिराद्भिनत्ति मूत्रस्य संघातम्॥१॥ अथ शार्ङ्गधरात्। वीरन्तरो वृक्षवृन्दावासासहचरद्वयम्। कुशद्वयं नलो गुन्द्रा बकपुष्पोऽग्निमन्थकः ॥ १ ॥ मूर्वा पाषाणभेदश्च स्योनाको गोक्षुरस्तथा। अपामार्गश्च कमलं ब्राह्मी चेति गणो वरः ॥ २ ॥ वीरन्तरादिरित्येष शर्कराश्मरिकृच्छ्रहा। मूत्राघातं वातरोगान्नाशयेदखिलानपि ॥ ३ ॥ पिबेच्छिलाजतुक्वाथे गणे वीरन्तरादिके। रसं दुरालभाया वा कषायं वासकस्य च ॥ ४ ॥ अथ दशमूलादिक्वाथः ॥ दशमूलीशृतं पीत्वा सशिलाजतुशर्करम्। वातं कुण्डलिकाष्ठीलावातबस्तौ प्रमुच्यते ॥१॥ अथ गोक्षुरादिक्वाथः ॥ पीतो गोकण्टकक्वाथः सशिलाजतुकौशिकः। मूत्रकृच्छ्रान्मूत्रशुक्रान्मूत्रोत्सङ्गाद्विमुच्यते ॥ १ ॥ अथ शिलाजतुयोगः ॥ सशर्करं च ससितं लीढं सिद्धं शिलाजतु। निहन्ति मूत्रजठरं मूत्रातीतं च देहिनः ॥ १ ॥ अथ त्रिकण्टकादियोगः ॥ त्रिकण्टकैरण्डशतावरीभिः सिद्धं पयो वातभवे च शूले। गुडप्रगाढं सघृतं पयो वा रोगेषु कृच्छ्रादिषु शस्तमेतत् ॥ १॥ अथ निदिग्धिकादियोगः ॥ निदिग्धिकायाः स्वरसं पिबेद्वा तक्रसंयुतम्। जले कुङ्कुमकल्कं वा सक्षौद्रमुषितं निशि ॥ १ ॥ शृतशीतं पयो मांसी चन्दनं तण्डुलाम्बुना। पिबेत्सशर्करां श्रेष्ठामुष्णवाते सशोणिते ॥ २ ॥ अथ शतावर्यादियोगः ॥ वरीगोक्षुरभूधात्रीमूलानां स्वरसं पलम्। माषमेकं यवक्षारं सौरं माषद्वयं तथा ॥१॥ द्विगुणं टङ्कणं क्षारं सर्वमेकत्र मेलयेत्। पिबेत्तत्तु विनाशाय मूत्राघाते सुदारुणे ॥ २ ॥ इति सारसंग्रहात्। स्त्रीणामतिप्रसङ्गेन शोणितं यस्य सिच्यते। मैथुनोपरमश्चास्य बृंहणीयो विधिर्मतः ॥ ताम्रचूडवसातैलं हितं चोत्तरबस्तिषु ॥ १ ॥ अथ स्वगुप्ताद्यं चूर्णम् ॥ स्वगुप्ताफ-

---

१ (च०) अविभ्रान्तबिलः। २ (च०) तृण्मोहः।

लमृद्वीका........., समानमर्धभागानि क्षीरक्षौद्रघृतानि च ॥ १ ॥ सर्वं सम्यग्विमर्द्याक्षमात्रां लीढ्वा पयः पिबेत् । हन्ति शुक्रक्षयोत्थांश्च दोषान्वन्ध्यासुतप्रदम् ॥ २ ॥ अथ क्षौद्रार्धभागघृतम् ॥ क्षौद्रार्धभागः कर्तव्यो भागः स्यात्क्षीरसर्पिषोः । शर्करायाश्च चूर्णं च द्राक्षाचूर्णं च तत्समम् ॥ १ ॥ स्वयङ्गुप्ताफलं चैव तथैवेक्षुरकस्य च । पिप्पलीनां तथा चूर्णं समभागं प्रदापयेत् ॥ २ ॥ तदेकस्थं मेलयित्वा खल्वेनोन्मथ्य च क्षणम् । तस्य पाणितलं चूर्णं लिहेत्क्षीरं ततः पिबेत् ॥ ३ ॥ एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा । शुक्रदोषाञ्जयेत्सर्वानेवापि भृशदुर्जयान् ॥ जयेच्छोणितदोषांश्च वन्ध्या स्त्री गर्भमाप्नुयात् ॥४ ॥ अथ धान्यगोक्षुराद्यं घृतम् ॥ धान्यगोक्षुरकक्काथकल्कसिद्धं घृतं हितम् । मूत्राघातेषु कृच्छ्रेषु शुक्रदोषे च दारुणे ॥१॥ अथ चित्रकाद्यं घृतम् ॥ चित्रकं सारिवा चैव बला काला च सारिवा । द्राक्षाविशाला पिप्पल्यस्तथा च त्रिफला भवेत् ॥ १॥ तथैव मधुकं दद्याद्दद्यादामलकानि च । घृताढकं पचेदेतैः कल्कैरक्षसमन्वितैः ॥२॥ क्षीरद्रोणे जलद्रोणे तत्सिद्धमवतारयेत् । शीतं परिशृतं चैव शर्कराप्रस्थसंयुतम्॥३॥तुगाक्षीर्या च तत्सर्वं मतिमान्परिमिश्रयेत् । ततो मितं पिबेत्काले यथादोषं यथाबलम् ॥ ४ ॥ मूत्रग्रन्थिं मूत्रसादमुष्णवातमसृग्दरम् । विड्विघातं निहन्त्येतद्बस्तिकुण्डलिमप्यलम् ॥ ५ ॥ सर्पिरेतत्प्रयुञ्जाना स्त्री गर्भं लभतेऽचिरात् । असृग्दोषे योनिदोषे मूत्रदोषे तथैव च ॥ प्रयोक्तव्यमिदं सर्पिश्चित्रकाद्यं सदा बुधैः ॥ ६ ॥ अथ सदाभद्राद्यं चूर्णम् ॥ सदाभद्राश्मभिन्मूलं शतावर्याश्च चित्रकम् । रोहिणीकोकिलाक्षौ च क्रौञ्चस्थूलं त्रिकण्टकम् ॥ श्लक्ष्णपिष्टाः सुरापीता मूत्राघातप्रबन्धनाः ॥ १ ॥ अथोशीरादि चूर्णम् ॥ उशीरं वालकं पत्रं कुष्ठं धात्री च मौसली । एला हरेणुकं द्राक्षा कुङ्कुमं नागकेसरम् ॥ १ ॥ पद्मकेसरकन्दं च कर्पूरं चन्दनद्वयम् । त्र्यूषं मधुकलाजाश्च अश्वगन्धा शतावरी ॥ २ ॥ गोक्षुरं कर्कटाख्यं च जातीकङ्कोलचोरकम् । एतानि समभागानि द्विगुणामृतशर्करा ॥ ३ ॥ मत्स्यण्डिकामधुभ्यां च मातरेव बुभुक्षितः । क्षयं च रक्तपित्तं च पाददाहमसृग्दरम् ॥४॥ मूत्राघातं मूत्रकृच्छ्रं रक्तस्रावं च नाशयेत् । अशीतिं वातजान् रोगान् विशेषान्मेहनुत्परम् ॥ ५॥ इत्युशीरादि ॥ अश्मरीमूत्रकृच्छ्रेषु भेषजं यत्क्रिया च या । मूत्राघातेषु सर्वेषु कुर्यात्तत्सर्वमादरात् ॥ १ ॥ रसश्चन्द्रकलाख्यश्च कृच्छ्रघ्नो यः पुरेरितः । मूत्राघातेषु सर्वेषु स प्रयोज्यो विजानता ॥ २ ॥

॥ अथ पथ्यापथ्यम् ॥

पुरातना लोहितशालयश्च मांसानि धन्वप्रभवाणि मद्यम् । तक्रं पयो दध्यपि माषयूषः पुराणकूष्माण्डफलं पटोलम् ॥ १ ॥ उर्वारुखर्जूरकनारिकेलतालद्रुमाणामपि मस्तकानि । यथामलं सर्वमिदं च मूत्राघातातुराणां हि तमादिशन्ति ॥ २ ॥ विरु-

---

१ (च०) शुक्रदोषे । २ (च०) कोकिलाख्यौ ।

द्राशनसर्वाणि व्यायामं मार्गशीलनम् । रूक्षं विदाहि विष्टम्भि व्यवायं वेगधारणम् ॥ करीरं वमनं चापि मूत्राघाती विवर्जयेत् ॥ ३ ॥ इति मूत्राघातचिकित्सा ॥

॥ अथाश्मरीनिदानं व्याख्यास्यामः ॥

वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजापरा । प्रायः श्लेष्माश्रयाः सर्वा ह्यश्मर्यः स्युर्यमोपमाः ॥ १ ॥ अथ तत्सम्प्राप्तिमाह ॥ विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा । यदा तदाश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः ॥ १ ॥ ॥ अथ तस्यामनेकदोषाश्रयत्वमाह ॥ नैकदोषाश्रयाः सर्वास्त्वथासां पूर्वलक्षणम् । वस्त्याध्मानं तथासन्नदेशेषु परितोऽतिरुक् ॥ १ ॥ अथ पूर्वरूपमाह ॥ मूत्रे च बस्तगन्धत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ॥१॥ अथ तासां सामान्यलक्षणमाह ॥ सामान्यलिङ्गं रुङ्नाभिसीवनीवस्तिमूर्धसु । विशीर्णधारं मूत्रं स्यात्तया मार्गे निरोधिते ॥ १ ॥ अथ पुनर्लक्षणान्तरमाह ॥ तद्व्यपायात् सुखं मेहेदच्छं गोमेदकोपमम् । तत्संक्षोभात्क्षते सास्रमायासाच्चातिरुग्भवेत् ॥ १ ॥ अथ वातजामाह ॥ तत्र वाताद्भृशं चार्तो दन्तान् खादति वेपते । मृद्नाति मेहनं नाभिं पीडयत्यनिशं क्वणन् ॥ १ ॥ सानिलं मुञ्चति शकृन्मुहुर्मेहति बिन्दुशः । श्यावारुणाश्मरी चास्य स्याच्चिताकण्टकैरिव ॥ २ ॥ अथ पित्तजामाह ॥ पित्तेन दह्यते वस्तिः पच्यमान इवोष्मवान् । भल्लातकास्थिसंस्थाना रक्तपीता तथाश्मरी ॥ १ ॥ अथ श्लेष्मजामाह ॥ वस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः । अश्मरी महती श्लक्ष्णा मधुवर्णाथ वा सिता ॥ १ ॥ ॥ अथ प्रायेण शिशूनां ता भवन्ति ॥ एता भवन्ति बालानां तेषामेव च भूयसा । आश्रयोपचयाल्पत्वाद् ग्रहणाहरणे सुखाः ॥१॥ अथ शुक्राश्मरीमाह ॥ शुक्राश्मरी तु महतां जायते शुक्रधारणात् । स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ॥ शोषयत्युपसङ्गृह्य शुक्रं तच्छुक्रजाश्मरी ॥ १ ॥ अथ तल्लक्षणमाह ॥ वस्तिरुङ् मूत्रकृच्छ्रत्वं मुष्कश्वयथुकारिणी । तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥ १ ॥ ॥ अथ शर्करालक्षणमाह ॥ पीडिते त्ववकाशेऽस्मिन्नश्मर्येव च शर्करा । अणुशो वायुना भिन्ना सा तस्मिन्ननुलोमगे ॥ १ ॥ निरेति सह मूत्रेण प्रतिलोमे विबध्यते । मूत्रस्रोतःश्रिता सा तु सक्ता कुर्यादुपद्रवान् ॥ २ ॥ अथ तानेवोपद्रवानाह ॥ दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचि । पाण्डुत्वमुष्णवातं च तृष्णाहृत्पीडनं वमिः ॥ १ ॥ अथ तस्या असाध्यत्वमाह ॥ प्रशूननाभिवृषणं बद्धमूत्रं रुजावहम् । अश्मरी क्षपयत्याशु सिकता शर्करान्विता ॥ १ ॥ अप्सु स्वच्छास्वपि तथा निषिक्ता सुघटेऽथ वा । कालान्तरेण पङ्कः स्यादश्मरीह भवेत्तथा ॥ २ ॥ इत्यश्मरीनिदानम् ॥

॥ अथ तच्चिकित्सा ॥

आदौ शूलः कुक्षिदेशे कटौ स्यात्पश्चाद्रोधो जायते मूत्रमुष्णम् । एतैर्लिङ्गैरश्मरी-

१ (च०) संहत्य । २ (च०) प्रवृत्ता ।

रोगचिह्नं ज्ञात्वा कुर्याद्भेषजाद्यैश्चिकित्साम् ॥ १ ॥ अथ वाताश्मरी ॥ वाताश्मरीपूर्वरूपे स्नेहपानं प्रशस्यते ॥ १॥ अथ शुण्ठ्यादिः क्वाथः॥ शुण्ठ्यग्निमन्थपाषाणभिच्छिग्रुवरुणक्षुरैः। अभयारग्वधफलैः क्वाथं कृत्वा विचक्षणः ॥ १ ॥ रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नरः। वाताश्मरीं हन्ति कृच्छ्रं मान्द्यमग्नेश्च तद्भुजः ॥ कट्यूरुगुदमेढ्रस्थं वङ्क्षणस्थं च मारुतम् ॥ २ ॥ अथ वरुणक्वाथः ॥ वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम्। क्वाथयित्वा शृतं तस्य यवक्षारगुडान्वितम् ॥ पीत्वा वाताश्मरीं हन्ति चिरकालानुबन्धिनीम् ॥ १ ॥ अथ वीरतर्वादिः ॥ वीरतर्वादिकः क्वाथः पूर्वोक्तो वातजाश्मरीम्। सद्यो हन्ति यवक्षारगुडयुक्तो न संशयः ॥ १ ॥ क्षारान्यवागूः पेयांश्च कषायाणि पयांसि च। भोजनार्थं प्रयोज्यानि वाताश्मरीजुषां नृणाम् ॥ २ ॥ अथ-पित्ताश्मरी ॥[1]पीत्वा पाषाणभित्क्वाथं सशिलाजतुशर्करम्। पित्ताश्मरीं निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ॥ १ ॥ अथ कफाश्मरी ॥ क्वाथो निपीतः सक्षारः शिग्रुत्वग्वरुणत्वचोः। कफजामश्मरीं हन्ति शक्राशनिरिव द्रुमम् ॥ १ ॥ अथ शुक्राश्मरी ॥ शुक्राश्मर्यां सुसामान्यो विधिरश्मरीनाशनः ॥ १ ॥ अथ कूष्माण्डरसः ॥ यवक्षारगुडोन्मिश्रं पिबेत्पुष्पफलोद्भवम्। रसं मूत्रविबन्धघ्नं शुक्राश्मरीविनाशनम् ॥ १ ॥ ॥ अथ शतावर्यादिः ॥ शतावरीमूलरसो गव्येन पयसा समः। पीतो निपातयत्याशु ह्यश्मरीं चिरजामपि ॥ १ ॥ अथ कुटजादियोगः ॥ पिबतः कुटजं दध्ना पथ्यमन्नं च खादतः। निपतत्यचिरादस्य निश्चितं मेढ्रशर्करा ॥ १ ॥ अथ कुटजकल्कः। अपि च कुटजमूलं धेनुदध्यम्बुपिष्टम्। पिचुमितमवलीढं पातयत्यश्मरीकाम् ॥ १ ॥ अथैरण्डादिकल्कः ॥ गन्धर्वहस्तबृहतीव्याघ्रीगोक्षुरकेक्षुरात्। मूलकल्कं पिबेद्दध्ना मधुरेणाश्मभेदनः ॥१॥ अथ पाषाणभेदादिक्वाथः ॥ पाषाणभिद्वरुणगोक्षुरकोरुबूकक्षुद्राद्वयक्षुरकमूलकृतः कषायः। दध्ना युतो जयति मूत्रविबन्धशुक्रमुग्राश्मरीमपि च शर्करया समेताम् ॥१॥ अथैलादि ॥ एलोपकुल्यामधुकाश्मभेदकौन्तीश्वदंष्ट्रावृषकोरुबूकैः ॥ शृतं पिबेदश्मजतुप्रगाढं सशर्करं साश्मरिमूत्रकृच्छ्रे ॥१॥ अथ शिग्रुमूलादिः ॥ क्वाथश्च शिग्रुमूलोत्थः कदुष्णोऽश्मरीपातनः। क्षीरान्नभुग्बर्हिशिखामूलं वा तण्डुलाम्बुना ॥१॥ अथ शिलाजत्वादि ॥ अश्मर्यां चाश्मरीकृच्छ्रे शिलाजतु समाक्षिकम्। यवक्षारं गोक्षुरं च खादेद्वा चाश्मरीहरम् ॥१॥ अथ त्रपुसबीजादि ॥ त्रपुसीबीजं पयसा पीत्वा वा नारिकेरजं कुसुमम्। दृढमूत्रशर्करावान् भवति सुखी कतिपयैर्दिवसैः ॥१॥ अथ राजमार्तण्डाद् गोपालकर्कट्यादि ॥ गोपालकर्कटीमूलं पिष्टं पर्युषिताम्भसा। पीयमानं त्रिरात्रेण पातयत्यश्मरीं हठात् ॥ १ ॥ अथ वृन्दात् ॥ शृङ्गबेरादियोगः ॥ शृङ्गबेरयवक्षारपथ्याकालीयकान्वितम्। आजं दधि भिनत्त्युग्रामश्मरीमाशु पातयेत् ॥१॥ अथार्कपुष्पीकल्कः ॥ गव्येन पिष्टा पयसार्कपुष्पी निपीयमानानुदिनं प्रभाते। विदार्य वीर्येण निजेन तीव्रामप्यश्मरीं या कुरुते सदाहाम् ॥ १ ॥ अथ त्रिकण्टकादिचूर्णम् ॥

---

१ (च०) वीरन्तर्वादिः।

त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतम् । अविक्षीरेण सप्ताहं पिबेदश्मरिभेदनम् ॥१॥ अथ हरिद्रादियोगः ॥ यः पिबेद्रजनीं सम्यक् सगुडां तुषवारिणा। तस्याशु चिररूढापि यात्यस्तं मेण्हूशर्करा ॥ १ ॥ अथ तिलादिक्षारयोगः ॥ तिलापामार्गकदलीपलाशयवसम्भवः । क्षारः पेयोऽविमूत्रेण शर्करास्वश्मरीषु च ॥ १ ॥ अथ तिलक्षारः ॥ क्षारो निपीतस्तिलनालजातः समाक्षिकः क्षीरयुतस्त्रिरात्रम् । हन्त्यश्मरीं सिन्धुविमिश्रितं वा निपीयमानं रुचकं प्रयत्नात् ॥१॥ अथ वरुणादिघृतम् ॥ वरुणस्य तुलां क्षुण्णां जलद्रोणे विपाचयेत् । पादशेषं परिस्राव्य घृतप्रस्थं विपाचयेत् ॥ १ ॥ वारुणी कदली बिल्वं तृणजं पञ्चमूलकम् । अमृता त्वश्मजं देयं बीजं च त्रपुसस्य च ॥ २ ॥ शतपर्वा तिलक्षारः पलाशक्षार एव च । यूथिकायाश्च मूलानि कार्षिकाणि समावपेत् ॥ ३ ॥ अस्य मात्रां पिबेज्जन्तुर्देशकालाद्यपेक्षया । जीर्णे चानुपिबेत्पूर्वमजीर्णेन तु मस्तुना ॥ अश्मरीं शर्करां चैव मूत्रकृच्छ्रं च नाशयेत् ॥४॥ इति वरुणघृतम् ॥ अथ पाषाणभेदपाकः ॥ अश्मभेदात्प्रस्थमेकं चूर्णितं वस्त्रगालितम् । गव्ये दुग्धाढके क्षिप्त्वा पाचयेन्मृदुवह्निना ॥ १ ॥ दर्व्या संमर्दयेत्तावद्यावद् घनतरं भवेत् । एला लवङ्गमगधा यष्टी मध्वमृताभया ॥ २ ॥ कौन्ती क्ष्वदंष्ट्रा वृषकं शरपुङ्खा पुनर्नवा । यावशूको निलम्बी च मांसी सप्ताङ्गुलात्पलम् ॥ ३ । वङ्गं लोहं तथाभ्रं च कर्पूरं पर्पटं सटी । पत्रेभकेसरं त्वक्च संशुद्धं च शिलाजतु ॥ ४ ॥ पृथगर्धपलं चूर्णं चूर्णितं सितशर्करा । सार्धप्रस्थमिता ग्राह्या दुग्धे वै लेह्यतां नयेत् ॥ ५ ॥ सर्वं तत्र क्षिपेत्तत्र स्वाङ्गशीतलतां नयेत् । मधुनः प्रस्थकं दद्यात्स्निग्धभाण्डे विनिक्षिपेत् ॥ ६ ॥ कर्षार्धं भक्षयेत्प्रातस्तीक्ष्णं तैलादिकं त्यजेत् । पञ्चाश्मरीभेदनः स्यान्मूत्रकृच्छ्रं खुडं तथा ॥७॥ मूत्राघातान्प्रमेहांश्च नाशयेन्मधुमेहताम् । अधोगं रक्तपित्तं च बस्तिकुक्षिगदं तथा ॥ ८ ॥ तीव्राश्मरीपरीतानां विशेषेण हितं हि तत् । प्रथमात्रिणा विरचितं च्यवनाय निवेदितम् ॥ ९ ॥ अथ रसाः ॥ तत्रादौ पाषाणवज्रकरसः ॥ शुद्धसूतं त्रिधा[1] गन्धं द्रावैः श्वेतपुनर्नवैः । मर्दयित्वा दिनं खल्वे रुद्ध्वा तद्भूधरे पचेत् ॥ १ ॥ पाषाणभेदचूर्णं तु समयुक्तं[2] द्विमाषकम् । भक्षयेदश्मरीं हन्ति रसः पाषाणवज्रकः ॥ २ ॥ गोपालककर्कटीमूलक्काथं तदनु पाययेत् ॥ ३ ॥ अथ त्रिविक्रमरसः ॥ ताम्रभस्म त्वजाक्षीरे पाच्यं तुल्ये घृते पचेत् । तत्ताम्रं शुद्धसूतं च गन्धकं च समं समम् ॥ १ ॥ निर्गुण्ड्युत्थद्रवैर्मर्द्यं दिनं तद्गोलमाहरेत् । यामैकं वालुकायन्त्रे पाच्यं योज्यं द्विगुञ्जकम् ॥ २ ॥ बीजपूरस्य मूलं तु सजलं चानुपाययेत् । रसस्त्रिविक्रमो नाम्ना सिकतां चाश्मरीं जयेत् ॥ ३ ॥ अथ पथ्यम् ॥ कुलित्था मुद्गगोधूमा जीर्णशालियवा हिताः । धन्वामिषं तण्डुलीयं जीर्णकूष्माण्डकं फलम् ॥ आर्द्रकं यावशूकश्च पथ्यमश्मरिरोगिणाम् ॥ ॥ १ ॥ इत्यश्मरीचिकित्सा ॥

---

१ (प० ह० च०) द्विधा । २ (च०) समं युक्त्वा ।